# HARIHARĪYA COMMENTARY ON TARKASAṄGRAHA: A STUDY WITH CONTENT ANALYSIS AND CRITICAL EDITION

# तर्कसंग्रहवृत्तेः हरिहरीयस्य समीक्षात्मकं सम्पादनम् अध्ययनं च ।

Thesis
Submitted to the University of Calicut
For the Award of the Degree of
**DOCTOR OF PHILOSOPHY IN SANSKRIT**

*By*


**SANJAY VARMA.V**


Under the guidance of


**Dr. Thanu V.G**
Assistant Professor, Sanskrit Sahitya

**DEPARTMENT OF SANSKRIT SAHITYA**

**SREE NEELAKANTA GOVERNMENT SANSKRIT COLLEGE, PATTAMBI**

**UNIVERSITY OF CALICUT**


**2024**

**Dr. Thanu V.G**
Assistant Professor, Sanskrit Sahitya
Department of Sanskrit Sahitya,
Sree Neelakanta Govt. Sanskrit College, Pattambi

# CERTIFICATE

This is to certify that this thesis entitled "HARIHARĪYA COMMENTARY ON TARKASAṄGRAHA: A STUDY WITH CONTENT ANALYSIS AND CRITICAL EDITION" (तर्कसंग्रहवृत्तेः हरिहरीयस्य समीक्षात्मकं सम्पादनम् अध्ययनं च ।) is a record of bonafide research work carried out by Sri. Sanjay Varma.V, under my guidence submitted to the University of Calicut for the award of the Degree of Doctor of Philosophy in Sanskrit.

The thesis is revised as per the modifications and recommendations reported by the adjudicators. Soft copy attached is the same as that of the revised copy.

Pattambi,
23. 10. 2024

**Dr. Thanu V.G**
(Supervising Teacher)
S. N. G. S. College
pattambi

# DECLARATION

I, Sanjay Varma. V, hereby declare that this thesis, entitled "HARIHARĪYA COMMENTARY ON TARKASAṄGRAHA: A STUDY WITH CONTENT ANALYSIS AND CRITICAL EDITION" (तर्कसंग्रहवृत्तेः हरिहरीयस्य समीक्षात्मकं सम्पादनम् अध्ययनं च।) submitted for the degree of Doctor of Philosophy in Sanskrit has not previously formed the basis for the award of any Degree, Diploma or Fellowship or other similar title or recognition in any University or Institution. I also declare that the thesis is free from AI generated contents.

Sanjay

Pattambi
23/10/2024

Sanjay Varma.V

# UNIVERSITY OF CALICUT

## CERTIFICATE ON PLAGIARISM CHECK

| | | | |
|---|---|---|---|
| 1. | Name of the Research Scholar | Mr. SANJAY VARMA . V | |
| 2. | Title of thesis / dissertation | HARIHARIYA COMMENTARY ON TARKASANGRAHA: A STUDY WITH CONTENT ANALYSIS AND CRITICAL EDITION | |
| 3. | Name of the Supervisor | Dr THANU V. G. | |
| 4. | Department/Institution | S.N.G.S College, Pattambi | |
| 5. | | **Non-core** | **Core** |
| | | **Introduction/ Theoretical overview/Review of literature/ Materials & Methods/ Methodology** | **Analysis/Result/Discussion/ Summary/Conclusion/ Recommendations** |
| | Similar content (%) identified | Less than 10% | Less than 10% |
| | Acceptable maximum limit (%) | 10 | 10 |
| 6. | Software used (Manually) | Manually checked | |
| 7. | Date of verification | 28-02-2024 | |

**Report on plagiarism check, specifying included/excluded items with % of similarity to be attached.*

Checked by (with name , designation & signature) Dr THANU. V. G. (Supervising Teacher) Asst. prof. Sanskrit Sahitya S.N.G.S. College, Pattambi

Name and signature of the Researcher Sanjay SANJAY VARMA. V

Name and signature of the Supervisor.

The Doctoral Committee* has verified the report on plagiarism check with the contents of the thesis, as summarized above and appropriate measures have been taken to ensure originality of the Research accomplished herein.

Name & Signature of the HoD/HoI (Chairperson of the Doctoral Committee)

PRINCIPAL
(Special Grade)
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad Dt.
Mele Pattambi (P.O.), 679 306

SREE NEELAKANTA GOVT. SANSKRIT COLLEGE PATTAMBI PIN: 679 306

**In case of languages like Malayalam, Tamil etc. on which no software is available for plagiarism check, a manual check shall be made by the Doctoral Committee, for which an additional certificate has to be attached.*

# कृतज्ञताविष्करणम्


सर्वादौ वन्द्यौ मम मातापितरौ। अस्मिन्नेव शोधप्रबन्धे मामेव समुचितसमयं प्रदाय मार्गदर्शनं कृतवद्भ्यः श्रीनीलकण्ठसर्वकारसंस्कृतमहाविद्यालयस्य संस्कृतसाहित्य-विभागस्य साहित्यविपश्चिद्भ्यः असि.प्रो. तनु वि.जि महाभागेभ्यः सप्रश्रयं धन्यवादान् व्याहरामि।

सर्वदा मयि कृपाकटाक्षं प्रकटयद्भ्यः मत्गुरुवर्येभ्यः सर्वशास्त्रधुरन्धरेभ्यः कैवल्यानन्दस्वामिभ्यः मामकीनं कार्तज्ञ्यं सविनयं विनिवेदयामि ।

मह्यं शोधसाहाय्यं बहुधा कृतवतीभ्यः कालिकट्ट्-विश्वविद्यालयस्थाभ्यः प्रो. गीताकुमारी के.के महाशयाभ्यः मामकान् धन्यवादान् सविनयं विनिवेदयामि ।

यथाकालम् आवश्यकानि पुस्तकसौकर्याणि कल्पयित्वा साहाय्यं कृतवद्भ्यः श्रीनीलकण्ठसर्वकारसंस्कृतमहाविद्यालयस्य ग्रन्थालयाधिकारिभ्यः विशिष्य पि.वि कादर् महाभागेभ्यः धन्यवादमर्पयामि।

विद्यार्जने आबाल्यात् मां प्रेरितवद्भ्यो मद्गुरुवर्येभ्यः प्रणामान् विनिवेद्य सर्वदा मह्यमुपकुर्वाणेभ्यः सर्वेभ्यः कृतज्ञतां विनिवेदयामि। मन्मित्राय डा विपिनाय धन्यवादमर्पयामि। अस्मिन् शोधप्रबन्धे ये साहाय्यं कृतवद्भ्यस्सर्वेभ्योपि श्रेष्ठेभ्यो धन्यवादान् समर्पयामि ।

इत्थम्

सञ्जय् वर्मा .वि

# विषयानुक्रमणिका


| विषयाः | पृष्ठसंख्या |
|---|---|
| प्रथमोऽध्यायः – उपोद्घातः। | 1 - 22 |
| तर्कशास्त्रम् | 3 |
| वैशेषिकदर्शनं परम्परा च | 4 |
| न्यायदर्शनपरम्परा | 7 |
| तर्कसंग्रहः प्रमुखटीकाश्च | 10 |
| हरिहरीयम् | 15 |
| हस्तलेखविवरणम् | 16 |
| मातृकायाः उपलभ्यमानः ग्रन्थकर्तृपरिचयः | 19 |
| अनुमानसिद्धः ग्रन्थकर्तृपरिचयः | 21 |
| द्वितीयोऽध्यायः - हरिहरीयस्य समीक्षात्मकं सम्पादनम् । | 23 - 69 |
| आमुखम् | 23 |
| मङ्गलश्लोकः | 23 |

| | |
|---|---|
| **तृतीयोऽध्यायः - हरिहरीयस्य समीक्षात्मकम् अध्ययनम्।** | 70 - 159 |
| अनुबन्धचतुष्टयम् | 73 |
| **चतुर्थोऽध्यायः - निरीक्षणानि** | 160 - 168 |
| आमुखम् | 160 |
| वंशावलिः | 160 |
| ग्रन्थवैशिष्ट्यम् | 161 |
| **उपसंहारः** | 169 - 170 |
| **गवेषणप्रेरणा** | 171 - 172 |
| **ग्रन्थसूची** | i – v |
| **अनुबन्धः** | vi – xii |

# HARIHARĪYA COMMENTARY ON TARKASAṄGRAHA: A STUDY WITH CONTENT ANALYSIS AND CRITICAL EDITION

# तर्कसंग्रहवृत्तेः हरिहरीयस्य समीक्षात्मकम् सम्पादनम् अध्ययनं च ।

**Sanjay Varma V**
Research Scholar

**Dr. Thanu V.G**
*Supervising Teacher*

## (Abstract)

This thesis is an attempt to edit and study critically the work Hariharīyam. This study aims to explore a new commentary on Tarkasaṅgraha written by a scholar named Harihara, assumed to have lived in Tamil Nadu in the 19th century. For this purpose, the present scholar has critically edited four manuscripts of Hariharīya. This endeavor should be regarded as a step towards understanding both the commentary and the commentator. The present scholar collected four manuscripts and three transcripts of the work from the Government Oriental Manuscript Libraries of Trivandrum and Chennai. Through this research work, the present scholar seeks to explore a new commentary on Tarkasaṅgraha, trace the tradition of the author, and ultimately discern the unique qualities of this particular commentary. Harihara elucidates Tarkasaṅgraha word by word in certain instances. He also demonstrates his skill by describing concepts in a slightly more complex manner, yet precisely, using the language of Navya-Nyāya. The thesis is divided into four chapters like Chapter 1 – उपोद्घातः (introduction); Chapter 2 – हरिहरीयस्य समीक्षात्मकं सम्पादनम् (the full text of Hariharīya, critically edited using 7 manuscripts); Chapter 3 – हरिहरीयस्य समीक्षात्मकं अध्ययनम् (content analysis of the text Hariharīya); Chapter 4 – निरीक्षणानि;

**Keywords:** Indian Philosophy, Tarka Sastra, Tarkasangraha, Harihariyam, Manuscripts, Critical Edition.

# ഹരിഹരീയം എന്ന തർക്കസംഗ്രഹവൃത്തിയുടെ സംശോധിതസംസ്കരണവും വിമർശനാത്മകാദ്ധ്യയനവും

## तर्कसंग्रहवृत्तेः हरिहरीयस्य समीक्षात्मकम् सम्पादनम् अध्ययनं च।

**Sanjay Varma V**
Research Scholar

**Dr. Thanu V.G**
*Supervising Teacher*

## (Abstract)

ലോകോത്തരമായ തത്ത്വശാസ്ത്രങ്ങളിൽ പ്രാചീനത കൊണ്ടും സമഗ്രത കൊണ്ടും വിഖ്യാതങ്ങളാണ് ഭാരതീയദർശനങ്ങൾ. അവയിൽ സാംഖ്യം, യോഗം, ന്യായം, വൈശേഷികം, പൂർവമീമാംസ, ഉത്തരമീമാംസ തുടങ്ങിയ ആസ്തികദർശനങ്ങളും ചാർവാകം, ബൗദ്ധം, ജൈനം തുടങ്ങിയ നാസ്തികദർശനങ്ങളും ഉൾപ്പെടുന്നു. വേദങ്ങളെ പ്രമാണമായി അംഗീകരിക്കുന്നവയെ ആസ്തികങ്ങൾ എന്നും അല്ലാത്തവയെ നാസ്തികങ്ങൾ എന്നും പറയുന്നു. ഇവയിൽ പദാർത്ഥതത്ത്വജ്ഞാനത്തിലൂടെ മോക്ഷം എന്ന സിദ്ധാന്തത്തെ പിന്തുടരുന്ന ന്യായവൈശേഷികദർശനങ്ങളുടെ  സമന്വിതമായ രൂപമാണ് തർക്കശാസ്ത്രം. 'തർക്ക്യന്തേ ഇതി തർക്കാ:' എന്നിങ്ങനെയാണ് തർക്കശാസ്ത്രത്തിന്റെ വ്യുത്പത്തി. യാഥാർത്ഥാനുഭവത്തിന് വിഷയമാകുന്നത് എന്നർത്ഥം. ഇത്തരത്തിൽ പ്രപഞ്ചത്തിലെ സർവ്വപദാർത്ഥങ്ങളേയും 'തർക്ക' ശബ്ദം പ്രതിനിധീകരിക്കുന്നു. മറ്റൊരു തരത്തിലും തർക്കശാസ്ത്രത്തെ വിശദീകരിക്കാം. ഒരു പദാർത്ഥത്തിൻറെ തത്ത്വം/സ്വരൂപം എന്താണെന്ന് അറിയാതിരിക്കെ കാരണോപപാദനങ്ങളിലൂടെ തത്വജ്ഞാനത്തിനു വേണ്ടി പ്രയോഗിക്കുന്ന വിചാരങ്ങളെ/യുക്തികളെ  തർക്കം എന്ന് ന്യായ വൈശേഷിക ദർശനങ്ങളിൽ പറഞ്ഞിരിക്കുന്നു. ഇത്തരത്തിൽ തർക്കത്തെ ആശ്രയിച്ച പ്രവർത്തിക്കുന്നത് എന്ന അർത്ഥത്തിൽ ഈ ദർശനങ്ങളെ പൊതുവായി തർക്കശാസ്ത്രം എന്നു പറയുന്നു. ഇത്തരത്തിൽ വിചാരശാസ്ത്രമെന്ന നിലയിലാണ് കാണാദം സർവ്വശാസ്ത്രോപകാരകം എന്നു പറയപ്പെടുന്നത്.

ന്യായവൈശേഷിക ദർശനങ്ങളിലേക്ക് പ്രവേശിക്കുവാൻ അത്യന്തം ഉപകരിക്കുന്ന ഗ്രന്ഥമാണ് അന്നംഭട്ടൻറെ തർക്കസംഗ്രഹം. പതിനേഴാം നൂറ്റാണ്ടിൽ എഴുതപ്പെട്ടിട്ടുള്ള ഈ ഗ്രന്ഥത്തിൻറെ  പ്രസിദ്ധീകൃതവും അല്ലാത്തതുമായ തൊണ്ണൂറിൽ അധികം വ്യാഖ്യാനങ്ങൾ ഇന്ന് ലഭ്യമാണ്. അവയിൽ പ്രസിദ്ധീകൃതം അല്ലാത്ത ഒരു വ്യാഖ്യാനമാണ് ഹരിഹരിയം. ഈ

ഗ്രന്ഥത്തിൻറെ ലഭ്യമായ കയ്യെഴുത്തുപകർപ്പുകളുടെ സംശോധിതസംസ്കരണവും വിമർശനാത്മകാദ്ധ്യയനവും ആണ് ഈ പ്രബന്ധത്തിൻറെ വിഷയം.

പ്രബന്ധം നാല് അധ്യായങ്ങൾ ആയി വിഭജിച്ചിരിക്കുന്നു.

1. उपोद्घातः (ആമുഖം)
2. हरिहरीयस्य समीक्षात्मकं सम्पादनम् (സംശോധിതസംസ്കരണം)
3. हरिहरीयस्य समीक्षात्मकं अध्ययनम् (വിമർശനാത്മകം അദ്ധ്യയനം)
4. निरीक्षणानि (ഉപസംഹാരം)

ഒന്നാം അദ്ധ്യായം പ്രബന്ധത്തിൻറെ ആമുഖമാണ്. ഇതിൽ തത്ത്വശാസ്ത്രം, തർക്കശാസ്ത്രം, ന്യായവൈശേഷിക പരമ്പര, ഹരിഹരീയം എന്ന കൃതി, ഹസ്തലിഖിതങ്ങളെ കുറിച്ചുള്ള വിവരണം, ഗ്രന്ഥകർത്താവിനെ കുറിച്ചുള്ള വിവരണം എന്നിവ അടങ്ങിയിരിക്കുന്നു. രണ്ടാം അദ്ധ്യായം 7 ഹസ്തലിഖിതഗ്രന്ഥങ്ങൾ ഉപയോഗിച്ച സംശോധിതസംസ്കരണം നിർവഹിച്ച ഹരിഹരീയം എന്ന ഗ്രന്ഥമാണ്. മൂന്നാം അദ്ധ്യായം ഹരിഹരീയത്തിൻറെ വിമർശനാത്മകമായ അദ്ധ്യയനമാണ്. നാലാം അദ്ധ്യായം ഉപസംഹാരവും നിരീക്ഷണങ്ങളുമാണ്.

Keywords: ഭാരതീയദർശനങ്ങൾ, തർക്കശാസ്ത്രം, തർക്കസംഗ്രഹം, ഹരിഹരീയം, കൈയ്യെഴുത്തുപ്രതികൾ, വിമർശനാത്മകാദ്ധ്യയനം.

# प्रथमोऽध्यायः

## उपोद्घातः

तत्त्वज्ञानसम्बद्धं शास्त्रं तत्त्वशास्त्रम्। 'तत्त्वम्' इति शब्दस्यार्थो भवति याथार्थ्यम्। यस्मिन् शास्त्रे पदार्थानां यथार्थस्वरूपम् अथवा वास्तविकं स्वरूपं ज्ञानस्य विषयो भवति तत् तत्त्वशास्त्रमिति सामान्यतया वक्तुं शक्यते।"ज्ञानार्जनमेव तत्त्वशास्त्रम्"[1], "तत्तु मनुष्यस्य आश्चर्यादेव आरभते, दार्शनिकस्य स्थायीभावोऽपि आश्चर्यो भवति" इति यवनतत्त्वचिन्तकेन प्लेटो (Plato) नामकेन महोदयेन उक्तं वर्तते[2] । "ज्ञानसम्बद्धं तथा सत्यसम्बद्धं शास्त्रं भवति तत्त्वशास्त्रम्" इति ऐरिष्-चिन्तकेन 'जोर्ज्बेरकली' (George

---

1 One ought to pursue wisdom, and this pursuit called philosophy is an acquiring of knowledge. 288d, Euthydemus, Plato.

2 This feeling of wonder is very characteristic of your philosopher: indeed, that and nothing but that is the source of all philosophy. 155d, Theatetus, Plato.

Berkely) इति नामकेन महोदयेन उदितम्[3]। आङ्गलेयभाषायां तत्त्वशास्त्रं 'फिलोसफि'(Philosophy) इत्यभिधीयते। ज्ञानाभिनिवेशः इत्यर्थकात् 'फिलोसोफिया' (Philosophia) इत्यस्मात् यवनशब्दात् अस्य शब्दस्याविर्भावः। संस्कृतभाषायां दर्शनशब्देन प्रथितं भवतीदं शास्त्रम्। "दृश्यते यथार्थतया ज्ञायते पदार्थोऽनेन इति दर्शनम्" इति वाचस्पत्यकारः अभिप्रेति[4]। "दृश्यते यथार्थतत्त्वमनेन इति दर्शनम्" इति कल्पद्रुमकारः[5]। यदि पदार्थतत्त्वज्ञानं तत्त्वशास्त्रस्य विषयश्चेत् भौतिकरसतन्त्रशास्त्राण्यपि तत्त्वशास्त्राणि भवेयुः, तत्रापि पदार्थानां तत्त्वज्ञानसम्भवादिति चेन्न,"तत्त्वशास्त्रे प्रपञ्चस्य सर्वपदार्थानां समग्रतया अपग्रथनम् अथवा निर्वचनम् एव"[6]। शास्त्रान्तराणि साक्षात् परम्परया वा तत्सहायकानि भवन्ति। अथवा "तत्त्वशास्त्रम् इतरशास्त्रैः सह अङ्गाङ्गिसम्बन्धेन वर्तते" इति वक्तुं शक्यते[7]। तत्त्वशास्त्रप्रपञ्चे स्वेषां

---

3 Philosophy being nothing else but the study of wisdom and truth. p173, A Treatise concerning the principles of human knowledge, George Berkeley.

4 तर्कवाचस्पति तारानाथः, वाचस्पत्यम्, वाल्यं - 4, वाराणसि, 1962, पु. सं. 3474.

5 Raja Radhakantha, Sabdakalpadrumah, Part II, 3rd Edition, Varanasi, 1967, p.689

6 Fuller B.A, A History of Philosophy, Delhi, 1969, p1.

7 'Himagiriviharam, Swami Thapovanam, p293.

प्राचीनतया एवं समग्रतया विख्यातानि भवन्ति भारतीयदर्शनानि। तेषु सांख्ययोगन्यायवैशेषिकपूर्वमीमांसोत्तरमीमांसाः आस्तिकदर्शनानि, चार्वाकबौद्धजैनाः नास्तिकानि च भवन्ति। आस्तिकास्तावत् वेदान् प्रमाणरूपेण अङ्गीकुर्वन्ति अन्ये तु न। जननमरणे, सुखदुःखाद्यनुभवाः, तेषां भोक्ता, भोक्तृस्वरूपम्, जीवस्य अवस्थाविशेषाः, मोक्षस्वरूपम् इत्येते भारतीयदर्शनानां सामान्यविषयाः भवन्ति। विना चार्वाकम् अन्ये सर्वे मोक्षसिद्धान्तप्रवक्तारो भवन्ति। तस्य परमपुरुषार्थत्वं कल्प्यते च।

## तर्कशास्त्रम्

सर्वेषां तत्त्वसंहितानामाधारशिलारूपेण कापि तर्कपद्धतिः द्रष्टुं शक्यते। तर्को नाम युक्तिविचारः। भारतीयतर्कशास्त्रं तु न केवलं भारतीयदर्शनानाम् आश्रयभूतविचारशास्त्रम् किन्तु मोक्षप्रयोजकपदार्थतत्त्वशास्त्रमपि भवति। तर्क्यन्ते प्रमितिविषयीक्रियन्ते इति तर्कः इति तर्कशब्दस्य व्युत्पत्तिः। पदार्थः इति तदर्थः। पदार्थतत्त्वज्ञानेन निश्रेयसाधिगमः इति सिद्धान्तसम्मतात् समानतन्त्रभूतयोः न्यायवैशेषिकदर्शनयोः समन्वितरूपत्वेन एतद्दर्शनस्य महत्त्वमधिक्रियते। तर्कशब्दस्यार्थः न्यायसूत्रे एवं दृश्यते यथा “अविज्ञाततत्त्वे अर्थे

कारणोपपत्तितः तत्त्वज्ञानार्थमूहः तर्कः”[8] इति। ऊहो नाम विचारः। स्वसिद्धान्त-स्थापनार्थं परसिद्धान्तनिरासार्थञ्च सर्वे दार्शनिकाः शास्त्रमेतदपेक्षन्ते।

## वैशेषिकदर्शनं परम्परा च

वैशेषिकदर्शनस्य कणादर्षिप्रोक्तत्वात्, कणादस्य उलूक इति नामान्तरसत्त्वाच्च एतद्दर्शनस्य काणादमौलूक्यञ्चेति नामान्तरे विद्येते। महर्षेः कणादस्य सूत्रग्रन्थः अस्य दर्शनस्य प्राचीनतमः तथा मौलिकः ग्रन्थो भवति। किरणावलीकारस्य उदयनाचार्यस्य मते कणादः कश्यपमहर्षेः पुत्रो भवति। त्रिकाण्डशेषेऽपि काश्यप इति नाम्ना सः उपलब्धोऽस्ति। वैशेषिकसूत्राणां रचनाकालः विक्रमपूर्वतृतीयशतके आसीदिति शङ्करमिश्रो मन्यते[9]। वैशेषिकसूत्राणामुपलब्धेषु भाष्येषु प्राचीनतमं भवति प्रशस्तपादभाष्यम्। पदार्थधर्मसंग्रहमिति तस्य अभिधान्तरम्। भाष्यप्रोक्तसिद्धान्तानां प्रयोगः वात्स्यायनेन तथा खण्डनं वसुबन्धुना च कृतमस्ति इत्यतः तस्य कालः द्वितीयशतके भवितुं शक्यते। सूत्राणामुपरि आत्रेयमहर्षिः, लङ्कानरेशः रावणः च भाष्ये

---

8 गौतमः, न्यायसूत्राणि 1.1.40, न्यायशास्त्रस्य भाषा संस्कृतं पठ्यताम्, संस्कृतसंवर्धनप्रतिष्ठानम्, देहली, 2020, पु.सं 30

9 The Vaisesika Sutras of Kaṇada: With the Commentary of Sankara Misra and Extracts from the Gloss of Jayanarayaṇa, The Panini Office, Allahabad, 1911, introduction.

विरचितवन्तौ इति विश्रुतम्। तथैव भारद्वाजवृत्तिमधिकृत्यापि उल्लेखः अस्ति । उपलब्धेषु सर्वप्राचीना वृत्तिः चन्द्रानन्दवृत्तिश्च प्रसिद्धा[10]। पदार्थधर्मसंग्रहे प्रतिपादितानां सिद्धान्तानां तादृशरीत्या निर्देशः सूत्रेषु नास्ति। सूत्रकारमते सप्तदश गुणाः सन्ति। भाष्ये तु चतुर्विंशतिः गुणाः भवन्ति। अस्मिन् दर्शने ईश्वरस्य स्थापनं भाष्यकारेण कृतं भवति। सूत्रेषु ईश्वरमधिकृत्य परामर्शोƒपि नास्ति। एवं वैशेषिकदर्शनस्य अनेकानां मौलिकसिद्धान्तानामुद्भावना भाष्यकारेण कृतास्ति। एषः अभिप्रायः निर्विवादपरोऽस्ति। अत एव दर्शनेऽस्मिन् सूत्राणामुपरि भाष्यस्य प्रामाणिकता विद्यते। भाष्यस्य रचितासु टीकासु सर्वप्राचीना भवति व्योमवती। तस्याः कर्ता व्योमशिवाचार्यः दक्षिणभारतीयः शैवाचार्यः आसीदिति श्रूयते। हर्षवर्धनसमकालिकस्य तस्य नामोल्लेखः उदयनाचार्येण तथा राजशेखरेण च कृतः अस्ति। सः शब्दं स्वतन्त्रप्रमाणत्वेन अङ्गीकरोति। भाष्यस्य द्वितीयटीका भवति उदयनाचार्यस्य किरणावली। किरणावल्याः मुख्यटीकाः सन्ति वरदराजकृतटीका, वादीन्द्रकृतरससारटीका, वर्धमानोपाध्यायकृतकिरणावलीप्रकाशटीका, पद्मनाभमिश्रकृतकिरणावलीभाष्यटीका च। तृतीयस्थाने श्रीधराचार्यकृतन्यायकन्दली विद्यते। तस्याः पद्माकरमिश्रकृतन्यायकन्दलीसारः, राजशेखरकृतन्यायकन्दली-

---

10 बडौदात् प्रकाशितम्, 700 क्रिस्त्वब्दः ।

पञ्जिका च मुख्ये टीके स्तः। चतुर्थस्थाने श्रीवत्सस्य न्यायलीलावती अस्ति। पञ्चमस्थाने वल्लभाचार्यप्रणीतन्यायलीलावती[11] भवति। रससारकर्तृणा वादीन्द्रेण वल्लभाचार्यस्य नामोल्लेखः कृतः अस्ति। अनन्तरं पद्मनाभमिश्रस्य सेतुनामको ग्रन्थो विद्यते। शङ्करमिश्रस्य कणादरहस्यं न केवलं टीकाग्रन्थः, वैशेषिकसिद्धान्तान् अधिकृत्य विरचितः स्वतन्त्रग्रन्थोऽपि भवति। अष्टमस्थाने जगदीशभट्टाचार्यस्य सूक्तिटीका अस्ति। द्रव्यग्रन्थपर्यन्तमेव सा उपलब्धा। न्यायवैशेषिकसिद्धान्तानां सुन्दरः समन्वयः शिवादित्यमिश्रकृते सप्तपदार्थनामके ग्रन्थे द्रष्टुं शक्यते। खण्डनखण्डखाद्ये श्रीहर्षेण अस्य प्रमालक्षणखण्डनं कृतमिति कारणेन तस्य कालः द्वादशशतकात्पूर्वमिति मन्यते। शिवादित्यमिश्रस्यैव ग्रन्थान्तरं भवति लक्षणमाला। मिथिलादेशनिवासिनः शङ्करमिश्रस्य अनेके ग्रन्थाः सन्ति। उपस्काराभिहितः कणादसूत्रटीका, प्रशस्तपादभाष्यव्याख्या, कणादरहस्यमिति स्वतन्त्रग्रन्थः, आमोदाभिहितः न्यायकुसुमाञ्जलीव्याख्या, कल्पलताख्या आत्मतत्त्वटीका, आनन्दवर्धनाभिहिता खण्डनखण्डखाद्यटीका, मयूखेति चिन्तामणीटीका, वादिविनोदः इति वादविषयको मौलिकग्रन्थः, श्रीहर्षकृतखण्डन-ग्रन्थस्य खण्डनं तथा न्यायवैशेषिकस्य द्वैतसिद्धान्तप्रतिपादको भेदरत्नप्रकाशश्च तेषु

---

11 नोपलब्धम् ।

प्राधन्यमर्हन्ति। वङ्गदेशस्थः विश्वनाथन्यायपञ्चाननः स्वकृतभाषापरिच्छेदग्रन्थे 168 कारिकासु वैशेषिकसिद्धान्तान् निबध्नाति। तासां तेनैवकृतव्याख्या भवति न्यायसिद्धान्तमुक्तावली। मुक्तावल्याः दिनकरभट्टकृता टीका भवति दिनकरीटीका। तस्याः व्याख्या अस्ति रामरुद्रस्य रामरुद्री। दर्शनेऽस्मिन् लोकप्रियतमः प्रकरणग्रन्थो भवति अन्नंभट्टस्य तर्कसंग्रहः।

### न्यायदर्शनपरम्परा

न्यायदर्शनस्याधारभूतो ग्रन्थो भवति महर्षेः गौतमस्य न्यायसूत्रम्। जैकोबीमहोदयस्य मतानुसारं न्यायसूत्राणां रचनाकालः इशवीयद्वितीयपञ्चमशताब्दयोर्मध्ये अस्ति[12]। वात्स्यायनेन न्यायभाष्यस्य रचना ईशवीये चतुःश्शततमे वर्षे कृता। बौद्धदार्शनिकेन दिङ्नागेन वात्स्यायनस्य मतं खण्डितम्। तस्यापि खण्डनम् उद्योतकरेण स्वकीये वार्तिके कृतम्। उद्योतकरेण प्रायः षष्ठशताब्दोत्तरार्धसप्तमशताब्दपूर्वार्धयोर्मध्ये न्यायवार्तिकस्य रचना कृता[13]। उद्योतकरप्रणीतवार्तिकानामुपरि वाचस्पतिमिश्रेण तात्पर्यटीकाभिधा टीका विरचिता। तस्याः टीकायाः उदयनाचार्येण तात्पर्यपरिशुद्धिः इति

---

12 Journal of the American oriental Society, p2,12.

13 A Primer of Indian Logic, Introduction, Kuppuswami.

नाम्ना टीकापि कृता। उदयनाचार्यप्रणीता ग्रन्थान्तरद्वयं भवति न्यायकुसुमाञ्जलिः, आत्मतत्त्वविवेकश्च। विदुषा जयन्तेन न्यायमञ्जरीनामको ग्रन्थो विरचितः। न्ययसूत्रेषु केषाञ्चित् प्रमुखसूत्राणां व्याख्यानरूपो भवति ग्रन्थोƒयम्। तदनन्तरं भासर्वज्ञस्य न्यायसारः विद्यते। गङ्गेशोपाध्यायो द्वादशशताब्दे युगान्तरकारिणं ग्रन्थं तत्त्वचिन्तामणिं व्यरचयत्। अस्मादेव ग्रन्थरत्नात् न्यायदर्शनस्य नवीनो युगो नव्यन्यायात्मकः प्रारब्धः। गौतमीयन्यायशास्त्रं प्राधान्येन पदार्थशास्त्रं वर्तते। तत्त्वचिन्तामणिना न्यायशास्त्रं विशुद्धप्रमाणशास्त्ररूपेण परिणतम्। गङ्गेशोपाध्यायस्य पुत्रो वर्धमानोपाध्याय: तत्त्वचिन्तामणिप्रकाश इति नाम्ना टीकामेकां विरचितवान्। पक्षधरमिश्रापरनामधेयो जयदेवस्तु तत्त्वचिन्तामणिमधिकृत्य आलोकनामकं टीकाग्रन्थं विरचितवान्। पञ्चदश-षोडशशताब्दयोर्मध्ये वासुदेवसार्वभौमः तत्त्वचिन्तामणेरुपरि सारावलीनामकं व्याख्याग्रन्थं जग्राथ, यो हि नवद्वीपसम्प्रदायस्य प्रथमो महान् ग्रन्थः। अयं वासुदेवसार्वभौमस्तावत् चैतन्यमहाप्रभोः प्रसिद्धस्य नैय्यायिकस्य रघुनाथतार्किक-शिरोमणेश्च गुरुरासीत्। रघुनाथशिरोमणिः तत्त्वचिन्तामणेरुपरि दीधितिनाम्ना विश्वविश्रुतां टीकाम् अरचयत्। अस्य अन्ये प्रमुखाः ग्रन्थाः भवन्ति किरणावलीप्रकाशदीधितिः, न्यायदीपावलीप्रकाशदीधितिः, अवच्छेदकत्वनिरुक्तिश्च। रघुनाथशिरोमणेः शिष्येषु अन्यतम आसीत् मथुरनाथतर्कवागीशः। तत्त्वचिन्तामणि-रहस्यम्, दीधितिरहस्यम्,

आलोकरहस्यम्, किरणावलिप्रकाशरहस्यञ्च तस्य मुख्यग्रन्थाः भवन्ति। षोडशशताब्दे जगदीशभट्टाचार्येण तत्त्वचिन्तामणे: दीधितिप्रकाशिकेति नाम्ना प्रथिता टीका विरचिता, या हि पण्डितसमाजेषु जगदीशी इति नाम्ना विश्रुता। सः शब्दशक्तिप्रकाशिकाम्, तर्कामृतमिति कञ्चन प्रकरणग्रन्थञ्च विरचितवान्। सप्तदशशताब्दे गदाधरभट्टाचार्यः गदाधरीं विरचितवान्। अनुमानचिन्तामणिदीधिति-टीका, शब्दप्रामाण्यवादरहस्यम्, बुद्धिवादः, युक्तिवादः, विषयतावादः, व्युत्पत्तिवादः, शक्तिवादः इत्यादयो ग्रन्थाः गदाधरभट्टाचार्येण विरचिताः सन्ति। शङ्करमिश्रो जगदीशीमधिकृत्य टीकामेकां ग्रन्थयामास। अयं वैशेषिकसूत्राणामपि उपस्कारनामिकां टीकामेकां व्यरचयत्। विश्वनाथपञ्चाननस्य भाषापरिच्छेदः, कारिकावलीत्यपरनाम्ना प्रसिद्धो भवति। एतद्ग्रन्थमधिकृत्य तेनैव लिखिता टीका न्यायसिद्धान्तमुक्तावलीति प्रसिद्धा अद्यत्वेपि पण्डितसमाजे अतिसमादृता वर्तते। केशवमिश्रस्य तर्कभाषा, अन्नंभट्टस्य तर्कसंग्रहश्च सर्वैरपि तर्कशास्त्रमधिजिगांसमानैः प्राथम्येन समाद्रियमाणौ ग्रन्थतल्लजौ स्तः। अत एव तर्कभाषां तर्कसंग्रहञ्चाधिकृत्य अद्यावधि बह्व्यः टीका: उपटीकाश्च लिखिता विराजन्ते। इमे द्वे अपि पुस्ते न्यायशास्त्रे प्रविविक्षूणां छात्राणां कृते अत्युपादेये स्तः ।

**तर्कसंग्रहः प्रमुखटीकाश्च**

प्रमाणैरर्थपरीक्षणं एव न्यायः। एवं परीक्ष्य निर्णीताः अर्थाः एव न्यायशास्त्रस्य तर्कशास्त्रस्य वा प्रतिपाद्याः विषयाः। एषां विषयाणां सङ्क्षेपतः अवबोधाय आन्ध्रादेशीयेन पण्डितेन अन्नंभट्टेन तर्कसंग्रहो नाम प्रकरणग्रन्थः प्रणीतः। तर्क्यन्ते प्रमितिविषयीक्रियन्त इति तर्काः, सप्त पदार्थाः, तेषां संग्रहः संक्षेपेणोद्देशलक्षणपरीक्षा यस्मिन् सः ग्रन्थः तर्कसंग्रहः इति तस्य व्युत्पत्तिः। नाममात्रेण वस्तुसङ्कीर्तनम् उद्देशः, असाधारणधर्मो लक्षणम्, लक्षितस्य लक्षणं संभवति न वेति विचारः परीक्षा इति पदकृत्यकारः चन्द्रजसिंहः। बालानां न्यायशास्त्रप्रवेशने अत्यन्तमुपकारोयं ग्रन्थः। अत एवास्योपरि नवत्यधिकाः टीकाः इतः पर्यन्तं रचिताः सन्ति। अन्नंभट्टेन रचिता दीपिका, गोवर्धनमिश्रकृता न्यायबोधिनी, श्रीकृष्णधूर्जटिदीक्षितकृतः सिद्धान्तचन्द्रोदयः, चन्द्रजसिंहकृतं पदकृत्यमित्यादयः बह्व्यः प्रमुखाः टीकाः सन्ति। अधः तर्कसंग्रहस्य प्रमुखानां टीकानां तेषां कर्तृणाञ्च नामानि उपलक्षणेन दीयन्ते।

| **क्रम.सं** | **व्याख्याः** | **कर्तारः** |
|---|---|---|
| 1 | तर्कसङ्ग्रहदीपिका/ शिशुहिता | अन्नंभट्टः |
| 2. | तर्कसंग्रहचन्द्रिका | मुकुन्दझा (शर्मा/भट्टः) |
| 3 | कुवलयोल्लासः | कृष्णताताचार्यः |

| | | |
|---|---|---|
| 4 | चन्द्रोदयः | जीवरामशास्त्री |
| 5 | तर्कसंग्रहतत्त्वप्रकाशः | श्रीकण्ठः (?) |
| 6 | तर्कसंग्रहटीका | शिवदत्तमिश्रः |
| 7 | तर्कसंग्रहदीपिका | सोपज्ञः |
| 8 | तर्कसंग्रहव्याख्यानिरुक्तिः | जगन्नाथशास्त्री |
| 9 | न्यायचन्द्रिका | अज्ञातकर्त्री |
| 10 | न्यायबोधिनी | गोवर्धनसुधीः (मिश्रः) |
| 11 | सुरतकल्पतरुः | श्रीनिवासः |
| 12 | तर्कसंग्रहटीका | गदाधरभट्टः |
| 13 | तर्कसंग्रहटीका | जगदीशभट्टः |
| 14 | पदकृत्यम् | चन्द्रजसिंहः |
| 15 | पदकृत्यमञ्जरी | अज्ञातकर्त्री |
| 16 | फक्किका | क्षमाकल्याणगणिः |
| 17 | वाक्यवृत्तिः | अज्ञातकर्त्री |
| 18 | वृषकेतुमानसः | हरिहरः/शङ्करः |
| 19 | तर्कसंग्रहशङ्कुः | अज्ञातकर्तृकः |
| 20 | विरला/हेत्वाभासोदाहरणम् | दुण्ढिराजशास्त्री |
| 21 | सुबोधिनी | अज्ञातकर्त्री |
| 22 | प्रभा | अप्पाभट्टः |

| | | |
|---|---|---|
| 23 | विरला | रामचन्द्रझा |
| 24 | पदार्थबोधका | कर्मचन्द्रयतिः |
| 25 | पट्टाभिरामप्रकाशिका/<br>तर्कसंग्रहदीपिकाप्रकाशिका/टिप्पणी | पट्टाभिरामशास्त्री |
| 26 | बालबोधिनी | रामनारायणतर्कपञ्चाननः |
| 27 | बालबोधिनी | नृसिंहदेवः |
| 28 | भवन्यासः | अज्ञातकर्त्री |
| 29 | तर्कसंग्रहव्याख्या | मुरारिः |
| 30 | वाक्यार्थनिरुक्तिः/वाक्यार्थबोधिनी | पट्टाभिरामः |
| 31 | वाक्यार्थनिरुक्तिव्याख्या | अज्ञातकर्त्री |
| 32 | विवृत्तिः | अज्ञातकर्त्री |
| 33 | तर्कसंग्रहव्याख्या | अनन्तनारायणः |
| 34 | सिद्धान्तचन्द्रोदयः/तर्कसंग्रहविवरणम् | कृष्णधूर्जटीदीक्षितः |
| 35 | न्यायबोधिनी/न्यायार्थलघुबोधिनी | गोवर्धनरंगाचार्यः |
| 36 | तर्कप्रकाशिनी | चण्डेश्वरः/चन्द्रेश्वरः |
| 37 | बालबोधिनी | चिदानन्दाश्रमयतिः |
| 38 | प्रकाशिका/नीलकण्ठप्रकाशिका | नीलकण्ठशास्त्रीभट्टः |
| 39 | प्रकाशिकाव्याख्या | बलभद्रत्रिपाठी |
| 40 | तर्कसंग्रहटीका | मदनभट्ट – उपाध्यायः |
| 41 | प्रतिबिम्बः | अज्ञातकर्तृकः |

| | | |
|---|---|---|
| 42 | विषमस्थलटिप्पणी | गण्डसिंहः |
| 43 | तर्कसंग्रहसर्वस्वम् | कुरुगन्तिश्रीरामशास्त्री |
| 44 | परिमलः | गुरुप्रसाद शास्त्री |
| 45 | तर्कसंग्रहव्याख्या | शिवनारायणशास्त्री |
| 46 | किरणावली | वामाचरणभट्टाचार्यः |
| 47 | कन्दः (गोविन्द) | एस्वज्रपुकार/वैजपुकार |
| 48 | विलासिनी | ज्वालाप्रसादगौड |
| 49 | तर्कविलासिनी | मुरलीधरशास्त्री |
| 50 | बालप्रिया | एन्.एस्.रामानुजताताचार्यः |
| 51 | तर्कसंग्रहवाक्यार्थनिरुक्तिः | माधवपदाभिरामः |
| 52 | तर्कसंग्रहचन्द्रिका | मुकुन्दभट्टगाडगिलः |
| 53 | तर्कसंग्रहोपन्यासः/वाक्यवृत्तिः/भाष्यवृत्तिः | मेरुशास्त्रीगोडबोले |
| 54 | न्यायबोधिनीव्याख्या | शुक्लरत्ननाथः |
| 55 | न्यायरत्नप्रकाशिका | रामचन्द्रभट्टाचार्यः |
| 56 | निरुक्तिः | रामचन्द्रभट्टाचार्यः |
| 57 | मार्त्तण्डः | रामदत्तः |
| 58 | तर्कसंग्रहव्याख्या | रामनाथभट्टाचार्यः |
| 59 | कौतुकः | रामेश्वर शुक्लः |
| 60 | ध्रुवपदा | हरिहरशास्त्री |

| | | |
|---|---|---|
| 61 | तर्कसंग्रहरङ्गिणी | विन्ध्येश्वरीप्रसादद्विवेदी |
| 62 | तर्कसंग्रहव्याख्या | विश्वनाथपञ्चाननः |
| 63 | तर्कचन्द्रिका | वैद्यनाथगाडगिलः |
| 64 | तर्कसंग्रहव्याख्या | शेषाचार्यः |
| 65 | भावदीपिका | श्रीधरः |
| 66 | तर्कसंग्रहचन्द्रिका | सुबहुबुद्धिः |
| 67 | तर्कसंग्रहवृत्तिः/न्यायबोधिनी | हरिहरः |
| 68 | गुप्तार्थदीपिनी | कृष्णशास्त्री |
| 69 | कलिङ्गपरिभाषा | अज्ञातकर्त्री |
| 70 | तर्करत्नमहोदधिः | वेङ्कटाचार्यः |
| 71 | प्रकाशः | अज्ञातकर्तृकः |
| 72 | तर्कसंग्रहदीपिकाव्याख्या | गदाधरभट्टः |
| 73 | विवरणम् | अज्ञातकर्तृकम् |
| 74 | नृसिंहः/नरसिंहप्रकाशिका | अज्ञातकर्त्री |
| 75 | दीपिकाव्याख्याप्रभा | नारायणतीर्थः |
| 76 | नीलकण्ठी/दीपिकाप्रकाशः(शिका) | नीलकण्ठभट्टः |
| 77 | प्रकाशिका / रामरुद्री | रामरुद्रभट्टः |
| 78 | भास्करोदया | लक्ष्मीनृसिंहः |
| 79 | तर्कसंग्रहदीपिकाप्रकाशिका | पट्टाभिरामः |

| | | |
|---|---|---|
| 80 | तर्कसंग्रहदीपिकाव्याख्या | भण्डारी उपह्व(?)महादेवः |
| 81 | टिप्पणी/रामरुद्रीयः | रामरुद्रतर्कवागीशभट्टाचार्यः |
| 82 | तर्करत्नव्याख्या | टी. वीरराघवः |
| 83 | तत्त्वार्थदीपिका/तर्कसंग्रहदीपिकाटिप्पणी | वेंकटाचार्यः/वाधुलवेंकटगुरुः |
| 84 | तत्त्वार्थदीपिकाव्याख्या | शठकोपः |
| 85 | प्रभा/हनुमदीयम्/हनुमन्ती | हनुमत्पण्डितः |
| 86 | प्रसारणा/प्रसारिणी | ताताचार्य स्वामी |
| 87 | तर्कसंग्रहव्याख्याबालबोधिनी | दक्षिणामूर्तिसूरिः |
| 88 | तर्कसंग्रहव्याख्या | श्रीनिवासार्यसूनुः |
| 89 | तर्कसंग्रहप्रकाशिका/अर्थप्रकाशिका | पुरुषोत्तमभट्टः |
| 90 | तर्कसंग्रहनिरुक्तिव्याख्या | नृसिंहाश्रमी |

अनेकासु तर्कसंग्रहटीकासु हरिहरीयमिति तर्कसंग्रहटीका मातृकायां विराजमाना अद्यावधि अप्रकाशिता च भवति। अतः मम विद्यावारिधिरित्युपाधये समर्प्यमाणे शोधप्रबन्धे सैव टीका ससमीक्षपाठभेदनिर्णयात्मकशोधत्वेन आदृता विद्यते।

## हरिहरीयम्

तर्कसंग्रहोपरि रचितासु अनेकासु टीकासु अन्यतमो भवति हरिहरीयम्। ग्रन्थकर्तुः नाम हरिहरः इति भवति। लब्धासु मातृकासु अस्य ग्रन्थस्य कालः 1885 इति वर्षात्

पूर्वं भवतीति मन्यते। वि.एन् झा महोदयस्य Tarkasamgraha of Annambhatta नाम ग्रन्थस्य अनुबन्धे तर्कसंग्रहटीकासु अन्यतमत्वेन हरिहरीयमपि परामृष्टमस्ति। अप्रकाशितमपि टीकायाः नामपरामर्शनेनैव अस्याः प्राधान्यं अभिव्यनक्ति च। परमेश्वरं तथा स्वगुरुं नमस्कृत्य ग्रन्थोƒयं आरब्धो भवति। ग्रन्थपठनात् विदुषां कृते मोदः ज्ञानहीनानां पदार्थतत्त्वज्ञानं च लभते इति ग्रन्थकृदस्य ग्रन्थस्य अध्ययनप्रयोजनं कथयति। ग्रन्थेƒस्मिन् नव्यन्यायस्य तथा प्राचीनन्यायस्य चांशाः गुम्फिताः सन्ति।

**हस्तलेखविवरणम्**

अधुना ग्रन्थस्यास्य तालपत्रेषु लिखिताः चतस्रः मातृकाः, तथा तिस्रः कर्गजमातृकाश्च उपलभ्यन्ते। प्रबन्धेस्मिन् व्यवहारलाघवार्थं तेषां क,ख,ग,घ,ङ,च,छ इति नामानि दत्तानि वर्तन्ते।

1) ‘क’ इति मातृका केरलेषु तिरुवनन्तपुरजनपदे प्रवर्तमानात् केरलविश्वविद्यालयस्य मातृकागारात् उपलब्धा। इयं मातृका देवनागरीलिप्या विरचिता वर्तते। अस्य हस्तलेखसंख्या T 781 भवति। पुटानां संख्या – 49, मातृकायां लेखकस्य नाम - ए.कुञ्जुकृष्णप्पिल्ला ,मलयालवर्षमनुसृत्य दिनाङ्कः-

31-01-104[14], क इति मातृकाग्रन्थः वक्ष्यमाणात् ग इति मातृकग्रन्थात् उद्धृत्य लिखितो भवति।

2) 'ख' इति मातृका केरलेषु तिरुवनन्तपुरजनपदे प्रवर्तमानात् केरलविश्वविद्यालयस्य हस्तलिखितग्रन्थालयात् उपलब्धः मलयाललिप्या विरचितः एकः ग्रन्थो भवति। अस्य हस्तलेखसंख्या 1840 B भवति। तत्र तालपत्रानां संख्या चत्वारिंशत्। मातृकायाः पुष्पिकायाम् കൂടല്ലൂര് മേലേടത്തെ ഹരിഹരീയം തർക്കസംഗ്രഹവ്യാഖ്യാനമിത് इति अङ्कितं दृश्यते।

3) 'ग' इति मातृका केरलेषु तिरुवनन्तपुरजनपदे प्रवर्तमानात् केरलविश्वविद्यालयस्य हस्तलिखितग्रन्थालयात् उपलब्धः मलयाललिप्या विरचितः एकः ग्रन्थो भवति। अस्य हस्तलेखसंख्या 1676 भवति। ग्रन्थस्य स्वामिः वैक्कं कटुत्तुरुत्ति ऋषि इल्लत्त् परमेश्वरन् नम्पूतिरि भवति।

4) 'घ' इति मातृका केरलेषु तिरुवनन्तपुरजनपदे प्रवर्तमानात् केरलविश्वविद्यालयस्य हस्तलिखितग्रन्थालयात् उपलब्धा देवनागरीलिप्या विरचिता कर्गजमातृका वर्तते। अस्य हस्तलेखसंख्या T 821 भवति। पुटानां संख्या तावत् 43 भवति।

---

14 15-09-1928

लेखकस्य नाम एन् रामनुण्णि शास्त्रीति तत्र लिखितम्। दिनाङ्कः-15-06-119[15]। मातृकाग्रन्थस्य आदौ आदर्शग्रन्थस्य स्वामी इलत्तूर् एच् अय्यास्वामिशास्त्री इति विलिखितमालोक्यते।

5) 'ङ' इति मातृका केरलेषु तिरुवनन्तपुरजनपदे प्रवर्तमानात् केरलविश्वविद्यालयस्य हस्तलिखितग्रन्थशालायाः उपलब्धः मलयाललिप्या विरचितः एको ग्रन्थो भवति। अस्य हस्तलेखसंख्या 285 भवति। तालपत्रानां संख्या तु त्रयस्त्रिंशत् एव।

6) 'च' इति मातृका मद्रास्-सर्वकारहस्तलिखितग्रन्थालयात् उपलब्धा एका कर्गजमातृका वर्तते। संस्कृतलिप्या विरचितायाः अस्याः हस्तलेखसंख्या R 2439 भवति। पुटसंख्या -55।

7) 'छ' इति मातृका केरलेषु तिरुवनन्तपुरजनपदे प्रवर्तमानात् केरलविश्वविद्यालयस्य हस्तलिखितग्रन्थालयात् उपलब्धः मलयाललिप्या विरचितः एको ग्रन्थो वर्तते। अस्य हस्तलेखसंख्या 897 भवति। तालपत्रानां संख्या त्रिनवतिः। अस्याः पुष्पिकायां मलयालभाषायां एवं दृश्यते यथा- ഈ ഗ്രന്ഥം കോടീരി മാധവന്നമ്പൂരി

---

15 28-02-1944

മകൻ നീലകണ്ഠൻ നമ്പൂരിക്ക് പഠിക്കാൻ വേണ്ടി കൊല്ലം 1061 എടവം 26 ഉച്ചതിരിഞ്ഞ് 5 അടിയാകുമ്പോൾ എഴുതിതീർത്തു മാധവനമ്പൂരി. मया चितासु मातृकासु इयमेव मातृका अत्यन्तं प्राचीना इति मे मतिः।

**मातृकायाः उपलभ्यमानः ग्रन्थकर्तृपरिचयः**

ग्रन्थकारोऽयं तमिल्नाडुदेशीयः आसीदिति मन्यते। केरलीयसाहित्यचरित्रादिषु चरित्रपुस्तकेषु ग्रन्थकारमेनमधिकृत्य परामर्शाभावात्, ग्रन्थान्ते दृश्यमाने श्लोके तमिल्नाडुदेशीयायां स्नेहपुर्यां स्थितः सन् ग्रन्थरचनामकरोदिति उक्तत्वाच्च यथा-

**शिवगिरिरमणश्रीपापनाशेशमौलि-**

**स्थिरतरलसदिन्दुक्षालिताध्याखिलाशे।**

**शिवतरघटनाश्रीताम्रयोर्मध्यदेशे**

**घटजमुनिनिवासेस्नेहपुर्यांस्थितः सन्।। इति**

तमिल्नाडुदेशे तिरुनेल्वेलीजनपदे कीला-अन्पूर् (kizha Ambur) नामकः पुरातनो ग्रामोऽस्ति। तस्य ग्रामस्य पौराणिकं नाम स्नेहपुरी इति भवति। तमिल्-भाषायाम् अन्पूर् इति। अन्प् नाम स्नेहः, ऊर् नाम पुरिः। अधुना कीला-अन्पूर् इति प्रथते। अयं ग्रामः ताम्रपर्णी-घटनानद्योः मध्ये विराजमानो भवति। विषयोयमेव

शिवतरघटनाश्रीताम्रयोर्मध्यदेशे इति ग्रन्थस्थे श्लोके कथितः। सम्पादितासु मातृकासु घ नाम मातृकायाः आदर्शस्वामिनः नाम इलत्तूर् अय्याशास्त्री इति भवति। तेङ्काशीजनपदे इलत्तूर् नामको कश्चन ग्रामोऽस्ति। अयं हरिहरो नाम विपश्चित् महान्शिवभक्तः आसीत् इति मङ्गलश्लोकात् एव ज्ञातुं शक्यते यथा-

**करोमि यत्नं खलु तर्कसङ्ग्रह-**

**व्याख्यानरूपं वृषकेतुमानसः।**

**प्राचीननव्योभयसिद्धयुक्तिकं**

**समाश्रितोभूतदयावशादहम् ॥**

अत्र श्लोके पूर्वार्धे द्वितीयपादे वृषकेतुमानसः इति स्वयं ग्रन्थकारो विशिष्यते। वृषः एव केतुः यस्य सः वृषकेतुः, सः मानसे यस्य सः वृषकेतुमानसः इति व्युत्पत्त्या सः परमो शिवभक्त इति द्रढीकरोति।

**अनुमानसिद्धः ग्रन्थकर्तृपरिचयः**

अत्र द्वयोः हरिहरशास्त्रिणोः विषयान् सयुक्तिकं प्रस्तौमि। अयं मार्गणीयो विषयो भवति यः कोऽयं ग्रन्थस्यामुकस्य कर्तृत्वेन प्रसिद्धः इति।

अद्वैतसिद्धेः पाठभेदनिर्णयात्मकमेकं मुद्रणं वि. साम्बशिवाचार्यस्य कुम्भकोणस्थायाः श्रीविद्यामुद्राक्षरशालायाः कृतं दृश्यते। तस्याः अद्वैतसिद्धेः संशोधकत्वेन कश्चन गोष्ठीपुरस्थो हरिहरशास्त्रीति प्रथते। सः तार्किकः,वैयाकरणः, वेदान्ती चासीदित्यपि प्रसिद्ध्यति यथा

**श्रीमच्छाब्दिकतार्किकवेदान्तरहस्ययुक्तिनिष्णातैः।**

**हरिहरसुधीभिरेषा दोषास्पष्टा सुशोधिता जयति।।**[16]

अतः तार्किकत्वेन हरिहरीयकर्तापि अयं हरिहरशास्त्री वा स्यादिति सन्दिहे। श्रीमन्नार्गुडिमहामहोपाध्यायत्यागराजमखिराजुशास्त्रिणः शिष्यः आसीदयमित्यपि प्रथते। मखिराजुशास्त्रिणः कालः 1815 -1903 इति ज्ञातुं शक्यते। अयं भरद्वाजगोत्रोत्पन्नः श्रीमतः अप्पय्यदीक्षितस्य परम्परायां जातश्च भवतीति विख्याति। अतः अस्य हरिहरशास्त्रिणः कालोऽपि गुरोरेव कालो भवतीति ऊहितुं शक्यते। 'छ' इति मातृका केरलेषु तिरुवनन्तपुरजनपदे प्रवर्तमानात् केरलविश्वविद्यालयस्य हस्तलिखितग्रन्थालयात् उपलब्धः मलयाललिप्या विरचितः एको ग्रन्थो भवति। अयमेव ग्रन्थः उपलब्धेषु मातृकासु पुरातनः। अस्याः मातृकायाः रचनाकालः 1885 भवतीति मातृकापुष्पिकायाः

16 अद्वैतसिद्धिः, भूमिकायाम्, मङ्गलश्लोकः, श्रीविद्यामुद्राक्षरशाला, कुम्भकोणम्, 1893 दिसम्बर्

ज्ञातुं शक्यते। अत्र उभयोरपि हरिहरशास्त्रिणः तुल्यकालत्वात् हरिहरीयकर्तापि अयं गोष्ठीपुरस्थो हरिहरशास्त्री वा स्यादिति सन्दिहे।

पालक्काड्जिल्लायां नूरणिदेशस्थस्य सुब्रह्मण्य-अनन्तकृष्णशास्त्रिणः आचार्यत्वेन कश्चन हरिहरशास्त्री प्रथते। सुब्रह्मण्य-अनन्तकृष्णशास्त्रिणः कालः 1886-1964 भवति। सः 1904 -1906 पर्यन्तं चिदम्बरपाठशालायां हरिहरशास्त्रीणः सविधे तर्कञ्च व्याकरणमधीतवान्। अयं हरिहरशास्त्री श्रीमुष्णदेशीयो भवति। हरिहरीयकर्ता अयं वा हरिहरशास्त्री भवितुमर्हति। यतोहि उपलब्धासु बह्व्यो मातृकाः पालक्काड्समीपस्थेभ्यः प्रदेशेभ्यः प्राप्ता भवन्ति।

इति प्रथमोƒध्यायः आमुखं समाप्तम्। अग्रिमे द्वितीयाध्याये हरिहरीयस्य मातृकासम्पादनं कर्तुं आरभते।

# द्वितीयोऽध्यायः

# हरिहरीयस्य समीक्षात्मकं सम्पादनम्

**आमुखम्**

द्वितीयाध्यायेऽस्मिन् मया हरिहरीयमिति विख्यातायाः तर्कसंग्रहव्याख्यायाः मातृकायाः सम्पादनं पाठभेदश्च क्रियते। अतः अध्यायस्यास्य हरिहरीयस्य समीक्षात्मकं सम्पादनम् इति नाम च दीयते।

**मङ्गलश्लोकः**

नमो नगेन्द्राधिपकन्यकाप-

स्फुरत्पदाम्भोजपरागभाजे[1]।

विघ्नाद्रिसंभेदनटङ्कराज

त्करामबुजायादिसुपूजिताय।।

---

1 नगेन्द्राधिपकन्यकापरिस्फुरत्पदाम्भोजपरागभाजे इति च,छ पुस्तकयोः

गुरोःपदद्वन्द्वविचिन्तनाप्त-

प्रसाददूरीकृतमोहजालः ।

विमत्सराणां विदुषां मुदर्थे

ह्यज्ञस्य[2] लोकस्य च बोधनाय ।।

करोमि यत्नं खलु तर्कसङ्ग्रह-

व्याख्यानरूपं वृषकेतुमानसः ।

प्राचीननव्योभयसिद्धयुक्तिकं

समाश्रितोभूतदयावशादहम्[3] ॥

प्रारीप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्तिकामनया शिष्टाचारानुमितश्रुतिबोधित-कर्तव्यताकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति। निधायेति ननु मङ्गलं न विघ्नध्वंस-समाप्तिसाधनं[4], विनापि मंगलं नास्तिकादिग्रन्थे तद्दर्शनात्तत्सद्भावेपि कादम्बर्यादौ तददर्शनादन्वयव्यतिरेकव्यभिचारादिति चेन्न। शिष्टाचारानुमितश्रुत्या मङ्गलस्य समाप्ति-

---

2 मुदर्थेप्यज्ञस्य इति क,ख,ग,ङ पुस्तकेषु

3 समाश्रितोद्धृतदयावशादहम् इति च,छ पुस्तकयोः

4 विघ्नध्वंससमाप्तिकारणं इति च पुस्तके

हेतुत्वोपगमात्। तथाहि मङ्गलं वेदबोधितकर्तव्यताकं अलौकिकाविगीतशिष्टाचारविषय-
त्वात् अग्निष्टोमादिवत्। रात्रिभोजनादौ व्यभिचारवारणायालौकिकेति।अलौकिकत्वन्तु लौकिकेतरत्वं न तु वेदप्रतिपाद्यत्वम्। सिद्धसाधनताप्रसक्तेः। व्युत्क्रमप्रयुक्तश्राद्धादौ व्यभिचारवारणायाविगीतेति। ज्ञानविषयस्वर्गादौ व्यभिचारवारणाय आचारेति। आचारः कृतिः। उद्देश्यतया अलौकिकाविगीतशिष्टकृतिमति स्वर्गादौ व्यभिचारवारणाय विषयेति। विषयत्वञ्च विधेयत्वम्। अतो नोक्तदोषतादवस्थ्यम्। अविगीतत्वञ्च धर्मशास्त्राद्य-
विरुद्धत्वम्। अत एव विशेषणान्न कुर्यान्निष्फलं कर्मेति शास्त्रनिषिद्धजलताडनादिव्युदासात् शिष्टपदं स्पष्टार्थम्। एवं मङ्गलस्य वेदविहितकर्तव्यत्वे सिद्धेƒत एव सफलत्वे च सति मङ्गलं समाप्तिफलकम् समाप्त्यन्याफलकत्वे सति सफलत्वात्। यन्नैवं तन्नैवं इत्यनुमानेन मङ्गलस्य समाप्तिसाधनत्वसिद्धिः[5]। मङ्गलस्य समबलविघ्ननाशकत्वेन कादम्बर्यादौ अधिकबलविघ्नसत्वात्समाप्त्यभावेƒपि अन्वयव्यभिचाराभावात् पापात्मकविघ्नस्य नास्तिकात्मनि भोगादिना विनाशसंभवात् स्वजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्यैव मंगलकार्यत्वावच्छेदकत्वात् कारणस्यापि कार्यतावच्छेदककोटौ प्रवेशाङ्गीकारस्य आवश्यकत्वात्। अन्यथा आलोकधूमपरामर्शयोः अन्यतरस्मिन्वहन्यनुमित्युदयेन

[5] समाप्तिकारणत्वसिद्धिः इति घ,च,छ पुस्तकेषु

अन्यतरपरामर्शव्यभिचारवारणार्थं तत्तत्परामर्शाव्यवहितोत्तरत्वस्य अनुमितौ निवेशा-ङ्गीकारस्यापि अनौचित्यप्रसंगात्। तथा च व्यतिरेकव्यभिचारस्यापि अभाव इति। निधाय ध्यात्वा विश्वस्य जगतः ईशं नियन्तारं बालानामनधीतन्यायानां तर्कसंग्रहः पदार्थसंक्षेपः। पदार्थान्विभजते। द्रव्येति। ननु दशमद्रव्यस्य तमसो विद्यमानत्वात्कथं नवैवेति। तथाहि नीलं तमश्चलतीत्यबाधितप्रतीतिबलेन तमसो नीलरूपचलनक्रियाश्रयत्वेन द्रव्यत्वे सिद्धे गन्धशून्यत्वात्स्पर्शराहित्यान्नीलरूपवत्त्वाच्च तस्य पृथिव्यां जलतेजसोर्वायौ गगनादौ[6] चान्तर्भावासंभवात्। क्लृप्तद्रव्येभ्योƒतिरिक्तत्वमिति चेन्न। प्रौढप्रकाशकतेजोƒभावत्वेनै-वोपपत्तौ अतिरिक्तत्वाकल्पनात्। न च तेजस एव तमोƒभावत्वमास्तामिति वाच्यम्। तथा सति तदीयसर्वानुभूतोष्णस्पर्शाश्रयतया द्रव्यान्तरकल्पनापातात्। इत्थञ्च तेजसस्ता-दृशस्पर्शाश्रयतया द्रव्यत्वावश्यकत्वे तमसि रूपक्रियाप्रतीतेः भ्रान्तिसामग्री दीपापसरणक्रियारूपोपाधिश्च नियामकाविति न किञ्चिदेतत्। पृथिवीन्निरूपयति। गन्धवतीति। गन्धवत्त्वं पृथिव्या लक्षणमित्यर्थः। कालिकसंबन्धेन गन्धवति काले अतिव्याप्तिवारणाय समवायेन तद्वत्त्वं वाच्यम्[7]। तथा च कालस्य जगदा-धारतानियामकीभूतकालिकसंबन्धेनैव गन्धवत्त्वान्नातिव्याप्तिः। ननु उत्पन्नद्वितीयक्षणे

---

6 पृथिवीजलतेजोवायुषुगगनादौ इति च,छ पुस्तकयोः

7 बोध्यम् इति च,छ पुस्तकयोः

नष्टपृथिव्यामव्याप्तिः तत्र गन्धाभावात्। उत्पन्नं द्रव्यं क्षणं निर्गुणन्तिष्ठती[8]ति सिद्धान्तात्। अतस्तद्वारणाय गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वमिति लक्षणार्थो बोध्यः। गन्धसमानाधिकरणत्वं दव्यत्वव्याप्यत्वञ्च जातौ विशेषणम्। गन्धसमानाधिकरणत्वं समवायेन गन्धाधिकरणे समवायेन वृत्तित्वम्। तेन कालिकसंबन्धेन गन्धाधिकरणजल-वृत्तिद्रव्यत्वव्याप्यजलत्ववति जले नातिव्याप्तिः। न वा समवायेन तदधिकरणपृथिव्यां कालिकेन वृत्तिमत्तादृशजलत्ववति जलेऽतिव्याप्तिः। अत्र द्रव्यत्वव्याप्यत्वञ्च द्रव्यत्व-न्यूनवृत्तित्वं न तु तदभाववदवृत्तित्वं तथा सति स्वाभाववदवृत्तित्वरूपव्याप्यत्वस्य स्वस्मिन्नपि सत्वेन गन्धसमानाधिकरणद्रव्यत्वव्याप्यद्रव्यत्ववतिजलादौ अतिव्याप्त्यापत्तेः। गन्धसमानाधिकरणद्रवत्वन्यूनवृत्तिधर्मं जलपृथिव्यन्यतरत्वमादाय जलेऽतिव्याप्तिवारणाय जातीति। तद्वत्त्वमपि समवायेन बोध्यम्। तेन कालिकेन तथाविधजातिमति काले नातिव्याप्तिः। एवञ्चायं निष्कर्षः। समवायसंबन्धावच्छिन्नगन्धाधिकरणतानिरूपित-समवायसंबन्धावच्छिन्नाधेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति। जलं निरूपयति। शीतेति। अत्रापि समवायसंबन्धावच्छिन्नशीतस्पर्शा-धिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवाय

[8] अगुणि इति ख,ग,ङ पुस्तकेषु। अगुणं इति क,घ पुस्तकयोः।

संबन्धावच्छिन्नाधिकरणत्वमिति निष्कर्षो ज्ञेयः। पदकृत्यं पूर्ववत्। तेजो निरूपयति। उष्णेति। अत्रापि निष्कर्षादिकं पूर्ववज्ज्ञेयम्। आकरजं सुवर्णादीति। ननु सुवर्णं न तैजसं उष्णस्पर्शवत्त्वाभावात् इति चेन्न सुवर्णं तैजसं असति प्रतिबन्धके अत्यन्तानलसंयोगेपि अनुच्छिद्यमानद्रवत्वात्[9]। यन्नैवं तन्नैवं यथा जलमिति। जलमध्यस्थघृतादौ अत्यन्ता-नलसंयोगे अनुच्छिद्यमानद्रवत्वादसतिप्रतिबन्धक इति। जलादावसति प्रतिबन्धके अनुच्छिद्यमानद्रवत्वात्तद्वारणायात्यन्तानलसंयोगेति। इत्थञ्च तस्य तैजसत्वसिद्धौ तदीयस्पर्शरूपयोः पार्थिवस्पर्शरूपाभ्यां अभिभवेनाननुभवः। एवञ्चन्द्रादावपि जलीय-स्पर्शाद्यभिभवात् औष्ण्याद्यननुभवेऽपि न लक्षणाव्याप्तिरिति ध्येयम्। वायुन्निरूपयति। रूपरहितेति अत्रापि समवायसंबन्धावच्छिन्नरूपरहितत्वविशिष्टस्पर्शाधिकरणतानिरूपित-समवायसंबन्धावच्छिन्नाधेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वं इति निष्कर्षः। पदकृत्यन्तु पूर्ववज्ज्ञेयम्। अत्र रूपरहितत्ववैशिष्ट्यञ्च स्वरूप-संबन्धेन रूपाभाववति[10] समवायसंबन्धेन वृत्तित्वम्। तेन कालिकादिसंबन्धेन रूपा-त्यन्ताभाववति पृथिव्यादौ नातिव्याप्तिः। न वा स्वरूपसंबन्धेन रूपात्यन्ताभावा-

---

9 अनुच्छिद्यमानद्रवत्वाधिकरणत्वात् इति छ पुस्तके

10 रूपात्यन्ताभाववति इति च,छ,घ पुस्तकेषु

धिकरणवाय्वादौ कालिकादिनावृत्तिमज्जलादिस्पर्शवति जलादावतिव्याप्तिः[11]। पृथिव्यादेः स्वरूपसंबन्धेनापि रूपप्रागभावादिमत्त्वात्तत्र अतिव्याप्तिवारणायात्यन्तेति। न च उत्पत्तिकालावच्छेदेन पृथिव्यादौ रूपात्यन्ताभावस्यापि सत्वात्तत्रातिव्याप्तिर्दुर्वारैवेति वाच्यम्। प्रतियोगिव्यधिकरणत्वेनाभावस्य विशेषणीयत्वात्। इत्थं च स्वरूपसंबन्धा-वच्छिन्नप्रतियोगिव्यधिकरणरूपात्यन्ताभावाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकस्पर्शनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति[12] पर्यवसि-तोऽर्थः। उपाधिभेदादिति। हृदि प्राणो गुदेऽपान इत्यत्र उक्तस्थानानि उन्नयनाधोनयनादयो व्यापाराश्च उपाधयो ज्ञेयाः। आकाशं लक्षयति शब्दगुणकमिति। अत्र शब्दवत्त्वमात्रेण निर्वाहे गुणपदं व्यर्थं सत्किञ्चिदर्थं ज्ञापयतीति न्यायेन समवायेन शब्दवत्त्वलाभाय। कालस्य लक्षणमाह। अतीतेति। अतीतादिव्यवहारासाधारण-निमित्तकारणत्वमित्यर्थः। तेन साधारणकारणे ईश्वरादृष्टादौ शब्दस्वरूपव्यवहारासाधारण-

---

11 कालिकादिनावृत्तिमज्जलादिस्पर्शमादायातिव्याप्तिःइति छ पुस्तके

12 स्वरूपसंबन्धावच्छिन्नप्रतियोगिव्यधिकरणरूपात्यन्ताभावाधिकरणतानिरूपितसमवाय-संबन्धावच्छिन्नाधेयताकसमवायसंबन्धावच्छिन्नस्पर्शाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति इति क,ख,ग,ङ,छ पुस्तकेषु

समवायिकारणे आकाशे च नातिव्याप्तिः। खण्डकालेƒतिव्याप्तिवारणायादिपदम्। तेन भविष्यद्वर्तमानयोरपि संग्रहः। दिशो लक्षणमाह। प्राचीति। प्राच्यादिव्यवहारासाधारण-निमित्तकारणमित्यर्थः। पदकृत्यं पूर्ववत्। दिगुपाधावतिव्याप्तिवारणायादिपदम्। आत्मानं निरूपयति। ज्ञानेति। समवायेन ज्ञानवत्त्वमित्यर्थः। विभजते स द्विविध इति। ईश्वरः सर्वनियन्ता सर्वज्ञः सर्वज्ञानी एक एवेति। उपासकानुजिघृक्षया विष्णुविरिञ्चाद्यनेक-स्वरूपेणावस्थितावपि तस्यैक्यमेवेति भावः। जीवः प्रतिशरीरं भिन्न इति। सर्वशरीर-वृत्येकजीवांगीकारे सुखदुखाद्यभेदप्रसंगादिति भावः। विभुरिति। अणुत्वे सर्वशरीर-व्यापिसुखाद्यनुपलब्धिप्रसङ्गादिति। मध्यमपरिमाणत्वे नाशप्रसंगेन कृतहानाकृताभ्यागम-प्रसंगात् महत्वमिति भावः। अत एव नित्यत्वमपि तस्येत्याह। नित्येति। मनो लक्षयति। सुखादीति। सुखसाक्षात्कारकारणत्वे सति इन्द्रियत्वम्मनसो लक्षणमित्यर्थः। एवं दुःखसाक्षात्कारकारणत्वे सति इन्द्रियत्वमित्यपि लक्षणानि ज्ञेयानि। अत एव सुखादी-त्यादिपदमुपात्तम्। अत्रेन्द्रियत्वं शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारण-मनःसंयोगाश्रयत्वम्। श्रोत्रेƒव्याप्तिवारणय शब्देतरेति। चक्षुरादौ तद्वारणायोद्भूतेति। चक्षुरादावेव शब्देतरसंयोगादिगुणाश्रयेƒव्याप्तिवारणाय विशेषेति। आत्मन्यतिव्याप्ति-वारणाय विशिष्टपूर्वदलम्। कालादावतिव्याप्तिवारणाय ज्ञानकारणेति। कालादौ रूपाभावप्रत्यक्षकारणीभूतचक्षुःसंयुक्तविशेषणतात्मकसंनिकर्षघटकसंयोगाश्रये तत्राति-

व्याप्तिवारणाय मन इति। वस्तुतः सुखादिसाक्षात्कारासाधारणकारणत्वे सति विशेषगुणानाश्रयत्वम्मनसो लक्षणम्। अतो लक्षणघटकेन्द्रियत्वस्यापि मनोघटितत्वेन नानवस्थादिदोषप्रसंग:[13]। कार्यमात्रे साधारणकारणकालादौ अतिव्याप्तिवारणाय असाधारणेति। आत्मन्यतिव्याप्तिवारणाय द्वितीयदलम्। नन्वेवमपि सुखादावतिव्याप्तिः। तत्साक्षात्कारे तस्यापि कारणत्वात्। विशेषगुणानाश्रयत्वाच्चेति चेन्न। सुखादिसाक्षात्कारनिरूपिततादात्म्यसम्बन्धानवच्छिन्नकारणत्वस्य विवक्षितत्वात्। विषयतासंबन्धेन ज्ञानं प्रति विषयस्य सुखादेस्तादात्म्यसंबन्धेनैव कारणत्वात्। तत्संबन्धानवच्छिन्नकारणत्वस्य तत्राभावात्। न च समवायेन सुखादिसाक्षात्कारं प्रति आत्मनोपि तादात्म्यसंबन्धेनैव कारणत्वात्तदनवच्छिन्नकारणत्वस्य तत्राभावेन आत्मन्यतिव्याप्तिविरहात् द्वितीयदलं व्यर्थमिति वाच्यम्। इष्टापत्तेः। न चैवमपि मनस्संयोगेऽतिव्याप्तिः। तस्य सुखादिसाक्षात्कारे समवायसंबन्धेन कारणत्वादिति वाच्यम्। द्रव्यत्वे सतीति विशेषणात्। रूपस्य लक्षणमाह। चक्षुरिति। चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वमित्यर्थः। संख्यादावतिव्याप्तिवारणाय मात्रपदम्। न च प्रभाभित्तिसंयोगे चक्षुर्मात्रग्राह्यगुणत्वसत्वात् तत्रातिव्याप्तिवारणाय गुणपदस्य विशेषगुणपरत्वावश्यकत्वात्तत एव संख्यादावपि

[13] अनवस्थादिदोषप्रसंग:क,ख,ग,ङ.,च,छ पुस्तकेषु

सामान्यगुणेƒतिव्याप्तिविरहान्मात्रपदं व्यर्थमिति वाच्यम्। सांसिद्धिकद्रवत्वेƒतिव्याप्ति-वारकत्वात् तत्रापि चक्षुर्ग्राह्यविशेषगुणत्वसत्वात् चक्षुर्मात्रग्राह्यत्वञ्च चक्षुरितरेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वम्। चक्षुरितरेन्द्रियाग्राह्यत्वमात्रं न सम्यक्[14] अतीन्द्रियधर्मादि-विशेषगुणे[15]ƒतिव्याप्त्यापत्तेः। ग्राह्यत्वं च अत्र लौकिकप्रत्यक्षस्वरूपयोग्यत्वम्। तेन धर्मवानयमिति अलौकिकचाक्षुषविषये धर्मादौ नातिव्याप्तिः। न वा चक्षुरिन्द्रियजन्य-लौकिकप्रत्यक्षाविषयपरमाणुरूपेƒव्याप्तिः। एवमग्राह्यत्वमपि लौकिकप्रत्यक्षस्वरूपयोग्य-त्वाभाववत्वम्। तेन रूपी घट इति त्वाचालौकिकप्रत्यक्षविषयत्वे रूपस्य नाƒव्याप्तिः। न वा त्वाचलौकिकविषयपृष्ठपातित्वेन तद्विषयत्वेƒपि रूपस्याƒव्याप्तिः। रूपस्य त्वाच-लौकिकप्रत्यक्षे[16] सुरभिचन्दनमिति चाक्षुषे सुरभिभानवत्भानसंभवेपि तत्स्वरूप-योग्यत्वाभावात्। इत्थञ्च चक्षुरितरेन्द्रियजन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वाभावनिरूपित-स्वरूपसंबन्धावच्छिन्नाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकचक्षुर्जन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वविशिष्टविशेषगुणत्वनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति फलितोƒर्थः। रसं लक्षयति रसनग्राह्य इति। रसनेन्द्रियजन्यलौकिकप्रत्यक्षस्वरूप-

---

14 न चक्षुरितरेन्द्रियाग्राह्यत्वंसम्यक् इति च पुस्तके

15 अतीन्द्रियधर्मादिविशेषगुणे इति च पुस्तके

16 त्वाचालौकिकप्रत्यक्षे इति छ पुस्तके

योग्यत्वविशिष्टगुणत्वमित्यर्थः। तेन रसनेन्द्रियजन्यालौकिकप्रत्यक्षविषये गुणान्तरे नातिव्याप्तिः। न वा तज्जन्यलौकिकप्रत्यक्षाविषयपरमाणुरसेƒव्याप्तिः। गन्धं निरूपयति। घ्राणेति। घ्राणजन्यलौकिकसाक्षात्कारस्वरूपयोग्यत्वविशिष्टगुणत्वमित्यर्थः। पदकृत्यं पूर्ववत्। स्पर्शं निरूपयति। त्वगिन्द्रियेति। अत्रापि भर्जनकपालतद्गतवह्न्योः संयोगस्य त्वगिन्द्रियमात्रग्राह्यगुणत्वात्तद्वारणाय गुणपदं विशेषगुणपरं बोध्यम्। शेषं पूर्ववत्। रूपादिचतुष्टयं पृथिव्यां पाकजमिति। पाकश्च पूर्वरूपनाशको रूपान्तरारम्भको वा विजातीयतेजःसंयोगः। पीलुपाकवादिनां वैशेषिकाणां मते परमाणुष्वेव पाकात्पूर्वरूपनाशो रूपान्तरोत्पत्तिश्च। पिठरपाकवादिनां नैयायिकानां मते त्ववयव्यवयवेषु सर्वत्र पाकात्तन्नाशस्तदुत्पत्तिश्च एवं रसादित्रिकस्यापि भिन्नभिन्नपाकान्नाशश्चोत्पत्तिश्च। यथा तृणपुञ्जनिक्षिप्तेष्वाम्रफलादिषु[17] कस्मिंश्चिद्रूपमेव परावर्तते कस्मिंश्चिद्रस एव कस्मिंश्चिद्गन्ध एव कस्मिंश्चित्स्पर्श एवेति सर्वानुभवसिद्धम्। एवं पृथिवीमात्रे भिन्नभिन्नपाकाच्चतुष्टयोत्पत्तिः ज्ञेया। अन्यथा एकदैव सर्वेषामुत्पत्तिप्रसङ्ग इति ध्येयम्। अन्यत्रापाकजमिति। अन्यत्र जलादित्रिके अपाकजं रूपादिपरावृत्यदर्शनान्न हि शतधाध्मातेƒपि जले रूपपरावृत्तिर्भवति। जलपरमाणुगतरूपरसस्पर्शानां तेजःपरमाणु-

---

17 तृणपुञ्जनिक्षिप्तेष्वाम्रशलादुषु इति च पुस्तके

गतरूपस्पर्शयोः वायुपरमाणुगतस्पर्शस्य च नित्यत्वन्तदन्यत्र समस्तानान्तेषां अनित्यत्वमित्यभिप्रेत्याह नित्यमनित्यञ्चेति। संख्यां लक्षयति। एकत्वादिव्यवहारेति एकत्वादिव्यवहारासाधारणनिमित्तकारणत्वमित्यर्थः। द्वित्वादिकन्तु सर्वत्रानित्यमेवेति। द्वित्वादेरपेक्षाबुद्ध्युदयनाशाभ्युपगमादिति भावः। परिमाणं निरूपयति। मानेति। मानव्यवहारासाधारणनिमित्तकारणत्वनिरूपितसर्वाधारतानियामकीभूतसंबन्धान्यसंबन्धावच्छिन्नाधिकरणत्वमित्यर्थः। अतो न काले कालिकसंबन्धेन तद्वत्त्वमादायातिव्याप्तिः। पृथक्त्वं निरूपयति। पृथगिति। संयोगं निरूपयति। संयुक्तेति। विभागं निरूपयति। संयोगनाशक इति। संयोगनाशकत्वविशिष्टगुणत्वमित्यर्थः। संयोगनाशकत्वं[18] पूर्वसंयोगनाशके कर्मण्यतिव्याप्तं अतो विशेष्यदलम्। संयोगनाशकत्वञ्च संयोगनाशजनकत्वं तत्संयोगस्याप्यस्त्यतो तादात्म्यसंबन्धानवच्छिन्नसंयोगनाशकारणत्वविशिष्टगुणत्वं तदर्थो बोध्यः। परत्वापरत्वयोर्लक्षणमाह। परापरेति। परव्यवहारासाधारणनिमित्तकारणं परत्वं अपरव्यवहारासाधारणनिमित्तकारणमपरत्वमित्यर्थः। गुरुत्वं लक्षयति। आद्यपतनेति। द्वितीयादिपतने वेगस्याप्यसमवायिकारणत्वादाद्येति। आद्यपतनकारणत्वस्य द्रव्येऽपिसत्वादसमवायीति। द्रवत्वं लक्षयति। आद्यस्यन्दनेति। स्नेहं लक्षयति चूर्णादीति।

[18] संयोगनाशकत्वविशिष्टगुणवत्त्वमित्यर्थः इति ख,ङ पुस्तकयोः

चूर्णादिपिण्डीभावहेतौ कालेऽतिव्याप्तिवारणाय गुणपदम्। विशिष्टलक्षणस्य धर्माधर्म-स्वरूपे अदृष्टेऽतिव्याप्तत्वाद्धेतुपदस्यासाधारणहेत्वर्थकत्वं बोध्यम्[19]। अदृष्टस्य च कार्यमात्रे साधारणकारणत्वान्न तत्रातिव्याप्तिः। न च द्रवत्वस्यैव चूर्णादिपिण्डीभाव-हेतुत्वमस्त्विति वाच्यम्। सुवर्णादिगतद्रवत्वादौ तददर्शनात्। न च संसिद्धिकद्रवत्वस्यैव स्नेहकार्यकारित्वसम्भवात्स्नेहांगीकारो निरर्थक इति वाच्यम्। सांसिद्धिकद्रवत्वाभाव-वद्धृतयोगे पिण्डीभावाभावप्रसंगात्। न च घृतादौ जलमात्रवृत्तिस्नेहस्याभावात् दूषणसाम्यमिति वाच्यम्। घृतादौ जलांशसत्वात्तस्य च प्रकृष्टस्नेहवत्त्वेन दाहानुकूलत्वात् न चातितप्तघृतादियोगे तन्नस्यात्। तत्र जलांशासंभवादिति वाच्यम्। द्रव्यस्वाभाव्याद्यावत् घृतनाशः तत्र जलांशसत्वाभ्युपगमात्हिमकरकादिनिष्ठसांसिद्धिकद्रवत्वस्नेहयोः अदृष्ट-विशेषेण प्रतिरोधात्। घृताद्यन्तर्गतजलांशे प्रतिबन्धकवशात्। सांसिद्धिकद्रवत्वस्या-दर्शनादित्यादिकं सूक्ष्मदृशा अनुसंन्धेयम्। शब्दं निरूपयति। श्रोत्रेति। बुद्धिं निरूपयति। सर्वव्यवहारेति। सर्वव्यवहारासाधारणनिमित्तकारणत्वमित्यर्थः[20]। तेन कालाकाशादौ नातिव्याप्तिः। बुद्धिरेव ज्ञानमिति व्यवह्रियत इत्यर्थः। विभजते तद्द्विविधमिति। स्मृते-र्लक्षणमाह। संस्कारेति। संस्कारजन्यत्वविशिष्टज्ञानत्वमित्यर्थः संस्कारध्वंसवारणाय

---

[19] अदृष्टेऽतिव्याप्तत्वाद्धेतुपदस्यासाधारणहेतुत्वार्थकत्वं इति घ,च,छ पुस्तकेषु

[20] सर्वव्यवहारासाधारणनिमित्तकारणमित्यर्थः इति क,ग पुस्तकयोः

विशेष्यदलम्। अनुभववारणाय विशेषणम्। संस्कारविषयकानुभवे संस्कारजन्यत्व-विशिष्टज्ञानत्वसत्वात्तद्वारणाय तादात्म्यसंबन्धानवच्छिन्नसंस्कारनिष्ठकारणतानिरूपित-कार्यत्वं पूर्वदलेन विवक्षणीयं स्वविषयकज्ञाने संस्कारस्य तादात्म्यसंबन्धेन कारण-त्वान्न तत्रातिव्याप्तिः। न च पूर्वानुभवसंस्कारजन्ये सोƒयं देवदत्त इत्याकारकप्रत्यभिज्ञाने अतिव्याप्तिरिति वाच्यम्। तत्र स्मरणस्यैव हेतुत्वेन संस्कारस्यापि हेतुत्वाकल्पनात्। अनुभवं लक्षयति तद्भिन्नमिति। स्मृतिभिन्नत्वे सति ज्ञानत्वमित्यर्थः। संस्कारनिष्ठतादात्म्य-संबन्धानवच्छिन्नजनकत्वनिरूपितजन्यत्वाभाववत्त्वे सति ज्ञानत्वमिति पर्यवसितोƒर्थः। विभजते। स द्विविधेति। यथार्थानुभवलक्षणमाह। तद्वतीति। तद्वद्विशेष्यता निरूपित-तत्प्रकारताशाल्यनुभवत्वमित्यर्थः। तेन रङ्गरजतयोरिमे रजतरङ्गे इत्याकारकसमूहा-लम्बनभ्रमस्य वस्तुतो रजतत्ववन्निष्ठविशेष्यताकत्वरजतत्वप्रकारताकत्वयोस्तथा रंगत्व-वद्विशेष्यकत्वरंगत्वप्रकारकत्वयोश्च सत्त्वेƒपि न क्षतिः। तादृशभ्रमे रजतत्वेन रंगस्य रंगत्वेन रजतस्य चावगाहनात् रजतत्वप्रकारतायाः रंगत्ववद्रंगविशेष्यत्वनिरूपितत्वेन रंगत्वप्रकारतायाश्च रजतत्ववद्रजतविशेष्यतानिरूपितत्वेन तादृशभ्रमनिष्ठरजतत्वरंगत्व-प्रकारतयोः रजतत्ववद्रजतविशेष्यत्वरंगत्ववद्रंगविशेष्यत्वनिरूपितत्वाभावेन नातिव्याप्तिः। न च घटाभाववति घटत्वे घटप्रकारिकायां घटे घटत्वं इत्याकारकप्रमायां अव्याप्तिः इति वाच्यम्। तत्संबन्धवद्विशेष्यतानिरूपिततत्संबन्धप्रकारताशालित्वस्य विवक्षितत्वात्घट-

त्वेƒपि घटसंबन्धसत्वान्न तादृशप्रमायामव्याप्तिः। न चाग्रे वृक्षः कपिसंयोगाभाववानिति भ्रमेƒतिव्याप्तिः। भ्रमस्य मूलावच्छेदेन कपिसंयोगाभाववद्वृक्षविशेष्यतानिरूपित-तत्संबन्धप्रकारताकत्वादिति वाच्यम्। तादृशस्थले तदवच्छेदकावच्छेदेन तत्प्रकारकत्व-स्यैव प्रमालक्षणघटकत्वात्। तादृशभ्रमस्य कपिसंयोगाभावावच्छेदकमूलावच्छेदेन कपिसंयोगाभावप्रकारकत्वानवगाहनात् नातिव्याप्तिः। न चैवमपि भूतलं घटाभाववदिति भ्रमज्ञानेƒतिव्याप्तिः तस्य भूतलत्ववति भूतलत्वप्रकारकत्वादिति वाच्यम्। सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायेन तत्र तदंशे प्रमात्वस्याप्यावश्यकत्वात्। अयथार्थानुभवं निरूपयति। तदभाववतीति। शुक्ताविदं रजतमिति ज्ञानस्य रजतत्वा-भाववच्छुक्तिनिष्ठविशेष्यतानिरूपितरजतत्वप्रकारताकत्वाल्लक्षणसङ्गतिः[21]। यथार्थानुभवं विभजते। यथार्थेति। प्रसङ्गात्तत्करणस्यापि चातुर्विध्यं दर्शयति[22]। तत्करणमपीति। प्रमाकरणमपीत्यर्थः। प्रमाकरणत्वं प्रमाणसामान्यलक्षणं बोध्यम्। ननु प्रमाकरणं प्रमाणमित्यत्र प्रमाकरणत्वस्यैव लक्ष्यतावच्छेदकत्वे लक्षणलक्ष्यतावच्छेदकयोरैक्येन सिद्धसाधनताप्रसक्तिरिति चेत् न। प्रमाणपदवाच्यत्वस्य लक्ष्यतावच्छेदकत्वात्। एवमेव प्रत्यक्षकरणं प्रत्यक्षं इत्यादावपि द्रष्टव्यम्। करणलक्षणमाह। असाधारणेति। कालादा-

[21] रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपितरजतत्वप्रकारकत्वाल्लक्षणसङ्गतिः इति छ पुस्तके

[22] प्रकाशयति इति छ पुस्तके

वतिव्याप्तिवारणायासाधारणेति। घटादिकारणकपालसंयोगादेरप्येतल्लक्षणवत्त्वात् व्यापारवत्त्वे सतीति पूरणीयम्। कारणं लक्षयति कार्येति। कार्यनियतत्वञ्च कार्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम्। तत्कार्येऽप्यस्तीत्यतः पूर्ववृत्ति इति। कार्यपूर्ववृत्तित्वं कदाचिद्रासभादावप्यस्तीत्यतो नियतेति। न च कार्यनियतपूर्ववृत्तिदण्डत्वदण्डरूपादेर्वारणायानन्यथासिद्धत्वस्य लक्षणे निवेशनीयत्वात्। तत एवान्यथासिद्धरासभादेरपि वारणसंभवे नियतपदं निरर्थकमिति वाच्यम् अन्यथासिद्धत्वस्याननुगमेनानन्यथासिद्धेत्यनेन तत्तदन्यथासिद्धप्रतियोगिकानन्तभेदानां निवेशनीयत्वात्। नियतपदेन केषाञ्चिदन्यथासिद्धानां वारणे तदितरेषां केषाञ्चिदेवान्यथासिद्धानां भेदाः निवेशनीयाः इति लाघवमभिप्रेत्य नियतत्वोपादानमिति। कार्यलक्षणमाह कार्यमिति। कारणं विभजते। कारणमिति। तत्राद्यं लक्षयति यत्समवेतमिति। समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्वमित्यर्थः। समवायसंबन्धेन घटं प्रति कपालस्य तादात्म्यसंबन्धेनैव कारणत्वात्तत्र लक्षणसंगतिः। समवायसम्बन्धावच्छिन्नकार्यत्वनिवेशात्प्रतियोगितासंबन्धेन स्वध्वंसं प्रति तादात्म्यसंबन्धेन निमित्तकारणे घटादौ नातिव्याप्तिः। तादात्म्यसंबन्धावच्छिन्नकारणत्वनिवेशात्समवायेन घटादिकं प्रति समवायसंबन्धेन कारणकपालसंयोगादौ नातिव्याप्तिः। असमवायिकारणं लक्षयति। कार्येणेति। कार्येण सहैकस्मिन्निति कारणेन सहैकस्मिन्निति पृथक्लक्षणद्वयं

बोध्यम्। पृथक्दृष्टान्तद्वयानुरोधात्। इत्थमत्र लक्षणद्वयानुगमः। समवायसंबन्धावच्छिन्न-कार्यतानिरूपितसमवायस्वसमवायिसमवेतत्वान्यतरसंबन्धावच्छिन्नकारणत्वमिति। निमि-त्तकारणं लक्षयति। तदुभयभिन्नमिति। समवाय्यसमवायिभिन्नत्वविशिष्टकारणत्व-मित्यर्थः। न च तुरीवेमादेः स्वगतरूपदिसमवायिकारणत्वात्समवायिकारणभिन्नत्वं दुर्घटमिति वाच्यम्। समवायिकारणत्वभिन्नमसमवायिकारणत्वभिन्नं च यत्कारणत्वं तद्वत्वे तात्पर्यकल्पनात् तथा च तुरीवेमादेः समवायित्वेऽपि तद्भिन्नकारणताकत्वस्यापि संभवादिति। करणलक्षणमुपसंहरति। तदेतदिति। प्रत्यक्षप्रमाणलक्षणमाह। प्रत्यक्षेति। प्रत्यक्षप्रमां लक्षयति इन्द्रियेति। इदं लक्षणं जन्यज्ञानस्यैव लक्ष्यत्वाभिप्रायेण ईश्वर प्रत्यक्षस्यापि लक्ष्यत्वे ज्ञानाकरणकत्वे सति ज्ञानत्वं प्रत्यक्षलक्षणं बोध्यम्। अनुमित्यादेश्च व्याप्तिज्ञानादिज्ञानकरणत्वान्न[23] तत्रातिव्याप्तिः। ज्ञानाकरणके घटादावतिव्याप्तिवारणाय विशेष्यदलम्। प्रत्यक्षं विभजते। तद्द्विविधमिति। निर्विकल्पकलक्षणमाह। निष्प्रकारकमिति। विशेषणविशेष्ययोर्वैशिष्ट्यानवगाहिघटघटत्वे इत्याकारकं ज्ञानं निर्विकल्पकमित्यर्थः। घट इति विशिष्टज्ञानात्पूर्वं विशेषणी-

---

[23] व्याप्तिज्ञानादिकरणत्वान्न इति च पुस्तके।
ज्ञानकरणकत्वान्न इति च पुस्तके।
व्याप्तिज्ञानकारणकत्वान्न इति च पुस्तके।

भूतघटत्वज्ञानेन भाव्यं विशिष्टज्ञाने विशेषणज्ञानस्य हेतुत्वात्। अतो निर्विकल्पात्मकं विशेषणज्ञानं स्वीक्रियते। तस्यापि सविकल्पकत्वे तत्रापि विशेषणज्ञानान्तरं तत्राप्यन्यत्तत्राप्यन्यदिति मूलक्षतिकार्यनवस्थाप्रसंगादिति। सविकल्पकं लक्षयति सप्रकारकमिति। विशेषणविशेष्यवैशिष्ट्यावगाहिज्ञानमित्यर्थः। उदाहरति। यथेति। इन्द्रियार्थसन्निकर्षं विभज्य दर्शयति प्रत्यक्षेति। चक्षुषेति। चक्षुर्ग्रहणं त्वङ्मनसोरपि द्रव्यग्राहकयोरुपलक्षणार्थम्। तथा च इत्थमत्र कार्यकारणभावः। द्रव्यवृत्तिलौकिक-विषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुसंयोगस्य त्वाचप्रत्यक्षत्वावच्छिन्नं प्रति त्वक्संयोगस्य मानसप्रत्यक्षत्वावच्छिन्नं प्रति मनःसंयोगस्य च क्रमेण हेतुतैवं द्रव्यसमवेतरूपरसगन्धस्पर्शसुखादिवृत्तिलौकिकविषयतासंबन्धेन तत्तदिन्द्रियजन्यप्रत्यक्ष-त्वावच्छिन्नं प्रति तत्तदिन्द्रियसंयुक्तसमवायस्य हेतुता। द्रव्यसमवेतसमवेतरूपत्व-रसत्वादिवृत्तिताद्दशसंबन्धेन तत्तदिन्द्रियजन्यप्रत्यक्षत्वावच्छिन्नं प्रति तत्तदिन्द्रियसंयुक्त-समवेतसमवायस्य हेतुता। अत्र इन्द्रियार्थसन्निकर्षेण एकस्मिन्घटे ज्ञाते तदुत्तरक्षणं घटा इत्येवं निखिलघटविषयकं अलौकिकसन्निकर्षेण चाक्षुषमेव प्रत्यक्षं भवति। तत्र सन्निकृष्टघटेतरघटेष्वपि विषयतासंबन्धेन चाक्षुषस्य सत्वात्तत्र च चक्षुसंयोगस्या-भावाद्व्यभिचारः। तद्वारणाय विषयतायां लौकिकत्वनिवेशः। एतत्प्रपञ्चस्त्वग्रे भविष्यति। विषयनिष्ठप्रत्यासत्या*f*यं कार्यकारणभावः। आत्मनिष्ठप्रत्यासत्याल्वेवम्। समवायसंबन्धेन

चाक्षुषलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति स्वाश्रयचक्षुसंयुक्तमनसंयोगाश्रयत्वसंबन्धेन चक्षुसंयोगस्य हेतुता। स्वपदं चक्षुसंयोगादिपरिचायकम्। निरुक्तसंबन्धेन द्रव्यसमवेतचाक्षुषलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति स्वव्यापारिचक्षुसंयुक्तमनःसंयोगाश्रयतासंबन्धेन चक्षुसंयुक्तसमवायस्येत्येवं कार्यकारणभावोवसेयः। ननु परमाणुनिष्ठरूपादावपि चक्षुसंयुक्तसमवायसत्त्वात्तत्प्रत्यक्षं कुतो न स्यात्। न च रूपादिप्रत्यक्षे स्वाश्रयमहत्वस्य रूपत्वादिप्रत्यक्षे स्वाश्रयाश्रयमहत्वस्य च कारणत्वात्परमाणुरूपादेः स्वाश्रयपरमाणौ महत्वाभावान्न तत्प्रत्यक्षमिति वाच्यम्। एवमपि तदीयरूपत्वादे:[24] परमाणुनिष्ठपृथिवीत्वादेश्च प्रत्यक्षं स्यात्घटरूपे परमाणुरूपे च रूपत्वजातेरेकत्वात्तदाश्रयाश्रये घटे महत्वसत्वात्पृथिवीत्वस्यापि परमाणुघटादावेकस्य[25] स्वाश्रयघटे महत्वसत्वादिति चेन्न। महत्वोद्भूतरूपावच्छिन्नचक्षुसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषे तथाविधसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे कारणत्वकल्पनात्। तथा च परमाणुचक्षुसंयोगस्य महत्वावच्छिन्नत्वाभावात्तत्र पृथिवीत्वादेः तत्समवेतरूपादौ रूपत्वादेश्च प्रत्यक्षापत्त्यसंभवात्। घ्राणादौ पृथिवीत्वस्य तदीयरूपादौ[26] रूपत्वादेश्च प्रत्यक्षवारणाय

---

24 एवमतीन्द्रियरूपत्वादे: इति च,छ पुस्तकयोः

25 परमाणुघटादावेकत्वात् इति क,ग पुस्तकयोः

26 तद्गतरूपादौ इति छ पुस्तके
पृथिवीत्वतदिन्द्रियरूपादौ इति क,ख,ग,घ,ङ पुस्तकेषु

उद्भूतरूपावच्छिन्नेति विशेषणम्। घ्राणादिनिष्ठचक्षुरादिसंयोगस्य उद्भूतरूपावच्छिन्नेति विशेषणम्। घ्राणादिनिष्ठचक्षुरादिसंयोगस्य उद्भूतरूपावच्छिन्नत्वाभावान्नातिप्रसंगः। एवमालोकसंयोगावच्छिन्नत्वमपि तत्र देयम्[27]। तेनोपरिदेशावच्छेदेनालोकसंयोगस्य अधोदेशे चक्षुसंयोगस्य च सत्वे घटादेर्न प्रत्यक्षापत्तिः। एवं महत्वोद्भूतस्पर्शावच्छिन्नत्वक्संयोगतत्संयुक्तसमवायतत्संयुक्तसमवेतसमवायानां त्वाचप्रत्यक्षे कारणत्वं बोध्यम्। तेन त्रसरेण्वादेर्न त्वाचप्रत्यक्षापत्तिः। तत्र उद्भूतस्पर्शाभावात्। एवं श्रोत्रसमवायस्य तत्समवेतसमवायस्य च शब्दप्रत्यक्षं शब्दत्वादिप्रत्यक्षं प्रति च कारणत्वं बोध्यम्। अत्र श्रोत्रस्याकाशत्वेन शब्दाश्रयत्वात् इन्द्रियत्वेन तद्ग्राहकत्वाच्च न संयोगस्य सन्निकर्षघटकतेति ध्येयम्। षष्ठं सन्निकर्षं दर्शयति। अभावप्रत्यक्षेति। द्रव्यवृत्यभावप्रत्यक्षे इन्द्रियसंयुक्तविशेषणतासन्निकर्षः। द्रव्यसमवेतवृत्यभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेषणताद्रव्यसमवेतसमवेतवृत्यभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता। घटाभाववद्भूतलमित्यादौ अभावस्य विशेषणता भूतले घटाभाव इत्यादौ तु विशेष्यता एवमभावस्य विशेषणविशेष्यभावसन्निकर्षेण ग्रहः। केचित्त्वभावप्रत्यक्षे योग्यानुपलब्धेः कारणत्वमभ्युपजग्मुः। तथाहि अनुपलब्धिर्नाम प्रतियोग्युपलम्भाभावः

---

[27] तत्रादेयम् इति च,छ पुस्तकेषु

घटाभावप्रतियोगिनो घटादेः उपलंभे सति घटाभावो न जायते। अतस्तदनुपलंभस्य घटाभावप्रत्यक्षे कारणत्वं तत्र योग्यत्वमपि देयम्। अन्यथा धर्माधर्मादिरनुपलंभात् अत्मादौ तदभावस्य स्तम्भादौ पिशाचानुपलम्भात्तदभावस्य च प्रत्यक्षप्रसंगात्। योग्यत्वं च प्रतियोगिसत्वप्रंजनप्रसंजितप्रतियोगिकत्वम्। तथा च धर्माद्यभावप्रतियोगिनो धर्मादेः सत्वप्रसंजनेन सत्वापादनेन धर्माद्युपलंभस्य च यद्यत्रात्मनि धर्मः स्यात्तर्हि उपलभ्येत। इत्यापादनासंभवात्। एवं स्तम्भादौ पिशाचसत्वापादनेन पिशाचोपलंभस्यापादना-संभवाच्च न तत्र अनुपलब्धेर्योग्यत्वम्। अत एवान्धकारे घटानुपलंभेऽपि न घटाभावचाक्षुषापत्तिः। यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादनासंभवेन अन्धकारे योग्यानुपलब्धेरभावात्। न च स्तंभादौ पिशाचादेरन्योन्याभावप्रत्यक्षं न स्यात्तत्र योग्यप्रतियोग्यनुपलंभाभावादिति वाच्यम्। अन्योन्याभावग्रहस्थले प्रतियोगितावच्छेद-कानुपलब्धेरेव कारणत्वात् स्तम्भादौ पिशाचत्वोपलंभस्य यद्यत्र पिशाचत्वं स्यात्तर्हि स्तंभत्ववत् उपलभ्येतेत्यापादनसंभवात्तत्र योग्यानुपलब्धिसत्वात्। एवञ्च अनुपलब्धेरेव सर्वत्राभावग्रहनिर्वाहे इन्द्रियस्याश्रयग्रहोपक्षीणस्य अभावप्रत्यक्षे कारणत्वाभावादिति तन्मतम्[28]। प्रत्यक्षे करणत्वेन क्लृप्तेन्द्रियेणैव अभावग्रहस्यापि सम्भवे अनुपलम्भस्य

[28] तन्मन्दम् इति क,ख,ग,ङ,च पुस्तकेषु

सहकारित्वमात्रेण अकारणत्वात्प्रमाणान्तरकल्पनागौरवात् अभावं साक्षात्करोमि इत्यनुव्यवसायविरोधाच्चेति। अलौकिकसन्निकर्षस्त्रिविधः ज्ञानलक्षणाप्रत्यासत्तिः सामान्यलक्षणाप्रत्यासत्तिः योगजधर्मश्चेति। ज्ञानलक्षणाप्रत्यासत्तिश्च ज्ञानस्वरूपाप्रत्यासत्तिः इत्यर्थः। अनया प्रत्यासत्या सुरभिचन्दनमिति ज्ञानमुत्पद्यते। यत्र चन्दनकाष्ठदर्शनमात्रेण सुरभिचन्दनमिति ज्ञानं जायते तत्र सुरभिगन्धस्य घ्राणेन्द्रियसन्निकर्षाभावाच्चक्षुषश्च गन्धग्रहणेƒयोग्यत्वात्तादृशज्ञाने कया विधया गन्धो भासताम्। अतस्तद्भानिर्वाहार्थं ज्ञानलक्षणाप्रत्यासत्तिस्वीकारः। न च सौरभत्वसामान्यलक्षणाप्रत्यासत्या तत्सौरभभाननिर्वाह[29] इति वाच्यम्। सामान्यलक्षणया सौरभभानेƒपि तत्र सौरभत्वभानार्थं ज्ञानलक्षणावश्यकत्वात्। एवं यत्र वह्नित्वेन गुञ्जापुञ्जविषयकं अयं वह्निरिति ज्ञानं अभूत् तत्र वह्निं जानामीत्यनुव्यवसाये गुञ्जापुञ्जस्य ज्ञानलक्षणयैव भानाभ्युपगमस्यावश्यकत्वात्। अन्यथा वह्नित्वस्य गुञ्जापुञ्जसामान्यत्वाभावेन तस्य तज्ज्ञानस्य वा गुञ्जापुञ्जप्रत्यासत्तित्वासंभवेन तद्भानानिर्वाह इति ध्येयम्। सामान्यलक्षणाप्रत्यासत्तिश्च सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थः। न च सामान्यलक्षणाज्ञानलक्षणयोरभेदप्रसक्तिः। उभयोरपि ज्ञानरूपत्वादिति वाच्यम्। ज्ञानलक्षणाप्रत्यासत्तिः यस्य ज्ञानं

[29] तत्रसौरभभाननिर्वाह इति घ,च,छ पुस्तकेषु

तस्यैव। सामान्यलक्षणा तु यस्य ज्ञानं तदाश्रयस्य प्रत्यासत्तिरित्येवं भेदात्। ननु सामान्यलक्षणाप्रत्यासत्तिस्वीकार: किन्निमित्त इति चेदुच्यते महानसीयधूमे भूयोदर्शनेन वह्निर्व्याप्तेर्गृहीतत्वेन पर्वतीयधूमे चागृहीतत्वेन यत्र यस्यानुभवः तत्रैव तद्विषयक-स्मरणमिति नियमात्। अन्यथाƒतिप्रसंगात्पर्वतीयधूमे वह्निव्याप्यत्वस्मरणं कथं भवेत्। अतः सन्निकृष्टमहानसधूमे वह्निव्याप्यत्वप्रत्यक्षानन्तरं पर्वतीयादिनिखिल-धूमानां धूमत्वसामान्यलक्षणाप्रत्यासत्योपस्थितौ सर्वष्वेव धूमेषु वह्निव्याप्यत्वानुभवः। ततश्च पर्वतीयधूमे तत्स्मरणोपपत्तिः। तदर्थं सामान्यलक्षणाप्रत्यासत्तिस्वीकार इति। योगजधर्मो योगाभ्यासजन्यादृष्टविशेषः तेन योगिनां सर्वज्ञानं इति प्रत्यक्षखण्डः। उपजीव्योपजीविभावसंगत्या[30] अनुमानं निरूपयति। अनुमितीति। अनुमानस्य व्याप्त्यादिप्रत्यक्षपूर्वकत्वात्प्रत्यक्षोपजीवित्वादनुमितिं निरूपयति। परामर्शेति। परामर्श-जन्यत्वविशिष्टज्ञानत्वमित्यर्थः। परामर्शध्वंसवारणाय ज्ञानत्वमिति। यद्यपि स्थाणुर्वा पुरुषो वेति संशयोत्तरं स्थाणुत्वव्याप्यवक्रकोटरादिमानिति पुरुषत्वव्याप्यकरचरणादि-मानिति वा परामर्शो जायमानेƒयं स्थाणुरेव पुरुष एवेति वा प्रत्यक्षेप्यनुमितिलक्षणमस्ति। तथापि परामर्शत्वेन परामर्शजन्यत्वस्य विवक्षणात्। तत्र तु परामर्शस्य तत्वेन

[30] उपजीव्योपजीवकभावसंगत्या इति च,छ पुस्तकयोः

हेतुत्वाभावात्किंतु विशेषदर्शनत्वेनैव हेतुत्वात्। अत एव परामर्शानुव्यवसाये नातिव्याप्तिः। तस्य परमर्शानुव्यवसाये विषयत्वेनैव हेतुत्वात्तथा च परामर्शत्वावच्छिन्नजनकतानिरूपितजन्यत्वे सति ज्ञानत्वमिति पर्यवसितोƒर्थः। परामर्शं निरूपयति व्याप्तीति। व्याप्तिविशिष्टत्वञ्च व्याप्तिविषयकत्वम्। तथा च व्याप्तिविषयकं यत्पक्षधर्मताज्ञानं तत्त्वमित्यर्थः। न च वह्निव्याप्यो धूमः आलोकवान्पर्वत इत्यकारकसमूहालम्बनज्ञानादपि वहन्यनुमित्यापत्तिः। तादृशज्ञानस्य व्याप्तिविषयकत्वात्। पक्षधर्मताविषयकत्वादिति वाच्यम्। वह्निव्याप्तिविषयतानिरूपितधूमविषयतानिरूपितपर्वतविषयताशालिज्ञानत्वेन वह्निसाध्यकानुमितिस्थले कारणत्वस्य विवक्षणीयत्वात्तादृशसमूहालम्बनज्ञानीयपर्वतविषयतायाश्चालोकविषयतानिरूपितत्वेन धूमविषयतानिरूपितत्वाभावान्न तादृशज्ञानेन अनुमित्यापत्तिः। न चानुमित्युत्तरक्षणमनुमित्यन्तरापत्तिः। पूर्वपरामर्शस्यैव तज्जन्यानुमितिक्षणेƒपि सत्वात्सामग्रीसम्भवादिति वाच्यम्। सिद्ध्यभावस्याप्यनुमितौ कारणत्वकल्पनान्न चैवमपि प्रत्यक्षाद्यात्मकसिद्धौ सत्यां अनुमित्सया अनुमितेरंगीकृतत्वात्। यदाहुः प्रत्यक्षेण परिकल्पितमपि अनुमानेन बुभुत्स्यन्ते तर्करसिका: इति। तथा च तत्र सिद्ध्यभावरूपकारणस्य व्यभिचार इति वाच्यम्। तत्रानुमित्साया उत्तेजकत्वाद्दाहादौ उत्तेजकाभावसहकृतमणेः प्रतिबन्धकत्ववत्तदभावस्य कारणत्ववच्च अनुमितावपि सिषाधयिषाविरहसहकृतसिद्धेः प्रतिबन्धकत्वं तदभावस्य च हेतुत्वमिति

कल्पनात्। उत्तेजकत्वं च प्रतिबन्धकप्रतिबन्धकत्वम्। एवं च यत्र सिद्धौ सत्यामपि सिषाधयिषयानुमितिः तत्र सिषाधयिषाविरहविशिष्टसिद्धेरभावान्नानुपपत्तिः। ननु योग्यविभुविशेषगुणानां यौगपद्यासंभवात् सिषाधयिषासिद्धिपरामर्शानां त्रयाणां युगपदु-त्पत्यसंभवात्क्रमेण त्रिभिः क्षणैरुत्पत्तौ च ज्ञानेच्छादीनां द्विक्षणावस्थायित्वेनान्त्योत्पत्तिक्षणे प्रथममुत्पन्नस्य नाशावश्यंभावात् तत्र च सिद्धेः प्रथममुत्पत्या नाशे सिद्ध्यभावा-देवानुमित्युपपत्तिः। सिसाधयिषायाः प्रथममुत्पत्या नाशे तत्र सिषाधयिषाया उत्तेजकस्याभावादनुमित्यसम्भवः प्रथमं परामर्शस्योत्पत्या नाशे च परामर्शरूपकारणा-भावादेव नानुमितिः। तथा च सिषाधयिषासिद्ध्योः युगपत्परामर्शेन सहस्थितेरप्य-भावात् किमर्थं सिषाधयिषाविरहविशिष्टत्वविशेषणं सिद्धेरिति चेन्न। यत्रैकस्मिन्क्षणे वह्निव्याप्यधूमवान्पर्वतो वहिनमानिति सिद्धिपरामर्शात्मकमेकं ज्ञानं जातं ततः सिषाधयिषा तत्र सिषाधयिषासिद्ध्योः युगपत्परामर्शेन सह सत्वात्तत्रानुमितिनिर्वाहाय सिद्धौ सिषाधयिषाविरहवैशिष्ट्यविशेषणस्यावश्यकत्वात्। अन्यथा तत्र सिद्धिरूप-प्रतिबन्धकसत्वेन अनुमित्यनुपपत्तिरिति ध्येयम्। इयमेव पक्षतेत्युच्यते। व्याप्तिलक्षण-माह। यत्रेति। साहचर्यं सामानाधिकरण्यं तस्य नियमः सार्वत्रिकत्वं व्यापकसामानाधि-करण्यमित्यर्थः। वह्निमान्धूमादित्यत्र धूमव्यापको वह्निः तत्सामानाधिकरण्यं धूमे वर्तत इति लक्षणसमन्वयः। धूमवान्वह्नेरित्याद्यसद्धेतौ वह्निव्यापकत्वस्य धूमेऽभावात्

नातिव्याप्तिः। धूमव्यापकत्वं च वह्नेर्धूमसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम्। न च धूमसमानाधिकरणवह्निघटोभयाभावं पूर्वक्षणवृत्तित्वविशिष्टवह्न्यभावं चादाय तत्प्रतियोगित्वाद्वह्नेर्लक्षणासम्भव इति वाच्यम्। वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य हेतुमन्निष्ठाभावस्य निवेशनीयत्वात्। यदि वह्निधूमोभयवान्वह्नेः महानसीयवह्निमान्धूमादित्यादावतिव्याप्तिः। तत्रायोगोलके हेतुसमानाधिकरणस्य वह्निधूमोभयाभावस्य व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेन पर्वते धूमसमानाधिकरणस्य महानसीयवह्न्यभावस्य वैशिष्ट्यावच्छिन्नप्रतियोगिताकत्वेन च लक्षणाघटकत्वात्तदवच्छिन्नाभावान्तराप्रतियोगित्वस्य चोभयत्र साध्ये सत्वादित्युच्यते तदभावे वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वविशेषणमपहाय हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके निवेश्यतां अतो न पूर्वोक्तासंभवः। उक्तस्थलद्वये च साध्यतावच्छेदकस्य वह्निधूमोभयत्वस्य महानसीयवह्नित्वस्य च हेतुसमानाधिकरणवह्निधूमोभयाभावप्रतियोगितायां महानसीयवह्न्यभावप्रतियोगितायां च क्रमेण अवच्छेदकत्वान्नातिव्याप्तिः। न चैवमपि वह्निमान्धूमादित्यत्र चालिनीन्यायेन हेतुसमानाधिकरणमहानसीयवहन्यभावप्रतियोगितावच्छेदकत्वं वह्नित्वस्यापि अस्ति इत्यव्याप्तिरिति वाच्यम्। प्रतियोगितावच्छेदकतापर्याप्तिशून्यत्वस्य अनवच्छेदकेत्यनेन विवक्षितत्वात्तत्र च महानसीयत्ववह्नित्वयोरेव अवच्छेदकतापर्याप्तेः वर्तमानत्वात्प्रत्येकं तदभावेन शुद्धवह्नि-

त्वस्य तादृशावच्छेदकतापर्याप्तिशून्यत्वान्न क्षतिः। न च ज्ञानवानात्मत्वादित्यत्राव्याप्तिः। घटादिदेशावच्छेदेन सुषुप्त्यादिकालावच्छेदेन च आत्मनि वर्तमानज्ञानाभावप्रतियोगितावच्छेदकत्वात् ज्ञानत्वस्येति वाच्यम्। प्रतियोगिव्यधिकरणत्वेन हेतुसमानाधिकरणाभावस्य विशेषणीयत्वात्। न च हेत्वधिकरणनिरवच्छिन्नवृत्तिकाभावनिवेशनेनैव एतद्दोषवारणसम्भवे प्रतियोगिव्यधिकरणत्वनिवेशो गौरवग्रस्त इति वाच्यम्। तथा सति प्राचीनमते संयोगसामान्याभावस्य द्रव्येभावात्संयोगाभावसाध्यकसत्त्वहेतावतिव्याप्तिः। तत्र संयोगाभावाभावस्य संयोगस्याव्याप्यवृत्तित्वेन हेत्वधिकरणे निरवच्छिन्नवृत्तिकत्वाभावात्[31] तथाविधाभावान्तरप्रतियोगितानवच्छेदकत्वस्य संयोगाभावत्वे दुर्वारात्। एवञ्च यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वेन निरुक्तस्थले संयोगाभावाभावीयप्रतियोगितावच्छेदकसंयोगाभावत्वावच्छिन्नानधिकरणं हेत्वधिकरणं द्रव्यमिति तादृशप्रतियोगितावच्छेदकमेव संयोगाभावत्वं इति नातिव्याप्तिः। इत्यलमतिविस्तरेण। इदञ्च व्याप्तिलक्षणं सिद्धान्तमनुरुध्य। पूर्वपक्षीयव्याप्तिलक्षणं तु साध्यवदन्यावृत्तित्वं साध्यतावच्छेदकविशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्ति

---

[31] निरवच्छिन्नवृत्तित्वाभावात् इति छ पुस्तके

त्वसामान्याभाव इति तदर्थः। तेन वह्निमान्धूमादित्यत्र महानसीयवह्नित्वावच्छिन्न-प्रतियोगिताकभेदस्य वह्निमन्महानसीयप्रतियोगिकभेदस्य च धूमादिमति पर्वतादौ सत्वेऽपि न क्षतिः। न वा तत्र वह्निमद्भिन्ने धूमावयवे धूमस्य समवायेन वृत्तित्वेऽपि न क्षति:[32]। न वा धूमवान्वह्नेः इत्यादौ धूमादिमद्भिन्नह्रदादिनिरूपितवृत्तित्वाभावेऽपि वह्न्यादेः क्षतिः। साध्यतावच्छेदकसंबन्धेनापि साध्यवत्त्वं बोध्यम्। तेन धूमादेः समवायसम्बन्धेन वह्न्यादिमद्वह्न्यवयवादिभिन्नपर्वतादिवृत्तित्वेऽपि न क्षतिः। ननु द्रव्यं गुणकर्मान्यत्वविशिष्टसत्वात् इत्यादौ साध्यवदन्यस्मिन् गुणे उपधेयसंकरोप्युपाधेरसंकर इति न्यायेन विशिष्टं शुद्धान्नातिरिच्यत इति न्यायेन[33] विशिष्टसत्तायाः सत्तात्वेन वृत्तित्वादव्याप्तिः इति चेन्न साध्यवदन्यनिरूपितवृत्तितानवच्छेदकत्वस्य हेतुतावच्छेदके विवक्षणात्तत्र च साध्यवदन्यगुणनिरूपितवृत्तितावच्छेदकं सत्तात्वमेव न विशिष्टसत्तात्व-मिति नाव्याप्तिः। न च सत्तावान्जातेरित्यादावव्याप्तिः। साध्यवदन्यसामान्यनिरूपित-हेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्धेरिति वाच्यम्। एतद्दोषेणैव सिद्धान्त-लक्षणस्य आदरणीयत्वात्। वस्तुतः हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदक-

---

[32] न वा तत्र वह्निमद्भिन्ने धूमावयवे धूमस्य समवायेन वृत्तित्वेपि न क्षति: इति क,ख,ग,घ,ङ पुस्तकयोः न दृश्यते।

[33] उपधेयसंकरोप्युपाधेरसंकर इति न्यायेन विशिष्टं शुद्धान्नातिरिच्यत इति न्यायेन – एतद्वाक्यं केवलं च पुस्तके एव दृश्यते।

धर्मावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकसाध्यवदन्यनिरूपितवृत्तित्वसामान्याभाव इति परिष्कारेणैतद्दोषावसर इति ध्येयम्। अनुमानं विभजते। अनुमानमिति। स्वार्थानुमानं दर्शयति स्वयमेवेति। भूयोदर्शनेनेति। भूयोदर्शनत्वेन न व्याप्तिग्रहहेतुत्वम्। शतशो धूमवह्न्योः साहचर्यदर्शनेपि वह्नौ धूमव्याप्तिग्रहासम्भवात्। किन्तु व्यभिचारज्ञानाभावविशिष्टसहचारज्ञानत्वेनैव व्याप्तिग्राहकत्वं वह्नौ च व्यभिचारज्ञानाभावविशिष्टधूमसहचारज्ञानाभावान्न व्याप्तिग्रह इति। परार्थानुमानं दर्शयति। यत्त्विति। पर्वतो वह्निमानिति प्रतिज्ञावाक्यात् वह्निमदभिन्नः पर्वत इति धूमादिति हेतुवाक्येन हेतुत्वं धूमीयमिति। यो यो धूमवान्स स वह्निमानिति उदाहरणवाक्येन यो यो धूमवदभिन्नः स वह्निमदभिन्न इति। तथा चायमित्युपनयवाक्येन वह्निव्याप्यधूमवदभिन्नः पर्वत इति। तस्मात्तथेति निगमनवाक्येन अबाधितत्वात्सत्प्रतिपक्षितत्वविशिष्टधूमज्ञानज्ञाप्यवह्निमदभिन्नोयमिति चावान्तरबोधः। उपनयबोधान्तबोधचतुष्टयजन्यसंस्कारसहकृतनिगमनार्थविषयकबोधात् विशिष्टान्वयबोधो वा समूहालम्बनात्मकबोधो वा महावाक्यार्थबोधो भवति। तादृशबोधानन्तरं विशिष्टपरामर्शः तदनन्तरमनुमितिरित्येवं परार्थानुमानक्रमः। न्यायत्वं प्रतिज्ञादिपञ्चकसमुदायत्वम्। अवयवलक्षणन्तु प्रतिज्ञाद्यन्यतमत्वम्। परामर्श एव करणमिति। इदन्त्वव्यवधानेन फलावच्छिन्नं कारणं करणमिति मताभिप्रायेण। व्यापारवत्कारणं करणमिति मते तु व्याप्तिज्ञानमेव परामर्शद्वारा करणमिति ध्येयम्। लिङ्ग

हेतुः। तं विभजते। लिङ्गमिति। अन्वयव्यतिरेकिलक्षणमाह। अन्वयेनेति। अन्वयव्याप्तिः पूर्वोक्तैव व्यतिरेकव्याप्तिस्तु साध्याभावव्यापकीभूताभावप्रतियोगित्वम्। तथा च वह्न्यभावव्यापकीभूतधूमाभावप्रतियोगित्वरूपव्यतिरेकव्याप्तेरपि धूमे सत्वात्। तस्यान्वयव्यतिरेकिलिङ्गत्वमिति भावः। केवलान्वयिलक्षणमाह। अन्वयमात्रेति। केवलान्वयित्वमत्यन्ताभावाप्रतियोगित्वं ननु संयोगाभावगगनाभावादेः केवलान्वयित्वव्यवहारो व्याहन्येत तस्य संयोगगगनाद्यात्मकाभावप्रतियोगित्वादिति चेन्न स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वस्य विवक्षितत्वात्। संयोगस्य स्वाभावविरोधित्वाभावात्। गगनस्य वृत्तिमत्वाभावाच्च नानुपपत्तिः। तथा च केवलान्वयिसाधकत्वं केवलान्वयिलिङ्गलक्षणम्। यथा श्रुतन्तु व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वम्। अत्र हेतोः वस्तुगत्या व्यतिरेकित्वेपि वाच्यं धूमाद्धटोऽभिधेयो द्रव्यत्वादित्यादेः केवलान्वयित्वमेव। साध्यस्य केवलान्वयित्वादे व्यतिरेकव्याप्तेरसम्भवादिति ध्येयम्। केवलव्यतिरेकिणं लक्षयति। व्यतिरेकमात्रेति अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं इत्यर्थः। पृथिवी इतरेभ्य इति। अत्र जलादिचतुर्दशभेदकूटं साध्यं न तु चतुर्दशत्वावच्छिन्नभेदः। तस्याऽप्रसिद्धेः न च कूटस्याप्रसिद्धिस्तुल्येति वाच्यम्। कूटस्यैकत्र प्रसिद्ध्यभावेऽपि जलादिषु चतुर्दशसु प्रत्येकं चतुर्दशभेदानां जले प्रसिद्धिसम्भवात्। तथा च प्रत्येकं जले तेजोभेदः तेजसि जलभेद इत्येवं प्रसिद्धानां चतुर्दशभेदानां कूटस्य पृथिव्यां साध्यतेति भावः। ग्रन्थान्तरेषु

जलादित्रयोदशत्वोक्तिश्चाभावस्याधिकरणात्मकत्वमताभिप्रायेण अन्यथा जलादिसमवा-यान्तत्रयोदशभेदकूटस्य अभावपदार्थ एव प्रसिद्धत्वात्तत्र कूटाप्रसिद्ध्याशंकानुपपत्तिः। हेतोरसाधारण्यप्रसक्तिश्चेति ध्येयम्। अत्र व्यतिरेकव्याप्तिग्रहश्चेत्थम्। यदितरेभ्यो न भिद्यते न तद्गन्धवत् इत्यत्र यत्र यत्र पृथिवीतरभेदाfभावः तत्र तत्र गन्धाभाव इति इतरभेदाभाव-व्यापकता गन्धाभावे दृष्टान्तजलादौ गृह्यते। जलं यथेतरभेदाभाव-वद्गन्धाभाववच्च न चेयं तथा इयं पृथिवी तथा इतरभेदाभावव्यापकगन्धाभाववती न च तदभाव गन्धवतीत्यर्थः। तस्मान्न तथा तस्माद्गन्धाभावाभावगन्धवत्त्वात् इतरभेदाभाववती न किन्तु तदभाव इतरभेदवतीत्यर्थः। पक्षं लक्षयति। सन्दिग्धेति। सन्देहविषयसाध्यवत्त्वमित्यर्थः। वस्तुतः पूर्वोक्तसिषाधयिषाविरहविशिष्टसिद्ध्यभाव-रूपपक्षताश्रयत्वमेव पक्षलक्षणं बोध्यम्। अन्यथा साध्यनिश्चयानन्तरं इच्छयानुमितिस्थले पक्षत्वाभावप्रसंगात् गगनं मेघवन्नवेति सन्देहाभावे घनगर्जितश्रवणेन गृहमध्यस्थपुरुषस्य गगनं मेघवदित्यनुदयापत्तेश्च। निश्चितेति। निश्चयविषयसाध्यकत्वं सपक्षलक्षणमित्यर्थः। एवं निश्चयविषयसाध्याभाव-वत्वं विपक्षलक्षणमित्यर्थः। एवं सद्धेतुन्निरूप्य तत्प्रसंगात् हेत्वाभासान्निरूपयति। सव्यभिचारेति। यद्विषयकत्वं ज्ञाननिष्ठानुमितिप्रतिबन्धकता-वच्छेदकं तत्वं हेत्वाभाससामान्यलक्षणम्। भवति हि ह्रदो वह्निमान्धूमादित्यत्र वहन्यभाववद्ध्रदरूप-बाधाविषयकत्वं वहन्यभाववद्ह्रद इति ज्ञाननिष्ठायां वह्निमान्ह्रद इति अनुमितिप्रति-

बन्धकतायां अवच्छेदकमिति तत्र बाधे लक्षणसमन्वयः। न च व्यभिचारादिविषय-कज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वेन अनुमितिप्रतिबन्धकत्वाभावात् व्यभिचारविषयकत्वं नानुमितिप्रतिबन्धकतावच्छेदकमिति व्यभिचारादौ अव्याप्तिरिति वाच्यम्। अनुमिति-पदस्य पक्षसाध्यवान् साध्यव्याप्यहेतुमांश्चेति समूहालम्बनानुमिति-परत्वात्तथा च व्यभिचारज्ञानस्य व्याप्त्यंशे तादृशानुमितिप्रतिबन्धकत्वाद्विरुद्धस्य सत्प्रतिपक्षबाधितयोश्च साध्यविशिष्टपक्षांशे प्रतिबन्धकत्वात्। असिद्धस्य च पक्षधर्मतांशे तथात्वात्सर्वत्र लक्षणसमन्वयः। सव्यभिचारं विभजते। स त्रिविध इति। एतत्सामान्य-लक्षणन्तु साधारणाद्यन्यतमत्वम्। साधारणलक्षणमाह तत्रेति। साध्याभाववद्वृत्तित्वं साधारण-लक्षणमित्यर्थः। एतज्ज्ञानस्य साध्याभाववदवृत्तित्वरूपव्याप्तिग्रहप्रतिबन्धकत्वम्। असाधारणलक्षणमाह सर्वेति। निश्चितसाध्यवत्सामान्यव्यावृत्तत्वमित्यर्थः। एतज्ज्ञानस्य साध्यसामानाधिकरण्यघटितव्याप्तिग्रहप्रतिबन्धकत्वम्। अनुपसंहारिणं लक्षयति। अन्वये-नेति। केवलान्वयिपक्षकत्वं तदर्थः एतस्य च व्याप्तिग्रहप्रतिबन्धः फलम्। विरुद्धं लक्षयति साध्याभावव्याप्येति। साध्याभावव्याप्यत्वन्तल्लक्षणमित्यर्थः। अत्र तद्वत्ताबुद्धौ तदभाव-व्याप्यवत्तानिश्चयस्यापि प्रतिबन्धकत्वेन साध्याभावव्याप्यहेतुमत्ताज्ञानात्साध्यप्रकारका-नुमितिप्रतिबन्धो भवति। सत्प्रतिपक्षं लक्षयति। यस्येति। विरोधिव्याप्यवत्ताग्रहसमान-कालीनसाध्यव्याप्यवत्ताग्रहविषयकत्वमित्यर्थः। इदन्तु प्राचीनमताभिप्रायेण। वस्तुतः

साध्याभावव्याप्यवत्पक्षकत्वं सत्प्रतिपक्षलक्षणम्। एतस्यापि विरुद्धवदनुमितिप्रतिबन्धकत्वं न च विरुद्धेन स्यादभेदः। तत्र साध्याभावव्याप्यत्वं हेतोरेव। अत्र तु यस्यकस्यचिदिति भेदसम्भवात्। असिद्धं विभजते। असिद्ध इति। तत्सामान्यलक्षणं तु आश्रयासिद्ध्याद्यन्यतमत्वं बोध्यम्। पक्षतावच्छेदकाभाववत्पक्षकत्वमाश्रयासिद्धलक्ष-णम्। तमुदाहरति गगनेति। अत्रारविन्दे पक्षे पक्षतावच्छेदकगगनीयत्वाभावात् लक्षण-संगतिः। एतज्ज्ञानस्य पक्षतावच्छेदकविशिष्टपक्षधर्मताग्रहप्रतिबन्धकत्वं हेत्वभाववत्प-क्षकत्वं स्वरूपासिद्धलक्षणम्। तमुदाहरति। शब्द इति। अस्यापि पक्षधर्मताग्रहप्रति-बन्धकत्वमेव व्याप्यत्वासिद्धस्य लक्षणमाह। सोपधिक इति। उपाधिमत्त्वमित्यर्थः। उपाधिं निरूपयति। साध्येति। अत्रोपाधेः वह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धन-व्यभिचारित्वात् इत्येवं व्यभिचारेण दूषकतावसेया। बाधितलक्षणमाह। यस्येति साध्याभाववत्सपक्षकत्वं[34] तल्लक्षणं बोध्यम्। एतादृशबाधज्ञानादनुमितिप्रतिबन्धो भवति। इत्यनुमानपरिच्छेदः। उपमानं लक्षयति। उपमितीति। उपमितिं लक्षयति। संज्ञासंज्ञीति। पदपदार्थसम्बन्धज्ञानमित्यर्थः। पदपदार्थयोः सम्बन्धः शक्तिः। तथा शक्तिज्ञानमिति पर्यवसितं अत्र गोसदृशो गवयपदवाच्य इति। अतिदेशवाक्यार्थज्ञानं करणं तत्स्मरणं

---

34 साध्याभाववत्पक्षकत्वं इति ख,घ,च,छ पुस्तकेषु।

व्यापारः तादृशस्मरणानन्तरं गोसदृशो गवयपदवाच्य इत्याकारकमेवो-पमितिज्ञानं भवति। नन्वयं गवयपदवाच्य इत्याकारकं तथा सति इदन्त्वावच्छिन्न एव गवयपदशक्तेर्ग्रहणाद्गवयव्यक्त्यन्तरे शक्तिग्रहाभावेन गवयपदजन्यशाब्दबोधे गवया-न्तरभानानुपपत्तिः। मम तु गोसदृशत्वसामान्येन निखिलगवयव्यक्तीनामुपस्थित्या गवय-व्यक्त्यन्तरेष्वपि शक्तेः गृहीतत्वेन न तादृशानुपपत्तिगन्धोपि। इत्युपमानपरिच्छेदः। शब्दप्रमाणं लक्षयति। शब्देति। पदं लक्षयति। शक्तमिति। गामानयेत्यत्र गामिति-वस्तुत एकस्यापि पदस्य वाक्यत्वं ज्ञेयम्। गवार्थकगोपदकर्मत्वार्थकद्वितीयापद-समूहत्वादिति। शक्तत्वं च शक्तिनिरूपकत्वम्। शक्तिं लक्षयति। अस्मादिति संकेत: इच्छापदादिति। पञ्चम्यर्थो जन्यत्वं बोध्यम्। बोधव्यत्वं बोधविषयत्वम्[35]। तथा च पदजन्यबोधविषयत्वप्रकारिका ईश्वरेच्छाशक्तिरित्यर्थः इदञ्च स्वरूपकथनम्। तल्लक्षणन्तु अर्थस्मृत्यनुकूलपदपदार्थसम्बन्धम्। न च तादृशेश्वरेच्छायाः शक्तित्वे तस्याः सर्व-पदार्थसाधारण्येन घटपदजन्यबोधविषयत्वप्रकारिकेश्वरेच्छा पटादावप्यस्तीति घट-पदात्पटादेरपि बोधप्रसंग इति वाच्यम्। विशिष्य स्वनिष्ठप्रकारकत्वनिरूपकतत्तत्पदजन्य-

35 बोध्यत्वंबोधविषयत्वम् इति क पुस्तके
बोध्यत्वंबोधविषयकत्वम् इति च पुस्तके
बोधव्यंबोधविषयत्वम् इति छ पुस्तके

बोधविषयत्वसम्बन्धेन तत्तत्पदजन्यबोधविषयत्वप्रकारकेश्वरेच्छायाः तथात्वाभ्युपगमेन दर्शितातिप्रसंगासंभवात्[36]। आकाङ्क्षेति। आकाङ्क्षाज्ञानं योग्यताज्ञानञ्चेत्यर्थः संनिधिर-व्यवधानेन पदार्थोपस्थितिः आकाङ्क्षां लक्षयति। पदस्येति। गामानयेत्यत्र अन्यतरपदस्य अन्यतरपदाभावप्रयुक्तः अन्वयानुभावकत्वाभावो[37] वर्तत इति लक्षणसंगतिः। योग्यतां लक्षयति अर्थबाध इति। तदभाववद्धर्मिकतद्बोधकत्वाभाव इत्यर्थः। वह्निना सिञ्चतीत्यत्र सेककरणत्वाभाववद्वह्नौ सेककरणत्वबोधकत्वान्नातिप्रसंगः। संनिधिं निरूपयति। पदाना-मिति। पदार्थान्तरोपस्थित्यव्यवहितपदार्थोपस्थितिप्रयोजकत्वमित्यर्थः। तेन विलम्बेनो-च्चारितेऽपि क्वचित्कस्यचित्कदाचित्बोधसम्भवेपि न क्षतिः। तादृशबोधौपयिकतादृश-वाक्यस्याप्यव्यवहितार्थोपस्थितिप्रयोजकत्वादिति ध्येयम्। एवं तात्पर्यज्ञानमपि शाब्दज्ञाने कारणम्। तात्पर्यं च तत्प्रतीतीच्छयोच्चारितत्वं न च शुकोच्चारितवाक्ये एतादृशतात्पर्य-सम्भवात्तादृशवाक्याच्छाब्दबोधो न स्यादिति वाच्यम्। तदितरप्रतीतीच्छयानुच्चारितत्वस्य विवक्षणीयत्वात्। न चैवमपि यत्राश्वलवणोभयबोधेच्छयोच्चारितं सैन्धवपदं तत्राश्वेतरलवणप्रतीतीच्छयोच्चारितत्वस्य लवणेतराश्वप्रतीतीच्छयोच्चारितत्वस्य च सत्वेन

---

36 स्वनिष्ठप्रकारकत्वनिरूपकतत्तत्पदजन्यबोधविषयत्वसम्बन्धेनतत्तत्पदजन्यबोधविषयत्व-प्रकारकेश्वरेच्छायाःतथात्वाभ्युपगमेनदर्शितातिप्रसंगासंभवात् एतद्वाक्यं केवलं च,छ पुस्तकयोः

37 अन्वयाननुभावकत्वाभावो इति क पुस्तके

तत्तदितरप्रतीतीच्छया अनुच्चारितत्वरूपतात्पर्यासम्भवात् शाब्दबोधानुपपत्तिरिति वाच्यम्। तदितरमात्रप्रतीतीच्छया अनुच्चारितत्वस्य विवक्षितत्वात्तत्र चाश्वमात्रप्रतीतीच्छया लवणमात्रप्रतीतीच्छया वाऽनुच्चारितत्वस्य सत्वान्नानुपपत्तिरिति। वाक्यं विभजते। तद्विविधमिति। वैदिकं वेदतन्मूलस्मृतीतिहासादिकमीश्वरोक्त-त्वात् इति। ईश्वरादिप्रणीतत्वादित्यर्थः। अत्रायं शाब्दबोधप्रकारः। देवदत्तो ग्रामं गच्छतीत्यत्र ग्रामस्य द्वितीयार्थे कर्मत्वेऽन्वयः। तस्य धात्वर्थे गमनेऽन्वियः तस्य आख्यातार्थे कृतौ जनकत्वसम्बन्धेनान्वयः तस्य च प्रथमान्तार्थेऽन्वियः। लडर्थो वर्तमानत्वं तस्यापि कृतौ अन्वयः। तथा च ग्रामकर्मकगमनजनकवर्तमानकृतिमान्देवदत्त इति शाब्दबोधः। देवदत्तेन गम्यते ग्राम इत्यादौ तृतीयान्तार्थदेवदत्तवृत्तित्वस्य आख्यातार्थकृतावन्वयः। तस्याः जन्यत्वसम्बन्धेन धात्वर्थे गमने तस्य जन्यत्वसम्बन्धेन आत्मनेपदार्थे कर्मणिफले अन्वयः। तस्य प्रथमान्तार्थे अन्वयः। तथा च देवदत्तवृत्तिकृतिजन्यगमनजन्यफलशाली ग्राम इति शाब्दबोधः। भावप्रयोगस्थले देवदत्तेन भूयते स्थीयते सुप्यते इत्यादौ देवदत्तवृत्तिकृतिजन्यं भवनं स्थितिः स्थाप इत्येवं धात्वर्थमुख्यविशेष्यक एव शाब्दबोधः। द्वितीयालोपस्थले दध्यानय पश्येत्यादौ दधिशब्दस्य लक्षणया दधिविशिष्टकर्मत्वमित्यर्थः अकर्मकस्थले घटस्तिष्ठति घटो नश्यतीत्यादौ लक्षणया आश्रयत्वमाख्यातार्थकर्तृकारक-चैत्रघटादिपदार्थेषु संयोगप्रतियोगितादिसम्बन्धेन भूतलवृत्तित्वाश्रयत्वनाशाश्रयत्वादे-

रन्वयबोधः। कारकाणि षट्। तत्र कर्तृकारकत्वं कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वम्। रामेण बाणेन हतो बालीत्यत्र हननानुकूलसंयोगादिजनकत्वेन कर्मकारकप्रयोजके बाणेƒति व्याप्तिवारणाय कारकान्तराप्रयोज्यत्वे सतीति। तथा च रामकर्तृकबाणकरणकहननाश्रयो बालीति शाब्दबोधः। अत्र बाणस्य कर्तृकारकान्तरप्रयोज्यत्वेन न क्षतिः राज्ञपुरुषमानयेत्यत्र पुरुषस्वामिनि राजनि तद्वारणाय कारकान्तरप्रयोजकेति। वस्तुतः क्रियानुकूलकृतिमत्त्वं कर्तृत्वम्। रथो गच्छति घटो नश्यतीत्यादौ चाचेतने कर्तृत्वप्रयोगो गौण एवेति ध्येयम्। कर्मत्वं क्रियाजन्यफल-शालित्वम्। देवदत्तो ग्रामं गच्छतीत्यादौ ग्रामस्य देवदत्तसमवेतगमनक्रियाजन्य-संयोगरूपफलशालित्वात् लक्षणसंगतिः न च देवदत्तनिष्ठगमनजन्यसंयोगरूपफलशालित्वं देवदत्तस्याप्यस्ति संयोगस्य द्विनिष्ठत्वात्। तथा च देवदत्तस्यापि कर्मत्वापत्तिरिति वाच्यम्। परसमवेतत्वेन क्रियाया विशेषणीयत्वाद्देवदत्तस्य च स्वसमवेतक्रियाजन्यसंयोगशालित्वेन परसमवेतक्रियाजन्यफलशालित्वाभावान्न क्षतिः। न च देवदत्तो ग्रामाद्ग्रामान्तरं गच्छतीत्यत्र अपादानग्रामस्यापि कर्मत्वापत्तिः तस्य देवदत्तगमनजन्यविभागशालित्वादिति वाच्यम्। परसमवेतधात्वर्थतावच्छेदकफलशालित्वस्य विवक्षितत्वात्तथा च गमिधातोः संयोगविशिष्टगमनार्थकत्वेन विभागस्य तदर्थतावच्छेदकत्वाभावान्न तदाश्रये पूर्वदेशेƒतिव्याप्तिः। व्यापारवत्कारणत्वं करणत्वम्। व्यापारश्च तज्जन्यत्वे सति

तज्जन्यजनकः। काष्ठं कुठारेण छिनत्तीत्यत्र कुठारस्य स्वजन्यत्वे सति स्वजन्यछेदनजनको यः काष्ठसंयोगः तद्वत्वेन लक्षणसंगतिः क्रियाकर्मीभूतद्रव्यनिष्ठस्वत्वभागित्वेन उद्देश्यत्वं सम्प्रदानत्वम्। ब्राह्मणाय भूमिं ददातीत्यादौ दानकर्मीभूतभूमिनिष्ठस्वत्वभागित्वेन ब्राह्मणस्योद्देश्यत्वाल्लक्षणसंगतिः। वस्तुत: क्रियाकर्मीभूतद्रव्यजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वम्। पितृभ्यः श्राद्धं कुर्यादित्यत्र क्रियाकर्मीभूतश्राद्धजन्यसुखरूपफलभागित्वेन पित्रुद्देश्यकश्राद्धकर्मक्रियानुकूलकृतिमानिति अन्वयबोधः। वृक्षायोदकं सिञ्चतीत्यादौ क्रियाकर्मजन्यवृद्धिरूपफलभागित्वाद्वृक्षस्य लक्षणसंगतिः। न च देवदत्तो ग्रामं गच्छतीत्यादौ देवदत्तपदोत्तरं चतुर्थ्यापत्तिः। देवदत्तस्य गमनक्रियाकर्मग्रामजन्यसुख-भागित्वेन उद्देश्यत्वसम्भवात्। तथा च देवदत्तो ग्रामं गच्छतीत्यत्र देवदत्ताय ग्रामं गच्छतीति प्रयोगः स्यादिति वाच्यं उद्देश्यत्वेच्छाविषयत्वार्थकतया देवदत्तस्य ग्रामजन्यसुखभागित्वप्रकारकेच्छाविषयत्वाभावान्निरुक्तापत्त्यसम्भवात् इति। परसमवेत-क्रियाजन्यफलशालित्वं[38] अपादानत्वम्। वृक्षात्पर्णं पततीत्यादौ पर्णसमवेतपतन-क्रियाजन्यविभागाश्रयत्वेन वृक्षस्य अपादानत्वम्। वृक्षनिष्ठविभागानुकूलपतनाश्रयः पर्ण इति शाब्दबोधः। अत्र विभाग एव पञ्चम्यर्थः निष्ठत्वमनुकूलत्वं च संसर्गमर्यादया

---

[38] परसमवेतक्रियाजन्यविभागाश्रयत्वं इति च,छ पुस्तकयोः

लभ्यते। वृक्षात्पर्णं विभजते इत्यादाववधित्वं पञ्चम्यर्थः। तथा च वृक्षावधिकविभागानुकूलव्यापाराश्रयः पर्णमिति शाब्दबोधः। षष्ठ्यास्तु न कारकविभक्तित्वं तस्याः शेषेषष्ठीत्यनुशासनेन संबन्धसामान्यार्थकत्वप्रतिपादनात्। चैत्रस्य ग्रामं मैत्रो गच्छतीत्यादौ स्वामित्वसम्बन्धः षष्ठ्यर्थः। तथा च चैत्रस्वामिकग्रामकर्मकगमनानुकूलकृतिमान्मैत्र इति शाब्दबोधः। कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वे सति क्रियोपकारकत्वं अधिकरणत्वं चत्वरे चैत्रः पचतीत्यादौ चत्वरस्य चैत्रद्वाराक्रियाश्रयत्वाल्लक्षणसंगतिः एवं स्थाल्यां पचतीत्यादौ तण्डुलादिकर्मद्वारा स्थाल्याः क्रियाश्रयत्वाल्लक्षणसंगतिः चैत्रस्य तण्डुलं मैत्रः पचतीत्यत्र चैत्रस्य तण्डुलरूपकर्मद्वारा पाकाश्रयस्य वारणाय क्रियोपकारकेति कर्मादिकारकवारणाय विशेषणदलम्। एवमाधेयत्वमपि सप्तम्यर्थः भूतले घट इत्यादौ भूतलनिरूपिताधेयताको घट इत्यन्वयबोधः। अत्र निरूपितत्वं संबन्धः। चर्मणिमृगं हन्तीत्यादौ नाधिकरणसप्तमी। किन्तु निमित्ते। निमित्तत्वं च उद्देश्यत्वं तथा च चर्मोद्देश्यकमृगकर्मकहननानुकूलकृतिमानित्यन्वयबोधः। मयि तिष्ठति समागत इत्यादौ सतिसप्तमी। तदर्थश्च सामानाधिकरण्यम्। तद्विविधम्। एकदेशवृत्तित्वं एक कालवृत्तित्वं चेति तत्र कालिकं सामानाधिकरण्यं तथा च मत्स्थितिकालीनसमागमनाश्रयेत्यन्वयबोधः। रूपरहितत्वे सति स्पर्शवान् इत्यत्र दैशिकं सामानाधिकरण्यं इत्यादिसंग्रहणीयम्। वृष्टिर्भविष्यतीत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वरूपं भविष्यत्वं लृडर्थः। तथा च

विद्यमानप्रागभावप्रतियोग्युत्पत्तिकसत्ताश्रयो वृष्टिरिति शाब्दबोधः। घटोभवितेत्यत्र लुटो भविष्यत्वमनद्यतनत्वञ्चार्थः। अतीतरात्र्यपरार्धागामिरात्रिपूर्वार्धसहितं दिनमद्यतनम्। तद्भिन्नवृत्तित्वमनद्यतनत्वम्। तथा च भविष्यदनद्यतनसत्ताश्रयो घट इत्यन्वयबोधः। घटो*f*भूदित्यत्र लुङर्थः भूतत्वम्। तच्च वर्तमानध्वंसप्रतियोग्युत्पत्तिकत्वम्। तादृशोत्पत्तिकसत्ताश्रयो घट इति बोधः रामो बभूवेत्यत्र लिडर्थो अनद्यतनत्वं अतीतत्वं परोक्षत्वं च अतीतत्वं भूतत्वं चैकार्थकम्। परोक्षत्वं तु प्रत्यक्षाविषयत्वं तथा च अनद्यतनपरोक्षत्वविशिष्टविद्यमानध्वंसप्रतियोग्युत्पत्तिमत्सत्ताश्रयो राम इति शाब्दबोधः। घटो*f*भवदित्यत्र लडर्थः अतीतत्वमनद्यतनत्वं च तथा च अनद्यतनायाविद्यमान-ध्वंसप्रतियोग्युत्पत्तिः तदाश्रयो घट इति बोधः। सुभिक्षमभविष्यदित्यादौ कादाचित्के प्रयोगे भविष्यत्वं लृङर्थः। सुवृष्टिश्चेदभविष्यत्सुभिक्षमभविष्यदित्यादौ तु व्याप्यक्रियया-व्यापकक्रियाया अपादानं लृडर्थः। वृष्टिसत्तारूपव्याप्यक्रियया सुभिक्षसत्तारूपव्यापक-क्रियाया अपादानादिति। स्वर्गकामो यजेतेत्यादौ विधिर्लिङर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधनत्वम्। तथा च कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनया-गानुकूलकृतिमान्स्वर्गकाम इति बोधः। न कलञ्जं भक्षयेदित्यादौ नञर्थस्य अभावस्य विध्यर्थेन सहान्वयेन विध्यर्थान्वितनञर्थस्य धात्वर्थे प्रकारतया भानं अभ्युपेयते। तथा च कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनत्वाभाववत्कलञ्जभक्षणमिति शाब्दबोधः। अशी-

र्लिङः लोटश्च वक्तुरिच्छाविषयत्वमर्थः तथा च गौर्भूयाद्ग्रामानयेत्यादौ क्रमेण मदिच्छाविषयसत्ताकागौः मदिच्छाविषयगोकर्मकानयनानुकूलकृतिमान्त्वमित्यन्वयबोधः। पापच्यते इत्यादौ लङः पौनःपुन्यं अर्थः तच्च तदानीन्तन प्रकृत्यर्थसजातीयक्रियान्तरध्वंसकालीनत्वम्। लडर्थो वर्तमानत्वमाख्यातार्थः कृतिः तथा च तदानीन्तन प्रकृत्यर्थसजातीयक्रियान्तरध्वंसकालीनवर्तमानकृतिविषयः पाक इति शाब्दबोधः। घटं चिकीर्षतीत्यत्र सनः कृतीच्छार्थः सविषयकार्थप्रकृतिकाख्यातार्थस्य आश्रयत्वे लाक्षणिकत्वेन घटकर्मकृतीच्छाश्रय[39] इति शाब्दबोधः। स्नात्वा गच्छतीत्यादौ त्वा प्रत्ययस्य पूर्वकालीनत्वं कर्ता च अर्थः सन्निहितक्रियापेक्षया पूर्वकालीनत्वं च तत्प्रागभावकालवृत्तित्वं तदुत्पत्तिकालवृत्तिध्वंसप्रतियोगिकालवृत्तित्वं वा तथा च गमनकालीनध्वंसप्रतियोगिकालवृत्तिस्नानकर्त्रभिन्नो गमनानुकूलकृतिमानिति शाब्दबोधः स्नात्वेत्यत्र समानविभक्तिकत्वेनाभेदान्वयबोधः। अव्ययत्वेन प्रथमाविभक्तिलोपादिति। स्नातुं गच्छतीत्यादौ तुमुनः इच्छावानर्थः। स्नानेच्छावदभिन्नो गच्छतीत्यन्वयबोधः। इत्यादिकं सूक्ष्मदृशा-बहुतरमूहनीयम्। इति शब्दपरिच्छेदः। ननु अर्थापत्यादिप्रमाणान्तरा *f* निरूपणाद्ग्रन्थस्य न्यूनता। तथा हि उपपाद्यज्ञानेन उपपादककल्पनमर्थापत्तिः पीनो देवदत्तो दिवा न भुङ्क्ते

[39] घटकर्मककृतीच्छाश्रय च,छ पुस्तकयोः

इत्यत्र पीनत्वमुपपाद्यम्। तज्ज्ञानेन तदुपपादकं रात्रिभोजनं कल्प्यते इति तस्य प्रमाणान्तरत्वं एवं शते पञ्चाशत् इति सम्भवस्य इह वटे यक्षस्तिष्ठति इत्यैतिह्यस्य अर्थप्रमापकहस्तादिचेष्टायाश्च प्रमाणान्तरत्वमिति चेन्न। अर्थापत्तेः देवदत्तो रात्रौ भुङ्क्ते दिवाभुञ्जानत्वे सति पीनत्वात् यन्नैवं तन्नैवं इत्यनुमानेन्तर्भावात्। एवं शतं पञ्चाशत्संख्याकं तद्व्यापक-संख्याकत्वात् यथा सहस्रमित्यनुमाने सम्भवस्यान्तर्भावात्। ऐतिह्यस्य अज्ञातमूलवक्तृकशब्दस्वरूपत्वात्चेष्टायाश्च अर्थबोधकशब्दानुमापकत्वेन प्रमाणान्तरत्वाभावान्न प्रमाणस्य चातुर्विध्यासंगतिः इति न ग्रन्थस्य न्यूनता। अयथार्थानुभवं विभजते। अयथार्थेति। संशयं लक्षयति। एकस्मिन्निति। एकधर्मिविशेष्यकविरुद्धनानाधर्मप्रकारकज्ञानत्वमित्यर्थः। विपर्ययं लक्षयति। मिथ्येति। तदभाववति तदभावाप्रकारकत्वे सति तत्प्रकारकज्ञानत्वमित्यर्थः तेन न संशयेƒतिव्याप्तिः। तर्कं लक्षयति। व्याप्येति। व्याप्यारोपपूर्वकव्यापकारोपकत्वं तर्कत्वमित्यर्थः। स्वप्नस्य विपर्ययादावन्तर्भावः। स्मृतिं विभजते। स्मृतिरिति। यथार्थस्मृतेर्लक्षणमाह। प्रमेति। प्रमाजन्यत्वे सति ज्ञानत्वमित्यर्थः। प्रमाजन्यसंस्कारादिवारणाय विशेष्यम्। एवमप्रमाजन्यत्वे सति ज्ञानत्वं अयथार्थस्मृतिलक्षणार्थो बोध्यः। सुखं निरूपयति। सर्वेषामिति। इदन्तु स्वरूपकथनम्। तल्लक्षणन्तु अन्येच्छानधीनेच्छाविषयत्वम्। इच्छाविषयस्य सुखहेतुस्रक्चन्दनादेर्वारणाय अन्येच्छानधीनेति स्रक्चन्दनादेस्तु सुखेच्छाधीनेच्छाविषयत्वेन न अन्येच्छानधीनेच्छा-

विषयत्वम्। दुःखं निरूपयति। सर्वेषामिति। अन्यद्वेषानधीनद्वेषविषयत्वं दुःखस्य लक्षणम्। दुःखद्वेषाधीनद्वेषविषया हि कण्डकादिवारणाय अन्यद्वेषानधीनेति। एवं इष्ट-साधनताज्ञानजन्यत्वं इच्छालक्षणम्। अनिष्टसाधनताज्ञानजन्यत्वं द्वेषलक्षणम्। प्रयत्न-स्त्रिविधः। प्रवृत्तिः, निवृत्तिः, जीवनयोनियत्नश्चेति। इच्छाजन्या प्रवृत्तिः। द्वेषजन्या निवृत्तिः। जीवनादृष्टजन्या जीवनयोनियत्नः। अयं च प्राणधारणानुकूलः सर्वदैव-यावत्प्राणधारणमस्त्यतो योग्यत्वमप्यस्त्यधर्मादिवदन्यथायोग्यविभुविशेषगुणानां यौगपद्य-निषेधात्कदापि ज्ञानाद्यनुत्पत्तिप्रसंगेन व्यवहारविप्रलोपापत्तिरिति ज्ञेयम्। धर्मं लक्षयति। विहितेति। वेदागमादिविहितकर्मजन्यगुणत्वमित्यर्थः। एवं वेदागमादिनिषिद्धकर्मजन्य-गुणत्वमधर्मस्य लक्षणार्थो बोध्यः। संस्कारं विभजते। संस्कारेति। संस्कारत्वजातिमत्त्वं संस्कारस्य लक्षणं। वेगलक्षणं च परत्वापरत्वभिन्नत्वे सति मूर्तमात्रगुणत्वम्। भावनां लक्षयति। अनुभवजन्येति। अनुभवध्वंसवारणाय विशेष्यदलम्। स्मृतिहेतावात्मन्यति-व्याप्तिवारणाय अनुभवेति। अनुभवजन्ये स्मृतिहेतौ च अनुव्यवसाये अतिव्याप्तिवारणाय प्रकारः चिन्तनीयः। तादात्म्यसंबन्धानवच्छिन्नानुभवनिष्ठः जनकतानिरूपितजन्यत्वे सति स्मृतिहेतुत्वमित्यर्थेन एतद्दोषवारणमिति ध्येयम्[40]। वस्तुतः वेगत्वजातिमत्त्वं वेगस्य

---

40 तादात्म्यसंबन्धानवच्छिन्नानुभवनिष्ठःजनकतानिरूपितजन्यत्वेसतिस्मृतिहेतुत्वमित्यर्थेन-एतद्दोषवारणमितिध्येयम् एतद्वाक्यं च,छ पुस्तकयोरेव दृश्यते।

लक्षणं एवं स्थितस्थापकस्यापि स्थितस्थापकत्वजातिमत्त्वं बोध्यम्। कर्मणो लक्षणमाह। चलनात्मकमिति। द्रव्यगुणभिन्नत्वे सति जातिमत्त्वमित्यपि तल्लक्षणं बोध्यम्। सामान्यं लक्षयति। नित्यमिति। नित्यत्वे सति एकत्वे सति अनेकानुगतमित्यर्थः। घटत्वस्य नित्यत्वे सति एकत्वे सत्यनेकघटव्यक्तिषु समवेतत्वाल्लक्षणसंगतिः। न च सामान्ये संख्याया अभावात्कथमेकत्वसंख्याघटितलक्षणं तस्य संगच्छत इति वाच्यम्। एकार्थसमवाये-नैकत्वसंख्यायाः सामान्येऽपि सत्वेन तद्घटितलक्षणसंगतेः। गगनादिवारणायानेकेति संयो-गादिवारणाय नित्येति जलपरमाणुरूपादेर्नित्यत्वे सति अनेकसमवेतत्वादेकेति। रूपादेः प्रतिव्यक्तिविश्रान्तत्वेन एकस्यानेकानुगतत्वाभावान्नातिव्याप्तिः। विशेषं निरूपयति नित्यद्रव्येति। स्वतो व्यावृत्तत्वं तल्लक्षणम्। तच्च स्वभिन्नलिंगजन्यस्वविशेष्यकेतरभेदा-नुमित्यविषयत्वे सति स्वलिंगकेतर भेदानुमितिजनकत्वम्। गन्धादिवारणाय सत्यन्तम्। गुरुत्वाद्यतीन्द्रियधर्मिकेतरभेदानुमित्यसंभवात्तद्वारणाय विशेष्यदलम्। समवायं लक्षयति नित्य इति। नित्यत्वे सति संबन्धत्वमित्यर्थः। आकाशादिवारणाय विशेष्यदलम्। संयोगवारणाय नित्य इति। स्वरूपसंबन्धस्य विशेषणविशेष्यात्मकस्य स्वभिन्ननिरूपित-त्वाभावात्कालिकसंबन्धेन नित्यानामपि कालवृत्तित्वे कालिकसंबन्धवारणाय सर्वाधारता-नियामकीभूतसंबन्धभिन्नसंबन्धत्वं अपि देयम्। इत्थं च नित्यत्वे सति स्वसंबन्धिभिन्नत्वे सति सर्वाधारतानियामकीभूतसंबन्धभिन्नत्वे च सति संबन्धत्वं समवायलक्षणं

पर्यवसितम्। प्रागभावं लक्षयति। अनादिरिति। अभावसामान्यलक्षणन्तु द्रव्यादिषड्कान्योन्याभावत्वम्। अनादित्वमुत्पत्तिरहितत्वम्। सान्तत्वं च नाशप्रतियोगित्वम्। गगनादिवारणाय विशेष्यदलं घटादिवारणाय विशेषणम्। ध्वंसं लक्षयति। सादिरिति। उत्पत्तिमत्त्वे सति नाशरहितत्वमित्यर्थः। वस्तुतः उत्पत्तिमत्त्वे सति संसर्गाभाववत्त्वं ध्वंसस्य लक्षणं बोध्यम्। अन्यथा नाशस्य ध्वंसात्मकत्वेन तद्घटितस्य लक्षणत्वे अनवस्थादिदोषप्रसंग इति ध्येयम्। अत्यन्ताभावं लक्षयति। त्रैकालिक इति। त्रैकालिकत्वं नित्यत्वम्। तथा च नित्यत्वे सति तादात्म्यसंबन्धभिन्नसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वमित्यर्थः। अन्योन्याभाववारणाय तादात्म्यभिन्नेति संसर्गविशेषणम्। तादात्म्यसंबन्धभिन्नस्वरूपादिसंबन्धावच्छिन्नप्रतियोगिताके घटाद्यभावाभावस्वरूपे घटादावतिव्याप्तिवारणाय नित्येति। न च नित्यत्वे सति संसर्गाभाववत्त्वं इत्येवलक्षणमस्तु किमर्थं तादृशगुरुशरीरस्य लक्षणत्वं इति वाच्यम्। अन्योन्याभावभिन्नाभावत्वरूपसंसर्गाभावत्वघटितस्यान्योन्याभावद्वयगर्भस्य भवदीयलक्षणस्य अस्मदीयलक्षणापेक्षया लाघवासंभवादिति। अयमत्यन्ताभावः विशेषाभावसामान्याभावादिभेदेन बहुविधः। तथाहि नीलो घटो नास्तीत्यत्र विशेषाभावः घटो नास्तीत्यत्र सामान्याभावः। भूतलत्वविशिष्टघटो नास्तीत्यत्र विशिष्टाभावः। वह्निघटोभयं नास्तीत्यत्र उभयाभावः। मतविशेषे घटत्वेन वह्निर्नास्तीति प्रतीतिसाक्षिको व्यधिकरणधर्मावच्छिन्नाभावोऽपि इति।

अन्योन्याभावं लक्षयति तादात्म्येति। संयोगादिसंबन्धेन घटादिमत्यपि भूतलादौ भूतलं घटो नेति प्रतीतिसंभवात्स्वतादात्म्यवति स्वस्मिन्स्वभेदप्रतीत्यभावाच्च तादृशप्रतीतेः घटस्य तादात्म्यसंबन्धेनाभावो भूतले विषयः। स एव तादात्म्यसंबन्धावच्छिन्न-प्रतियोगिकाभावः अन्योन्याभाव इति। न्यायसूत्रोक्तषोडशपदार्थानामपि अस्मदुक्तसप्त-पदार्थेषु एवान्तर्भावान्नसप्तत्वक्षतिरिति वदन्प्रकरणमुपसंहरति। सर्वेषामेवेति काणादेति। काणादं कणादऋषिप्रणीतं सप्तपदार्थप्रतिपादकं न्यायं गौतमप्रणीतं षोडशपदार्थ-प्रतिपादकम्। एतच्छास्त्रद्वयप्रमेयाणामपि सप्तत्वेन संगृह्य निरूपणात् उभयोरपि शास्त्रयोः व्युत्पत्तिरस्य प्रकरणस्य फलमिति भावः।

तर्कसंग्रहवृत्तिमिमां बुधः शांकरो मुदितान्तर आतनो-
त्प्रीयतां परमेश्वर एनया सर्वलोकहृदन्तरवस्थितः।।

हरिहर इतिविद्वान्कश्चिदासादितांबा-
रमणगुरुकृपाम्भः पूर्णनेत्रत्रिभागः।
विगलितकलुषाणां पण्डितानां मनोज्ञं
ह्यकृतपरमसूक्ष्मालोकनानां निबन्धम्।।

शिवगिरिरमणश्रीपापनाशेशमौलि-

स्थिरतरलसदिन्दुक्षालिताध्याखिलाशे ।

शिवतरघटनाश्रीताम्रयोर्मध्यदेशे

घटजमुनिनिवासेस्नेहपुर्यांस्थितःसन् ॥

।।हरिः ओम् ।।

इति द्वितीयः अध्यायः समाप्तः । तृतीये अध्याये ग्रन्थस्यास्य समीक्षात्मकमध्ययनं कर्तुं यते ।

# तृतीयोऽध्यायः

# हरिहरीयस्य समीक्षात्मकम् अध्ययनम्।

**नमो नगेन्द्राधिपकन्यकाप-**

**स्फुरत्पदाम्भोजपरागभाजे।।**

**विघ्नाद्रिसंभेदनटङ्कराज-**

**त्कराम्बुजायादिसुपूजिताय।**

अत्र नगेन्द्राधिपकन्यकापस्फुरत्पदाम्भोजपरागभाजे विघ्नाद्रिसंभेदनटङ्कराजत्करा-म्बुजायादिसुपूजिताय नमः इत्यन्वयः। नगानां पर्वतानामिन्द्रः नगेन्द्रः हिमालयः इति षष्ठीतत्पुरुषसमासः। तस्याधिपः हिमवानिति पुनः षष्ठीतत्पुरुषसमासः। तस्य कन्यका पार्वतीति पुनः षष्ठीतत्पुरुषसमासः। पुनः पुनः स्फुरतीत्यर्थे पस्फुरतीति सन्नन्तं रूपम्। तस्य शतरि पस्फुरदिति रूपम्। पदमेव अम्भोजं कमलमित्यर्थे पदाम्भोजमिति कर्मधारसमासः। पस्फुरच्च तद् पदाम्भोजञ्चेति कर्मधारसमासः। तस्य पदाम्भोजस्य परागाः तान् परागान् भजते सेवते इति नगेन्द्राधिपकन्यकापस्फुरत्पदाम्भोजपरागभाग्

तस्मै नगेन्द्राधिपकन्यकापस्फुरत्पदाम्भोजपरागभाजे इति पदार्थः। इत्येवं विघ्ननाशकाय गणपतये नमः इति नमस्क्रियात्मकं मङ्गलमादौ विदधाति ग्रन्थकृदत्र।

गुरोः पदद्वन्द्वविचिन्तनाप्त-

प्रसाददूरीकृतमोहजालः।

विमत्सराणां विदुषां मुदर्थे

ह्यज्ञस्य लोकस्य च बोधनाय।।

करोमि यत्नं खलु तर्कसङ्ग्रह-

व्याख्यानरूपं वृषकेतुमानसः।

प्राचीननव्योभयसिद्धयुक्तिकं

समाश्रितो भूतदयावशादहम्॥

गुरोः पदद्वन्द्वविचिन्तनाप्तप्रसाददूरीकृतमोहजालः वृषकेतुमानसः भूतदयावशात् समाश्रितः अहम् (हरिहरशास्त्री इति शेषः) विमत्सराणां विदुषां मुदर्थे अज्ञस्य लोकस्य च बोधनाय हि खलु प्राचीननव्योभयसिद्धयुक्तिकं तर्कसङ्ग्रहव्याख्यानरूपं यत्नं करोमि इत्यन्वयः। एकतिङ्न्तत्वात् उभावपि श्लोकावेकान्वयौ। अतः उभयोरपि श्लोकस्य एकत्रैवान्वयो विहितः। गुरोः स्वगुरोः,पदस्य द्वन्द्वः पदद्वन्द्वः चरणयुगलम् इति

षष्ठीतत्पुरुषसमासः। पदद्वन्द्वस्य विचिन्तनं स्मरणम् इति षष्ठीतत्पुरुषसमासः। तेन आप्तश्च यः प्रसादश्चेति प्राप्तानुग्रहः इति यावत् इति कर्मधारयसमासः। मोहानां जालः संशयसमूहः इति षष्ठीतत्पुरुषसमासः। तादृशप्रसादेन दूरीकृतः परिहृतः इति तृतीयातत्पुरुषसमासः। पदद्वन्द्वविचिन्तनाप्तप्रसाददूरीकृतः मोहजालः यस्य सः इति अन्यपदार्थप्रधानः बहुव्रीहिः। अत्र हरिहरशास्त्रिणां स्वीयगुरोः पादसेवनेन प्राप्तेन ज्ञानेन तेषां सर्वोपि संशयो दूरीकृतः अतः तर्कसंग्रहस्य व्याख्यानरूपं ग्रन्थममुं लिखतीति कथयति। व्याख्याया अस्या रचनायां तस्य किं सामर्थमिति प्रश्नस्य समाधानरूपेण मङ्गलश्लोके पङ्क्तिरियं योजिता। स्वस्य आप्तत्वमनेन प्रमाणयति ग्रन्थकृत्। व्याख्यानेƒस्मिन् नव्यन्यायस्य वा प्राच्यन्यायस्य वा आश्रयः कृतः इति प्रश्नं समादधाति यथा प्राचीननव्योभयसिद्धयुक्तिकमिति। उभयोरपि न्यायशास्त्रस्य ज्ञानमादाय सयुक्तिकं व्याख्यानममुं लिखामीति। किमर्थमयं ग्रन्थो विरच्यते इति परामृशति यथा विमत्सराणां विदुषां मुदर्थे अज्ञस्य लोकस्य च बोधनायेति। व्याख्येयं मत्सरबुद्धीनां तार्किकाणां प्रश्नपरिहाराय, इत्थमेव तर्कशास्त्रमनधीतानाम् अध्ययनाय च उपकरोतीत्यर्थः।

सम्बन्धाभिधेयप्रयोजनकथनाच्छास्त्रविषये छात्राणां श्रोतृणां च श्रद्धा जायते। तथा चोक्तमत्रार्थे यथा-

**सिद्धिः श्रोतृप्रभृतीनां सम्बन्धकथनाद्यतः।**

**तस्मात् सर्वेषु शास्त्रेषु सम्बन्धः पूर्वमुच्यते।।**

**किमेवात्राभिधेयं स्यादिति पृष्टस्तु केनचित्।**

**यदि न प्रोच्यते तस्मै फलशून्यं तु तद्भवेत्।।**

**सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।**

**यावत्प्रयोजनं नोक्तं तावत्केन गृह्यते।। इति**

ग्रन्थारम्भे तावत् सर्वेषु शास्त्रेषु ग्रन्थाध्येतृप्रयोजकम् अनुबन्धचतुष्टयं ग्रन्थकृता निवेश्यते एव।

**अनुबन्धचतुष्टयम्।**

**<u>अधिकारी</u> -'विमत्सराणां विदुषां मुदर्थे ह्यज्ञस्य लोकस्य च बोधनाय'** इति मङ्गलश्लोके दृष्टत्वात् अयं ग्रन्थः बालानां कृते न भवति इति स्पष्टः। तर्कशास्त्रे प्रवृत्तमानाः जनाः एव अधिकारिणः इति।

**<u>विषयः</u> - 'करोमि यत्नं खलु तर्कसङ्ग्रहव्याख्यानरूपं'** इत्यस्मात् तर्कसंग्रहस्य व्याख्यानमेव अस्य ग्रन्थस्य विषयः इति स्पष्टम्।

**<u>सम्बन्धः</u>** - शास्त्रग्रन्थयोर्मध्ये प्रतिपाद्यप्रतिपादकसंबन्धः भवति।

**<u>प्रयोजनम्</u>**

'प्राचीननव्योभयसिद्धिः' - प्राचीनन्याये तथा नव्यन्याये सिद्धिर्भविष्यति इति प्रयोजनम्।

व्याख्यानस्य हरिहरीयस्यादौ व्याख्याता हरिहरमहोदयः तर्कसंग्रहस्य मूलस्यादौ किमर्थं मङ्गलं कृतं तथैव ग्रन्थानामादौ किमर्थं मङ्गलं कर्तव्यमिति च मङ्गलवादं विस्तरशः कथयति यथा - **प्रारीप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्तिकामनया शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नातीति।** ग्रन्थरचनायां तथा अध्ययनवेलायां संभवतां विघ्नानां ध्वंसार्थं शिष्या अपि मङ्गलमिदमाचर्युः इति धिया अन्नभट्टेन मङ्गलमिदं कृतमिति तदर्थः। पुनो व्याख्याता निधायेति प्रतीकमादाय मूलभूतं तर्कसंग्रहं व्याख्यातुमारभते यथा - **निधायेति**।

मङ्गलस्य विघ्नध्वंससमाप्तिसाधनत्वं कथं वक्तुं शक्यते यतोहि मंगलस्याकरणेपि नास्तिककृतेषु ग्रन्थेषु समाप्तिदर्शनात् कादम्बर्यादिषु कृतेपि मङ्गले समाप्त्यदर्शनाच्चेति अन्वयव्यतिरेकव्यभिचारात्मकं प्रश्नममुमुत्थाप्यादौ तस्य समाप्तिसाधनत्वं प्रमाणयति व्याख्याकारो यथा - **शिष्टाचारानुमितश्रुत्या मङ्गलस्य समाप्तिहेतुत्वोपगमात्** ग्रन्थादौ मङ्गलं कर्तव्यमेवेति। मङ्गलस्य समाप्तिसाधनत्वे ग्रन्थादौ कर्तव्यताकत्वे च शिष्टाचारानु-

मितश्रुतिरेव प्रमाणं तच्छ्रुत्योः प्रमाणीभूतमनुमानं महता ग्रन्थेन समर्थयति व्याख्याकारो यथा - मङ्गलं वेदबोधितकर्तव्यताकं अलौकिकाविगीतशिष्टाचारविषयत्वात् अग्निष्टोमादिवदिति। अत्रानुमाने दलप्रयोजनान्यपि वक्ति यथा - रात्रिभोजनादौ व्यभिचारवारणायालौकिकेति। अलौकिकत्वन्तु लौकिकेतरत्वं न तु वेदप्रतिपाद्यत्वम्। सिद्धसाधनताप्रसक्तेः। व्युत्क्रमप्रयुक्तश्राद्धादौ व्यभिचारवारणायाविगीतेति। ज्ञानविषय-स्वर्गादौ व्यभिचारवारणाय आचारेति। आचारः कृतिः। उद्देश्यतया अलौकिकाविगीत-शिष्टकृतिमति स्वर्गादौ व्यभिचारवारणाय विषयेति। विषयत्वञ्च विधेयत्वम्। अतो नोक्तदोषतादवस्थ्यम्। अविगीतत्वञ्च धर्मशास्त्राद्यविरुद्धत्वम्। अत एव विशेषणान्न कुर्यान्निष्फलं कर्मेति शास्त्रनिषिद्धजलताडनादिव्युदासात् शिष्टपदं स्पष्टार्थमिति। मङ्गलस्य वेदबोधितकर्तव्यताकत्वात् सफलत्वमपि सिद्धं पुनः तस्य समाप्तिहेतुत्वसिद्ध्यर्थं अनुमानान्तरं प्रयुज्यते यथा - मङ्गलं समाप्तिफलकम् समाप्त्यन्याफलकत्वे सति सफलत्वात्। यन्नैवं तन्नैवं इति। भूयः पूर्वमुत्थापितमन्वयव्यतिरेकव्यभिचारात्मकं प्रश्नं समाधत्ते यथा मङ्गलस्य समबलविघ्ननाशकत्वेन कादम्बर्यादौ अधिकबल-विघ्नसत्वात्समाप्त्यभावेपि अन्वयव्यभिचाराभावात् पापात्मकविघ्नस्य नास्तिकात्मनि भोगादिना विनाशसंभवात् स्वजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्यैव मंगलकार्यता-वच्छेदकत्वात् कारणस्यापि कार्यतावच्छेदककोटौ प्रवेशाङ्गीकारस्य आवश्यकत्वात्।

अन्यथा आलोकधूमपरामर्शयोः अन्यतरस्मिन्वह्न्यनुमित्युदयेन अन्यतरपरामर्शव्यभिचार-वारणार्थं तत्तत्परामर्शाव्यवहितोत्तरत्वस्य अनुमितौ निवेशाङ्गीकारस्यापि अनौचित्य-प्रसंगात्। तथा च व्यतिरेकव्यभिचारस्यापि अभाव इति।

पश्चात् व्याख्याकारः मूलस्थस्य मङ्गलश्लोकस्य व्याख्यां कुर्वाणो ग्रन्थं प्रविशति यथा **निधाय ध्यात्वा विश्वस्य जगतः ईशं नियन्तारमिति।** पदार्थकथनपरमिदं शास्त्रमिदमिति स्मारयन् अध्येतृणां स्पष्टप्रतिपत्तये मङ्गलश्लोके अन्नभट्टेन विहितानां पदानामर्थकथनमत्र व्यख्याकारेण क्रियते।

पश्चात् दशमद्रव्यस्य तमसः सत्त्वात् नव द्रव्याणीति कथनं कथं सङ्गच्छते इति विवृणोति यथा **नीलं तमश्चलतीत्यबाधितप्रतीतिबलेन तमसो नीलरूपचलनक्रियाश्रयत्वेन द्रव्यत्वे सिद्धे गन्धशून्यत्वात्स्पर्शराहित्यान्नीलरूपवत्त्वाच्च तस्य पृथिव्यां जलतेजसोर्वायौ गगनादौ चान्तर्भावासंभवात्। क्लृप्तद्रव्येभ्योऽतिरिक्तत्वमिति चेन्न। प्रौढप्रकाशकतेजो-ऽभावत्वेनैवोपपत्तौ अतिरिक्तत्वाकल्पनात्। न च तेजस एव तमोऽभावत्वमास्तामिति वाच्यम्। तथा सति तदीयसर्वानुभूतोष्णस्पर्शाश्रयतया द्रव्यान्तरकल्पनापातात्। इत्थञ्च तेजसस्तादृशस्पर्शाश्रयतया द्रव्यत्वावश्यकत्वे तमसि रूपक्रियाप्रतीतेः भ्रान्तिसामग्री**

दीपापसरणक्रियारूपोपाधिश्च नियामकाविति न किञ्चिदेतदिति। विषयोऽयं दीपिकायां न्यायबोधिन्याञ्च स्पष्टं तथाप्यत्राल्पेन यत्नेन ततोपि स्पष्टमवगमयति।

पश्चात् पृथिव्याः लक्षणं निरूपयति यथा गन्धवत्त्वं पृथिव्या लक्षणमित्यर्थ इति। गन्धवत्त्वरूपे मूलोक्तलक्षणे दोषान् आरोप्य तं परिष्करोति व्याख्याकारः यथा कालिकसंबन्धेन गन्धवति काले अतिव्याप्तिवारणाय समवायेन तद्वत्त्वं वाच्यम्। तथा च कालस्य जगदाधारतानियामकीभूतकालिकसंबन्धेनैव गन्थवत्त्वान्नातिव्याप्तिः। ननु उत्पन्नद्वितीयक्षणे नष्टपृथिव्यामव्याप्तिः तत्र गन्धाभावात्। उत्पन्नं द्रव्यं क्षणं निर्गुणन्तिष्ठतीति सिद्धान्तात्। अतस्तद्वारणाय गन्थसमानाधिकरणद्रव्यत्वव्याप्यजाति-मत्त्वमिति लक्षणार्थो बोध्यः। गन्धसमानाधिकरणत्वं दव्यत्वव्याप्यत्वञ्च जातौ विशेषणम्। गन्धसमानाधिकरणत्वं समवायेन गन्धाधिकरणे समवायेन वृत्तित्वम्। तेन कालिकसंबन्धेन गन्धाधिकरणजलवृत्तिद्रव्यत्वव्याप्यजलत्ववति जले नातिव्याप्तिः। न वा समवायेन तदधिकरणपृथिव्यां कालिकेन वृत्तिमत्तादृशजलत्ववति जलेऽतिव्याप्तिः। अत्र द्रव्यत्वव्याप्यत्वञ्च द्रव्यत्वन्यूनवृत्तित्वं न तु तदभाववदवृत्तित्वं तथा सति स्वाभाववद-वृत्तित्वरूपव्याप्यत्वस्य स्वस्मिन्नपि सत्त्वेन गन्धसमानाधिकरणद्रव्यत्वव्याप्यद्रव्यत्ववति जलादौ अतिव्याप्त्यापत्तेः। गन्थसमानाधिकरणद्रवत्वन्यूनवृत्तिधर्मं जलपृथिव्यन्यतरत्व-

**मादाय जले अतिव्याप्तिवारणाय जातीति। तद्वत्त्वमपि समवायेन बोध्यम्। तेन कालिकेन तथाविधजातिमति काले नातिव्याप्तिः।** दोषान् निवार्य परिष्कृतं लक्षणमाह व्याख्याकारः - **एवञ्चायं निष्कर्षः** इति। **समवायसंबन्धावच्छिन्नगन्धाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति।**

अत्र तर्कसंग्रहस्य प्रसिद्धां न्यायबोधिनीं दीपिकाञ्च व्याख्यामुल्लङ्घ्य दीपिकास्थं गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्वरूपं लक्षणं न्यायबोधिनीगतं गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वरूपञ्च लक्षणं परिष्कृत्य अत्यन्तं स्पष्टरूपेण निष्कृष्टं पृथिवीलक्षणं कथयति। यथा – **कालिकसंबन्धेन** इत्यादिना। केवलं गन्धवती पृथिवी इत्युक्ते कालादिष्वतिव्याप्तिः तेषु कालिकसंबन्धेन वर्तमानत्वात्। तद्दोषनिवारणार्थं समवायसंबन्धेन गन्धवत्त्वमिति लक्षणं परिष्कृतम्। गुणगुणिनोः समवाय एव संबन्धः इत्यस्मात्। पुनः तार्किकसिद्धान्तमेकं अवलम्ब्य लक्षणे अव्याप्तिदोषः दर्शयति यथा – **उत्पन्नमिति**। उत्पत्यनन्तरमेकक्षणं द्रव्याणि गुणकर्मरहितानि भवन्तीत्यर्थः। एवं चेत् उत्पन्नद्वितीयक्षणे नष्टपृथिव्यां अव्याप्तिदोषो भविष्यति गन्थराहित्यात्। एतद्दोषनिवारणार्थं लक्षणं परिष्करोति यथा - **गन्थसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वमिति**। गन्थाधि-

करणवर्तिनी या द्रव्यत्वव्याप्यजातिः तत् गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम् - पृथ्वीत्वमिति। एतदेव स्पष्टतया वदति हरिहरेण यथा - **गन्धसमानाधिकरणत्वं दव्यत्वव्याप्यत्वञ्च जातौ विशेषणम्** इति। गन्धसमानाधिकरणत्वं इत्यनेन समवायेन गन्धाधिकरणे समवायेन वृत्तित्वं बोध्यं। तेन कालिकसंबन्धेन गन्धाधिकरण-जलवृत्तिद्रव्यत्वव्याप्यजलत्ववति जले एवं समवायेन तदधिकरणपृथिव्यां कालिकेन वृत्तिमत्तादृशजलत्ववति जलेऽपि नातिव्याप्तिः। लक्षणे द्रव्यत्वव्याप्यत्वं इत्यत्र व्याप्यस्य लक्षणं वदति न्यूनवृत्तित्वमिति। स्वाभाववदवृत्तित्वमिति अन्यत्र यल्लक्षणमुक्तं तन्न समीचीनं भवति स्वाभाववदवृत्तित्वस्य स्वस्मिन्नपि सत्त्वात् इति। तथा सति द्रव्यत्वन्यूनवृत्तित्वस्य द्रव्यत्वे सत्वात् पृथ्वीलक्षणस्य द्रव्यान्तरेषु अतिव्याप्तिः भविष्यति। गन्धसमानाधिकरणद्रव्यत्वन्यूनवृत्तिजातित्वेन पृथ्वीत्वं लक्षयति चेत् पृथिवीजला-न्यतरत्वादिधर्मान् आदाय जलादिषु लक्षणातिव्याप्तिर्भविष्यति। अतः जातिशब्दो स्वीकृतः। तत्रापि समवायेन जातिमत्त्वस्य अस्वीकारे कालिकादिसर्वाधारीभूतसंबन्धैः पदार्थान्तरेष्वतिव्याप्तिर्भविष्यति। एवं दोषान् संदर्श्य परिहृत्य च अन्ते निष्कृष्टं लक्षणं वदति यथा – **समवायसंबन्धावच्छिन्नगन्धाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्ना-धेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति।**

समवायसंबन्धेन गन्धः यत्र वर्तते, तत्र समवायसंबन्धेन आधेयत्वं यस्याः द्रव्यत्वन्यूनवृत्तिजातेः (पृथ्वीत्वस्य), तस्याः समवायेन अधिकरणत्वमिति पर्यवसितोऽर्थः।

पुनः व्याख्याकारः पृथिव्याः लक्षणं यथा परिष्कृतं तत्स्मारयन् जलस्यापि निष्कृष्टं लक्षणं निरूपयति यथा **समवायसंबन्धावच्छिन्नशीतस्पर्शाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति निष्कर्षो ज्ञेय इति।**

अत्रापि निष्कृष्टलक्षणात्पूर्वं पूर्ववत् निरूपणं कर्तुं शक्यते। यथा – कालिकसंबन्धेन शीतस्पर्शवति काले अतिव्याप्तिवारणाय समवायेन तद्वत्त्वं वाच्यम्। तथा च कालस्य जगदाधारतानियामकीभूतकालिकसंबन्धेनैव शीतस्पर्शवत्त्वान्नातिव्याप्तिः। ननु उत्पन्नद्वितीयक्षणे नष्टजलेऽव्याप्तिः तत्र शीतस्पर्शाभावात्। उत्पन्नं द्रव्यं क्षणं निर्गुणन्तिष्ठतीति सिद्धान्तात्। अतस्तद्वारणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वमिति लक्षणार्थो बोध्यः। शीतस्पर्शसमानाधिकरणत्वं दव्यत्वव्याप्यत्वञ्च जातौ विशेषणम्। शीतस्पर्शसमानाधिकरणत्वं समवायेन शीतस्पर्शाधिकरणे समवायेन वृत्तित्वम्। तेन कालिकसंबन्धेन शीतस्पर्शाधिकरणपृथिवीवृत्तिद्रव्यत्वव्याप्यपृथिवीत्ववति पृथिव्यां नातिव्याप्तिः। न वा समवायेन तदधिकरणजले कालिकेन वृत्तिमत्तादृशपृथिवीत्ववति

पृथिव्यामतिव्याप्तिः। अत्र द्रव्यत्वव्याप्यत्वञ्च द्रव्यत्वन्यूनवृत्तित्वं न तु तदभाववदवृत्तित्वं तथा सति स्वाभाववदवृत्तित्वरूपव्याप्यत्वस्य स्वस्मिन्नपि सत्त्वेन शीतस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यद्रव्यत्ववति पृथिव्यादौ अतिव्याप्त्यापत्तेः। शीतस्पर्शसमानाधिकरणद्रव्यत्वन्यूनवृत्तिधर्मं जलपृथिव्यन्यतरत्वमादाय पृथिव्यां अतिव्याप्तिवारणाय जातीति। तद्वत्त्वमपि समवायेन बोध्यम्। तेन कालिकेन तथाविधजातिमति काले नातिव्याप्तिः इति। एवं दोषान् संदर्श्य परिहृत्य च अन्ते निष्कृष्टं लक्षणं वदति यथा – **समवायसंबन्धावच्छिन्नशीतस्पर्शाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति निष्कर्षो ज्ञेय इति।**

समवायसंबन्धेन शीतस्पर्शः यत्र वर्तते, तत्र समवायसंबन्धेन आधेयत्वं यस्याः द्रव्यत्वन्यूनवृत्तिजातेः (जलत्वस्य), तस्याः समवायेन अधिकरणत्वमिति पर्यवसितोऽर्थः।

व्याख्याकारः तेजसो निरूपणवेलायाम् आकरजं सुवर्णादीति मूलस्थं प्रतीकमादाय उष्णस्पर्शवत्त्वाभावात् सुवर्णं न तैजसं इति संशीय **सुवर्णं तैजसम् असति प्रतिबन्धके अत्यन्तानलसंयोगेपि अनुच्छिद्यमानद्रवत्वात्। यन्नैवं तन्नैवं यथा जलमिति** सुवर्णस्य तैजसत्वं समाधत्ते। **जलमध्यस्थघृतादौ अत्यन्तानलसंयोगे अनुच्छिद्यमानद्रवत्वादसतिप्रतिबन्धक इति। जलादावसति प्रतिबन्धके अनुच्छिद्यमानद्रवत्वात्**

तद्वारणाय अत्यन्तानलसंयोगेति। इत्थञ्च तस्य तैजसत्वसिद्धौ तदीयस्पर्शरूपयोः पार्थिवस्पर्शरूपाभ्याम् अभिभवेनाननुभवः इति। अत्र मनसि कुतूहलजननीयं कार्यमेकं कथयति ग्रन्थकारः यथा - चन्द्रादावपि जलीयस्पर्शाद्यभिभवादौष्ण्याद्यननुभवेऽपि न लक्षणाव्याप्तिरिति। चन्द्रस्तु तैजसपदार्थो भवति तत्र जलसान्निध्यमप्यस्तीत्यर्थः।

अनन्तरं वायुं निरूपयन् तस्य निष्कृष्टं लक्षणं पूर्ववत्कथयति यथा समवायसंबन्धावच्छिन्नरूपरहितत्वविशिष्टस्पर्शाधिकरणतानिरूपितसमवायसंबन्धावच्छन्नाधेयताकद्रव्यत्वन्यूनवृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वम् इति निष्कर्ष इति। एवञ्च लक्षणे दोषाणि आरोप्य दलानि परिष्करोति यथा अत्र रूपरहितत्ववैशिष्ट्यञ्च स्वरूपसंबन्धेन रूपाभाववति समवायसंबन्धेन वृत्तित्वम्। तेन कालिकादिसंबन्धेन रूपात्यन्ताभाववति पृथिव्यादौ नातिव्याप्तिः। न वा स्वरूपसंबन्धेन रूपात्यन्ताभावाधिकरणवाय्वादौ कालिकादिनावृत्तिमज्जलादिस्पर्शमादायातिव्याप्तिः। पृथिव्यादेः स्वरूपसंबन्धेनापि रूपप्रागभावादिमत्त्वात्तत्र अतिव्याप्तिवारणायात्यन्तेति। न च उत्पत्तिकालावच्छेदेन पृथिव्यादौ रूपात्यन्ताभावस्यापि सत्वात्तत्रातिव्याप्तिर्दुर्वारैवेति वाच्यम्। प्रतियोगिव्यधिकरणत्वेनाभावस्य विशेषणीयत्वात्। इत्थं च स्वरूपसंबन्धावच्छिन्नप्रतियोगिव्यधिकरणरूपात्यन्ताभावाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकस

मवायसंबन्धावच्छिन्नस्पर्शाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकद्रव्यत्वन्यून वृत्तिजातिनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति।

रूपरहितस्पर्शवान्  इत्यत्र केन संबन्धेन रूपाभावः इति चिन्त्यते रूपरहितत्वं च स्वरूपसंबन्धेन बोध्यमिति। वैशिष्ट्यं नाम संबन्धः। स्पर्शस्तु समवायसंबन्धेन। अनेन परिष्कारेण कालिकसंबन्धेन रूपाभाववति पृथिव्यादिषु नातिव्याप्तिः।

आकाशं लक्षयति शब्दगुणकमिति। अत्र शब्दवत्त्वमात्रेण निर्वाहे गुणपदं व्यर्थं सत्किञ्चिदर्थं ज्ञापयतीति न्यायेन समवायेन शब्दवत्त्वलाभाय। केवलं शब्दवत्त्वमात्रेण लक्षणसंभवे गुणपदस्य सार्थक्यं वदति समवायसंबन्धं ज्ञापयतीति। आकाशे शब्द एव विशेषगुणमिति द्योतनाय गुणपदमिति न्यायबोधिनीकारः। कालस्य तथा दिशः लक्षणयोः परिष्कारः तथा दलप्रयोजनानि समानं भवति। यथा - अतीतेति। अतीतादिव्यवहारासाधारणनिमित्तकारणत्वमित्यर्थः। तेन साधारणकारणे ईश्वरादृष्टादौ शब्दस्वरूपव्यवहारासाधारणसमवायिकारणे आकाशे च नातिव्याप्तिः। खण्डकालेऽतिव्याप्तिवारणायादिपदम्। तेन भविष्यद्वर्तमानयोरपि संग्रहः। दिशो लक्षणमाह। प्राचीति। प्राच्यादिव्यवहारासाधारणनिमित्तकारणमित्यर्थः। पदकृत्यं पूर्ववत्। दिगुपाधावतिव्याप्तिवारणायादिपदम्। अत्र असाधारणनिमित्तकारणत्वस्य

कण्ठताल्वाद्यभिघातेऽपि सत्वात् विभुत्वस्यापि लक्षणे निवेशनीयमिति पदकृत्यकारः। अनन्तरं आत्मानं निरूप्य प्रथमं लक्षणं वदति हरिहरः, यथा - **समवायेन ज्ञानवत्त्वमित्यर्थः इति।** अन्यथा कालिकादिसंबन्धान्तरैः द्रव्यान्तरेषु अतिव्याप्तिर्भवेत्। आत्मानं विभज्य जीवेश्वरयोः स्वरूपं निरूपयति यथा - **विभजते स द्विविध इति। ईश्वरः सर्वनियन्ता सर्वज्ञः सर्वज्ञानी एक एवेति। उपासकानुजिघृक्षया विष्णुविरिञ्चाद्यनेकस्वरूपेणावस्थितावपि तस्यैक्यमेवेति भावः। जीवः प्रतिशरीरं भिन्न इति। सर्वशरीरवृत्येकजीवांगीकारे सुखदुखाद्यभेदप्रसंगादिति भावः। विभुरिति। अणुत्वे सर्वशरीरव्यापिसुखाद्यनुपलब्धिप्रसङ्गादिति। मध्यमपरिमाणत्वे नाशप्रसंगेन कृतहानाकृताभ्यागमप्रसंगात् महत्वमिति भावः। अत एव नित्यत्वमपि तस्येत्याह नित्येति।** शास्त्रेस्मिन् सुखदुखानां भोक्तृरूपेण आत्मानं परिकल्प्यते अत एव जीवैक्यांगीकारे सर्वेषां सुखदुखाद्यभेदप्रसंगात् जीवानां अनेकत्वं तथा अणुत्वपरिमाणत्वे आशरीरव्यापिसुखाद्यनुपलब्धिप्रसंगात् मध्यमपरिमाणत्वे नाशप्रसंगात् च महत्परिमाणं तथा कृतहानाकृताभ्यागमप्रसंगात् नित्यत्वमपि स्वीकरोति इति। अनन्तरं मनसः निरूपणं आरभते **मनो लक्षयतीति।** प्रथमं मूलग्रन्थे अन्नंभट्टेनोक्तलक्षणं निरूपयति **सुखादीति। सुखसाक्षात्कारकारणत्वे सति इन्द्रियत्वम्मनसो लक्षणमित्यर्थः। एवं दुःखसाक्षात्कारकारणत्वे सति इन्द्रियत्वमित्यपि लक्षणानि ज्ञेयानि। अत एव सुखादीत्यादिपदमुपात्तम्।** साक्षात्कारो नाम प्रत्यक्षज्ञानम्।

सुखदुखादीनां आत्मनि मानसप्रत्यक्षमेव संभवतीत्यतः सुखादिसाक्षात्कारकारणेन्द्रियत्वं मनसि युज्यतेति। लक्षणघटकीभूतेन्द्रियस्य लक्षणं चिन्तयति यथा - **अत्रेन्द्रियत्वं शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम्। श्रोत्रेऽव्याप्तिवारणय शब्देतरेति।** शब्देतरेत्यनुक्ते उद्भूतविशेषगुणानाश्रयत्वस्य श्रोत्रेन्द्रियेऽसिद्धत्वात् तत्राव्याप्तिरित्यर्थः। **चक्षुरादौ तद्वारणायोद्भूतेति।** शब्देतरविशेषगुणानाश्रयत्वे इत्युक्ते रूपादिविशेषगुणाश्रयीभूतचक्षुरादिषु अव्याप्तिरिति। **चक्षुरादावेव शब्देतरसंयोगादिगुणाश्रयेऽव्याप्तिवारणाय विशेषेति।** शब्देतरोद्भूतगुणत्वं संयोगे तस्य आश्रयत्वं चक्षुरादौ अत एव अनाश्रयत्वविरहात् तत्राव्याप्तिरिति। लक्षणस्य प्रथमदलस्य प्रयोजनमुच्यते- **आत्मन्यतिव्याप्तिवारणाय विशिष्टपूर्वदलम्** इति। पुनः द्वितीयदलमधिकृत्य विचारं करोति यथा - **कालादावतिव्याप्तिवारणाय ज्ञानकारणेतीति।** मनःसंयोगाश्रयत्वस्य कालादिषु सत्त्वात् ज्ञानकारणमनःसंयोगाश्रयत्वं वक्तव्यमिति। **कालादौ रूपाभावप्रत्यक्षकारणीभूतचक्षुःसंयुक्तविशेषणतात्मकसंनिकर्षघटकसंयोगाश्रये तत्रातिव्याप्तिवारणाय मन इति।** कालस्य रूपो नास्ति। तत्र रूपाभावप्रत्यक्षे संभवे अभावस्य चक्षुरिन्द्रियेण सह संयुक्तविशेषणता सन्निकर्षः। चक्षोः कालेन सह संयोगः कालस्तु अभावविशिष्टः इति तत्र संयोगाश्रयत्वस्य काले सत्वात् अतिव्याप्तिदोषवारणाय मनस्संयोगाश्रयत्वमिति। मनसः लक्षणे इन्द्रियपदमुपात्तं। इन्द्रियलक्षणं तु मनोघटितं भवतीति अत्र अनवस्थादोषं

आरोप्य तन्निवारयितुं लक्षणान्तरमुच्यते हरिहरः यथा - **वस्तुतः सुखादिसाक्षात्कारासाधारणकारणत्वे सति विशेषगुणानाश्रयत्वम्मनसो लक्षणम्। अतो लक्षणघटकेन्द्रियत्वस्यापि मनोघटितत्वेन नानवस्थादिदोषप्रसंगः।** दलप्रयोजनं वदति - **कार्यमात्रे साधारणकारणकालादौ अतिव्याप्तिवारणाय असाधारणेति। आत्मन्यतिव्याप्तिवारणाय द्वितीयदलम्।** पुनः दोषान् दर्शयित्वा परिष्करोति यथा - **नन्वेवमपीति। सुखादावतिव्याप्तिः। तत्साक्षात्कारे तस्यापि कारणत्वात् विशेषगुणानाश्रयत्वाच्चेति चेन्न सुखादिसाक्षात्कारनिरूपिततादात्म्यसम्बन्धानवच्छिन्नकारणत्वस्य विवक्षितत्वात्। विषयतासंबन्धेन ज्ञानं प्रति विषयस्य सुखादेस्तादात्म्यसंबन्धेनैव कारणत्वात्। तत्संबन्धानवच्छिन्नकारणत्वस्य तत्राभावात्।** विषयतासंबन्धेन ज्ञानं सुखे वर्तते, सुखं तु तत्र तादात्म्यसंबन्धेन अस्ति। अतः लक्षणस्य सुखादिषु अतिव्याप्तिवारणाय तादात्म्यसंबन्धानवच्छिन्नकारणत्वं वक्तव्यमिति। किन्तु समवायसंबन्धेन सुखनिष्ठात्मनि आत्मनः स्वरूपसंबन्धेनैव वर्तनात् प्रथमदलस्य परिष्कारेण द्वितीयदलं व्यर्थमिति वक्तुं न शक्यते इति ग्रन्थकारः यथा - **न च समवायेन सुखादिसाक्षात्कारं प्रति आत्मनोपि तादात्म्यसंबन्धेनैव कारणत्वात्तदनवच्छिन्नकारणत्वस्य तत्राभावेन आत्मन्यतिव्याप्तिविरहात् द्वितीयदलं व्यर्थमिति वाच्यम्। इष्टापत्तेः। न चैवमपि मनस्संयोगेऽतिव्याप्तिः। तस्य सुखादिसाक्षात्कारे समवायसंबन्धेन कारणत्वादिति वाच्यम्। द्रव्यत्वे सतीति विशेषणात्।**

मनस्संयोगेऽतिव्याप्तिवारणाय द्रव्यत्वे सतीत्यपि योजनीयमित्यर्थः। द्रव्यलक्षणप्रकरणमुपसंहृत्य गुणनिरूपणमारभते यथा - रूपस्य लक्षणमाहेति। चक्षुरिति। चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वमित्यर्थः। अत्र लक्षणघटकीभूतपदानां प्रयोजनमधिकृत्य चिन्तयति यथा - संख्यादावतिव्याप्तिवारणाय मात्रपदम् । न च प्रभाभित्तिसंयोगे चक्षुर्मात्रग्राह्यगुणत्वसत्वात् तत्रातिव्याप्तिवारणाय गुणपदस्य विशेषगुणपरत्वावश्यकत्वात्तत एव संख्यादावपि सामान्यगुणेऽतिव्याप्तिविरहान्मात्रपदं व्यर्थमिति वाच्यम्। सांसिद्धिकद्रवत्वेऽतिव्याप्तिवारकत्वात् तत्रापि चक्षुर्ग्राह्यविशेषगुणत्वसत्वात्। चक्षुर्मात्रग्राह्यत्वञ्च चक्षुरितरेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वम्। चक्षुरितरेन्द्रियाग्राह्यत्वमात्रं न सम्यक् अतीन्द्रियधर्मादिविशेषगुणेऽतिव्याप्त्यापत्तेः। ग्राह्यत्वं च अत्र लौकिकप्रत्यक्षस्वरूपयोग्यत्वम्। तेन धर्मवानयमिति अलौकिकचाक्षुषविषये धर्मादौ नातिव्याप्तिः। न वा चक्षुरिन्द्रियजन्यलौकिकप्रत्यक्षाविषयपरमाणुरूपेऽव्याप्तिः। एवमग्राह्यत्वमपि लौकिकप्रत्यक्षस्वरूपयोग्यत्वाभाववत्वम्। तेन रूपी घट इति त्वाचालौकिकप्रत्यक्षविषयत्वे रूपस्य नाऽव्याप्तिः। न वा त्वाचलौकिकविषयपृष्ठपातित्वेन तद्विषयत्वेऽपि रूपस्याव्याऽप्तिः। रूपस्य त्वाचलौकिकप्रत्यक्षे सुरभिचन्दनमिति चाक्षुषे सुरभिभानवत्भानसंभवेऽपि तत्स्वरूपयोग्यत्वाभावात्। पूर्वोक्तदोषान् मनसि निर्धार्य निष्कृष्टमेकं लक्षणं उच्यते यथा - इत्थञ्च चक्षुरितरेन्द्रियजन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वाभावनिरूपितस्वरूपसंबन्धाव-

च्छिन्नाधिकरणतानिरूपितसमवायसंबन्धावच्छिन्नाधेयताकचक्षुर्जन्यलौकिकप्रत्यक्षस्वरूप योग्यत्वविशिष्टविशेषगुणत्वनिरूपितसमवायसंबन्धावच्छिन्नाधिकरणत्वमिति फलितोर्ऽथः इति। स्वरूपसंबन्धेन चक्षुरितरेन्द्रियजन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वाभावं रूपे तत्र समवायसंबन्धेन विशेषगुणत्वजातिः, चक्षुर्जन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वविशिष्टा सा जातिः समवायसंबन्धेन यत्र तिष्ठति सः रूपः इति लक्षणसमन्वयः इति। किन्तु अत्र ग्रन्थकारस्य किञ्चित् प्रमादं संभवति इति मन्यते परमाणुगतरूपे संभव्यमानाव्याप्तिः परिहर्तुं अशक्यात्। रसगन्धस्पर्शयोः लक्षणानामपि समानदोषः द्रष्टुं शक्यते। रसं लक्षयति रसनग्राह्य इति। रसनेन्द्रियजन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वविशिष्टगुणत्व-मित्यर्थः। तेन रसनेन्द्रियजन्यालौकिकप्रत्यक्षविषये गुणान्तरे नातिव्याप्तिः। न वा तज्जन्यलौकिक-प्रत्यक्षाविषयपरमाणुरसेऽव्याप्तिः। गन्धं निरूपयति। घ्राणेति। घ्राणजन्यलौकिकसाक्षा-त्कारस्वरूपयोग्यत्वविशिष्टगुणत्वमित्यर्थः। पदकृत्यं पूर्ववत्। स्पर्शं निरूपयति। त्वगिन्द्रियेति। अत्रापि भर्जनकपालतद्गतवह्न्योः संयोगस्य त्वगिन्द्रियमात्रग्राह्यगुणत्वा-त्तद्वारणाय गुणपदं विशेषगुणपरं बोध्यम्। शेषं पूर्ववत्। रूपादिचतुष्टयस्य द्रव्यादिषु कथमुत्पत्तिविनाशः संभवति, तमधिकृत्य न्यायवैशेषिकानां मध्ये प्रचलितं सिद्धान्तद्वयं च स्पष्टतया वर्ण्यते हरिहरेण यथा - **रूपादिचतुष्टयं पृथिव्यां पाकजमिति। पाकश्च पूर्वरूपनाशको रूपान्तरारम्भको वा विजातीयतेजःसंयोगः।**

पीलुपाकवादिनां वैशेषिकाणां मते परमाणुष्वेव पाकात्पूर्वरूपनाशो रूपान्तरोत्पत्तिश्च। पिठरपाकवादिनां नैयायिकानां मते त्ववयव्यवयवेषु सर्वत्र पाकात्तन्नाशस्तदुत्पत्तिश्च एवं रसादित्रिकस्यापि भिन्नभिन्नपाकान्नाशश्चोत्पत्तिश्च। यथा तृणपुञ्जनिक्षिप्तेष्वाम्रफलादिषु कस्मिंश्चिद्रूपमेव परावर्तते कस्मिंश्चिद्रस एव कस्मिंश्चिद्गन्ध एव कस्मिंश्चित्स्पर्श एवेति सर्वानुभवसिद्धम्। एवं पृथिवीमात्रे भिन्नभिन्नपाकाच्चतुष्टयोत्पत्तिः ज्ञेया। अन्यथा एकदैव सर्वेषामुत्पत्तिप्रसङ्ग इति ध्येयम्। अन्यत्रापाकजमिति। अन्यत्र जलादित्रिके अपाकजं रूपादिपरावृत्यदर्शनान्न हि शतधाध्मातेऽपि जले रूपपरावृत्तिर्भवति। जलपरमाणुगतरूपरसस्पर्शानां तेजःपरमाणुगतरूपस्पर्शयोः वायुपरमाणुगतस्पर्शस्य च नित्यत्वन्तदन्यत्र समस्तानान्तेषां अनित्यत्वमित्यभिप्रेत्याह नित्यमनित्यञ्चेति। संख्यां लक्षयति। एकत्वादिव्यवहारेति एकत्वादिव्यवहारासाधारणनिमित्तकारणत्वमित्यर्थः। द्वित्वादिकन्तु सर्वत्रानित्यमेवेति। द्वित्वादेरपेक्षाबुद्ध्युदयनाशाभ्युपगमादिति भावः। द्वित्वादीनां सर्वत्रानित्यत्वं कथं वक्तुं शक्यते इति बालानां कृते स्पष्टीकरोति अपेक्षाबुद्धिजन्यत्वादिति। परिमाणं निरूपयति। मानेति। मानव्यवहारासाधारणनिमित्तकारणत्वनिरूपितसर्वाधारतानियामकीभूतसंबन्धा-न्यसंबन्धावच्छिन्नाधिकरणत्वमित्यर्थः। अत्र मानव्यवहारासाधारणकारणमित्युक्ते आकाशेऽतिव्याप्तिः अतः निमित्तपदस्य स्वीकारः तथापि कण्ठताल्वाद्यभिघाते अतिव्याप्तिसंभवात् असाधारणपदेन निमित्तकारणानां मध्ये

यदसाधारणमित्यर्थः। पुनः कालादिसाधारणकारणेष्वतिव्याप्तिवारणार्थं सर्वाधारतादिकम्। अतो न काले कालिक-संबन्धेन तद्वत्त्वमादायातिव्याप्तिः इति। पृथक्त्वं निरूपयति। पृथगिति। संयोगं निरूपयति। संयुक्तेति। विभागं निरूपयति। संयोगनाशक इति। संयोगनाशकत्व-विशिष्टगुणत्वमित्यर्थः। संयोगनाशकत्वं पूर्वसंयोगनाशके कर्मण्यतिव्याप्तं अतो विशेष्यदलम्। संयोगनाशको गुणो विभागेति अन्नंभट्टेन यदुक्तं तन्न सम्यक् प्रतियोगिनः ध्वंसं प्रति तादात्म्यसंबन्धेन कारणत्वात् संयोगस्य गुणत्वाच्चेत्यतः तादात्म्यसंबन्धानवच्छिन्नेति यथा - संयोगनाशकत्वञ्च संयोगनाशजनकत्वं तत्संयोगस्याप्यस्त्यतो तादात्म्यसंबन्धानवच्छिन्नसंयोगनाशकारणत्वविशिष्टगुणत्वं तदर्थो बोध्यः इति। परत्वापरत्वयोर्लक्षणमाह। परापरेति। परव्यवहारासाधारणनिमित्तकारणं परत्वं अपरव्यवहारासाधारणनिमित्तकारणमपरत्वमित्यर्थः। गुरुत्वं लक्षयति। आद्यपतनेति। द्वितीयादिपतने वेगस्याप्यसमवायिकारणत्वादाद्येति। आद्यपतनकारणत्वस्य द्रव्येऽपि सत्वादसमवायीति। द्रवत्वं लक्षयति। आद्यस्यन्दनेति। परत्वादिगुरुत्वपर्यन्तं मूलग्रन्थोक्तलक्षणानां विचारं कृत्वा अनन्तरं स्नेहं लक्षयति चूर्णादीति। चूर्णादिपिण्डीभावहेतौ कालेऽतिव्याप्तिवारणाय गुणपदम्। विशिष्टलक्षणस्य धर्माधर्मस्वरूपे अदृष्टेऽतिव्याप्तत्वाद्धेतुपदस्यासाधारणहेत्वर्थकत्वं बोध्यम्। अदृष्टस्य च कार्यमात्रे साधारणकारणत्वान्न तत्रातिव्याप्तिः। चूर्णादिपिण्डीभावहेतुरूपेण स्नेहो नाम गुणान्तरं किमर्थं स्वीकरणीयमिति पूर्वपक्षवादः।

तन्निरास्यते यथा - न च द्रवत्वस्यैव चूर्णादिपिण्डीभावहेतुत्वमस्त्विति वाच्यम्। सुवर्णादिगतद्रवत्वादौ तददर्शनात्। न च संसिद्धिकद्रवत्वस्यैव स्नेहकार्यकारित्वसम्भवात्स्नेहांगीकारो निरर्थक इति वाच्यम्। सांसिद्धिकद्रवत्वाभाववद्घृतयोगे पिण्डीभावाभावप्रसंगात्। न च घृतादौ जलमात्रवृत्तिस्नेहस्याभावात् दूषणसाम्यमिति वाच्यम्। घृतादौ जलांशसत्वात्तस्य च प्रकृष्टस्नेहवत्त्वेन दाहानुकूलत्वात् न चातितप्तघृतादियोगे तन्नस्यात्। तत्र जलांशासंभवादिति वाच्यम्। द्रव्यस्वाभाव्याद्यावत् घृतनाशः तत्र जलांशसत्वाभ्युपगमात्हिमकरकादिनिष्ठसांसिद्धिकद्रवत्वस्नेहयोः अदृष्टविशेषेण प्रतिरोधात्। घृताद्यन्तर्गतजलांशे प्रतिबन्धकवशात् सांसिद्धिकद्रवत्वस्यादर्शनादित्यादिकं सूक्ष्मदृशा अनुसंन्धेयमिति। शब्दं निरूपयति। श्रोत्रेति। बुद्धिं निरूपयति। सर्वव्यवहारेति। सर्वव्यवहारासाधारणनिमित्तकारणत्वमित्यर्थः। तेन कालाकाशादौ नातिव्याप्तिः। बुद्धिरेव ज्ञानमिति व्यवह्रियत इत्यर्थः। विभजते तद्विविधमिति। स्मृतेर्लक्षणमाह। संस्कारेति। संस्कारजन्यत्वविशिष्टज्ञानत्वमित्यर्थः संस्कारध्वंसवारणाय विशेष्यदलम्। अनुभववारणाय विशेषणम्। संस्कारविषयकानुभवे संस्कारजन्यत्वविशिष्टज्ञानत्वसत्वात्तद्वारणाय तादात्म्यसंबन्धानवच्छिन्नसंस्कारनिष्ठकारणतानिरूपितकार्यत्वं पूर्वदलेन विवक्षणीयं स्वविषयकज्ञाने संस्कारस्य तादात्म्यसंबन्धेन कारणत्वान्न तत्रातिव्याप्तिः। न च पूर्वानुभवसंस्कारजन्ये सोऽयं देवदत्त इत्याकारकप्रत्यभिज्ञाने अतिव्याप्तिरिति वाच्यम्। तत्र

**स्मरणस्यैव हेतुत्वेन संस्कारस्यापि हेतुत्वाकल्पनात्।** बुद्धिमधिकृत्य व्याख्यायां चर्चामारभते बुद्धिरेव ज्ञानमिति व्यवह्रियतेति प्रतीकमादाय। ज्ञानं द्विविधं स्मृतिः अनुभवश्च। संस्कारजन्यत्वविशिष्टज्ञानत्वं स्मृतेर्लक्षणं। अत्र लक्षणे संस्कारजन्यत्वमात्रोक्ते संस्कारध्वंसे अतिव्याप्तिर्भवति ध्वंसं प्रति प्रतियोगिनः कारणत्वात्। तथा विशेषणानुक्ते अनुभवे अतिव्याप्तिर्भवति यतो हि अनुभवस्यापि ज्ञानत्वात्। यदि आत्मनि अयं संस्कारः इत्यात्मके संस्कारविषयकानुभवे संस्कारजन्यत्वविशिष्टज्ञानत्वस्य सत्त्वात् अतिव्याप्तिरिति तर्हि (संस्कारस्य अतीन्द्रियत्वात् प्रत्यक्षं न भवति)। ज्ञानं प्रति विषयस्य तादात्म्यसंबन्धेन कारणत्वमिति नियमं स्वीकृत्य अत्र तादात्म्यसंबन्धानवच्छिन्नकारणता एव पूर्वदलेन विवक्षिता इति। सोयं देवदत्त इत्याकारके स्मृत्यनुभवात्मके प्रत्यभिज्ञाने लक्षणातिव्याप्तिः तत्रापि संस्कारजन्यत्वविशिष्टज्ञानत्वस्य सत्वात्। प्रत्यभिज्ञायाः साक्षात् हेतुत्वं स्मृतौ तथा परम्परया हेतुत्वं संस्कारे वर्तते इत्यस्मात्। किन्तु हरिहरस्य मतानुसारं जन्यत्वपदेन साक्षात्कारणजन्यत्वमेव स्वीकरणीयं, अतो नोक्तदोषः इति।

**हरिहरीये अनुभवं लक्षयति तद्भिन्नमिति। स्मृतिभिन्नत्वे सति ज्ञानत्वमित्यर्थः। संस्कारनिष्ठतादात्म्यसंबन्धानवच्छिन्नजनकत्वनिरूपितजन्यत्वाभाववत्त्वे सति ज्ञानत्वमिति पर्यवसितोऽर्थः।** अनुभवस्य लक्षणे स्मृतिभिन्नत्वं किमिति वदति यथा – संस्कारनिष्ठतादा-

त्म्यसंबन्धानवच्छिन्नजनकत्वनिरूपितजन्यत्वाभाववत्त्वमिति। संस्कारनिष्ठतादात्म्यसंबन्धानवच्छिन्नजनकत्वनिरूपितजन्यत्वं स्मृत्यां तदभाववत्त्वं स्मृतिभिन्ने इत्यर्थः। विभजते। स द्विविधेति। यथार्थानुभवलक्षणमाह। तद्वतीति। तद्वद्विशेष्यतानिरूपिततत्प्रकारताशाल्यनुभवत्वमित्यर्थः। तेन रङ्गरजतयोरिमे रजतरङ्गे इत्याकारकसमूहालम्बनभ्रमस्य वस्तुतो रजतत्ववन्निष्ठविशेष्यताकत्वरजतत्वप्रकारताकत्वयोस्तथा रंगत्ववद्विशेष्यकत्वरंगत्वप्रकारकत्वयोश्च सत्वेऽपि न क्षतिः। तादृशभ्रमे रजतत्वेन रंगस्य रंगत्वेन रजतस्य चावगाहनात् रजतत्वप्रकारतायाः रंगत्ववद्रंगविशेष्यत्वनिरूपितत्वेन रंगत्वप्रकारतायाश्च रजतत्ववद्रजतविशेष्यतानिरूपितत्वेन तादृशभ्रमनिष्ठरजतत्वरंगत्वप्रकारतयोः रजतत्ववद्रजतविशेष्यत्वरंगत्ववद्रंगविशेष्यत्वनिरूपितत्वाभावेन नातिव्याप्तिः। न च घटाभाववति घटत्वे घटप्रकारिकायां घटे घटत्वं इत्याकारकप्रमायां अव्याप्तिः इति वाच्यम्। तत्संबन्धवद्विशेष्यतानिरूपिततत्संबन्धप्रकारताशालित्वस्य विवक्षितत्वात्घटत्वेऽपि घटसंबन्धसत्वान्न तादृशप्रमायामव्याप्तिः। न चाग्रे वृक्षः कपिसंयोगाभाववानिति भ्रमेऽतिव्याप्तिः। भ्रमस्य मूलावच्छेदेन कपिसंयोगाभाववद्वृक्षविशेष्यतानिरूपिततत्संबन्धप्रकारताकत्वादिति वाच्यम्। तादृशस्थले तदवच्छेदकावच्छेदेन तत्प्रकारकत्वस्यैव प्रमालक्षणघटकत्वात्। तादृशभ्रमस्य कपिसंयोगाभावावच्छेदकमूलावच्छेदेन कपिसंयोगाभावप्रकारकत्वानवगाहनात् नातिव्याप्तिः। न चैवमपि भूतलं घटाभाववदिति भ्रमज्ञानेऽतिव्याप्तिः तस्य

**भूतलत्व-वति भूतलत्वप्रकारकत्वादिति वाच्यम्। सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायेन तत्र तदंशे प्रमात्वस्याप्यावश्यकत्वात्।** यथार्थानुभवस्य मूलोक्त-लक्षणं प्रतीकरूपेण वदति तद्वतीति। तद्वति तत्प्रकारकोनुभवो यथार्थः इति। तद्वद्विशेष्यतानिरूपिततत्प्रकारताशाल्यनुभवत्वं निष्कृष्टलक्षणं। तस्य प्रयोजनं उच्यते तेनेति। रङ्गरजतयोः इमे रजतरङ्गे इत्याकारके समूहालम्बनभ्रमे रङ्गस्य रजतत्वेन रजतस्य रङ्गत्वेनापि अवगाहनेपि रङ्गत्ववद्विशेष्यकरङ्गत्वप्रकारकत्वस्य तथा रजतत्ववद्विशेष्यक-रजतत्वप्रकारकत्वस्यापि तत्र सत्वात् तद्वति तत्प्रकारको यथार्थः इति लक्षणस्य समन्वयः अतिव्याप्तिदोषश्च। किन्तु निरूप्यनिरूपकसंबन्धघटितलक्षणस्य स्वीकारात् एतद्दोष-परिहारः रङ्गत्वनिष्ठप्रकारतायाः रङ्गत्ववन्निष्ठविशेष्यतया निरूपितत्वात् एवं रजतत्वनिष्ठप्रकारतायाः रजतत्ववन्निष्ठविशेष्यतया निरूपितत्वात्। रङ्गत्ववन्निष्ठविशेष्यता-निरूपितरङ्गत्वप्रकारतायाः तथा रजतत्ववन्निष्ठरजतत्वप्रकारतायाः समूहालम्बनभ्रमस्थले अनवगाहनाच्च। घटे घटत्वं इत्याकारकप्रमायां सप्तम्यर्थो विशेषणत्वं इति नियमात् घटस्य विशेषणता। किन्तु घटत्वे घटस्य असत्वात् लक्षणस्याव्याप्तिरिति पूर्वपक्षः। अत्र समाधानस्तु एवं भवति यथा यत्र यत्संबन्धो अस्ति तत्र तत्संबन्धेनानुभवः इत्यर्थात् घटत्वेऽपि घटसंबन्धसत्त्वात् नाव्याप्तिः। तदेव उक्तं अस्ति यथा तत्संबन्धवद्वि-शेष्यतानिरूपिततत्संबन्धप्रकारताशालित्वस्य विवक्षितत्वादिति। घटत्वनिष्ठविशेष्यता-

निरूपितविशेषणसंबन्धो घटे वर्तते, तत्संबन्धवन्निष्ठविशेष्यता घटत्वे, तन्निरूपिता तत्संबन्धवन्निष्ठप्रकारता, तच्छालिज्ञानमित्यर्थः। अग्रे वृक्षः कपिसंयोगाभाववानिति भ्रमसंभवे अतिव्याप्तिरिति पूर्वपक्षः, शाखावच्छेदेन कपिसंयोगवद्वृक्षविशेष्यता-निरूपिततत्संबन्धप्रकारताकत्वात् इति। किन्तु तादृशस्थले तदवच्छेदकावच्छेदेन तत्प्रकारकत्वस्यैव प्रमालक्षणघटकत्वात् तादृशभ्रमस्य कपिसंयोगाभावावच्छेदकमूला-वच्छेदेन कपिसंयोगाभावप्रकारकत्वानवगाहनात् नातिव्याप्तिदोषः इति। पुनरपि दोषः दर्शयति न चैवमपीति। भूतले घटः वर्तते। तत्र एकस्य घटाभाववद्भूतलमिति भ्रमः संभवति। तत्रापि भूतलत्ववति भूतलत्वप्रकारकत्वात् यथार्थानुभवस्य लक्षणसमन्वयः इति पूर्वपक्षारोपः। घटाभाववद्भूतलमित्यत्र घटाभावः धर्मः, भूतलो धर्मिः च। सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्ययः इति न्यायेन धर्मिण्यंशे भूतलज्ञाने प्रमात्वं तथा प्रकारांशे घटाभावज्ञाने अप्रमात्वमिति। **अयथार्थानुभवं निरूपयति। तदभाववतीति। शुक्ताविदं रजतमिति ज्ञानस्य रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपितरजतत्वप्रकारताकत्वा-ल्लक्षणसङ्गतिः।**

प्रतीकेन तदभाववति तत्प्रकारकोऽनुभवत्वमिति मूलोक्तलक्षणं तदभाव-वद्विशेष्यतानिरूपिततत्प्रकारताशालित्वानुभवत्वमिति निष्कृष्टलक्षणं च संदर्श्य उदाहरणे

समन्वयति यथा रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपितरजतत्वप्रकारताकत्वाल्लक्षणसङ्गतिः इति। यथार्थानुभवं विभजते। यथार्थेति। प्रसङ्गात्तत्करणस्यापि चातुर्विध्यं दर्शयति। तत्करणमपीति। प्रमाकरणमपीत्यर्थः। प्रमाकरणत्वं प्रमाणसामान्यलक्षणं बोध्यम्। ननु प्रमाकरणं प्रमाणमित्यत्र प्रमाकरणत्वस्यैव लक्ष्यतावच्छेदकत्वे लक्षणलक्ष्यतावच्छेदकयोरैक्येन सिद्धसाधनताप्रसक्तिरिति चेत् न। प्रमाणपदवाच्यत्वस्य लक्ष्यतावच्छेदकत्वात्। एवमेव प्रत्यक्षकरणं प्रत्यक्षं इत्यादावपि द्रष्टव्यम्। करणलक्षणमाह। असाधारणेति। कालादावतिव्याप्तिवारणायासाधारणेति। घटादिकारणकपालसंयोगादेरप्येतल्लक्षणवत्त्वात् व्यापारवत्त्वे सतीति पूरणीयम्। कारणं लक्षयति कार्येति। कार्यनियतत्वञ्च कार्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम्। तत्कार्येऽप्यस्तीत्यतः पूर्ववृत्ति इति। कार्यपूर्ववृत्तित्वं कदाचिद्रासभादावप्यस्तीत्यतो नियतेति। न च कार्यनियतपूर्ववृत्तिदण्डत्वदण्डरूपादेर्वारणायानन्यथासिद्धत्वस्य लक्षणे निवेशनीयत्वात् तत एवान्यथासिद्धरासभादेरपि वारणसंभवे नियतपदं निरर्थकमिति वाच्यम् अन्यथासिद्धत्वस्याननुगमेनानन्यथासिद्धेत्यनेन तत्तदन्यथासिद्धप्रतियोगिकानन्तभेदानां निवेशनीयत्वात्। नियतपदेन केषाञ्चिदन्यथासिद्धानां वारणे तदितरेषां केषाञ्चिदेवान्यथासिद्धानां भेदाः निवेशनीयाः इति लाघवमभिप्रेत्य नियतत्वोपादानमिति। असाधारणं कारणमिति करणस्य लक्षणम्। असाधारणपदानुपादाने

साधारणकारणेषु ईश्वरकालादिषु अतिव्याप्तिः। घटे कार्ये कपालद्वयसंयोगस्यापि करणलक्षणसंभवात् तन्निवारणार्थं व्यापारवत्वे सति असाधारणं कारणं करणलक्षणत्वेन धर्तव्यमिति। व्यापारश्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकः[1]। कपालद्वय-संयोगस्य कुलालजन्यत्वे सति कुलालजन्यघटजनकत्वेपि द्रव्यान्यत्वात् न दोषः। कार्यनियतपूर्ववृत्तित्वं कारणलक्षणम्। प्रथमं पदानां प्रयोजनं वदति कार्यनियतत्वं कार्येप्यस्तीत्यतः पूर्ववृत्तीति तथा कार्यपूर्ववृत्तित्वं रासभादौ सत्त्वात् नियतेति। दण्डत्वं, दण्डरूपं इत्यादिषु करणलक्षणस्यातिव्याप्तिः तेषु कार्यनियतपूर्ववृत्तित्वसत्वात्। ते अन्यथासिद्धाः भवन्ति। तेषां निवारणार्थं अनन्यथासिद्धत्वं लक्षणे निवेशनीयमिति हरिहरः। येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धम्[2]। यथा दण्डेन दण्डरूपं दण्डत्वं च घटं प्रति। रासभादेः अन्यथासिद्धत्वेनैव वारणात् नियतपदं किमर्थमिति प्रश्नः। **लाधवत्वं प्रयोजनमिति**। अन्यतासिद्धिशून्यत्वम् अनन्यतासिद्धत्वम्, अत एव तत्तदन्यथासिद्धप्रतियोगिकानन्तभेदानां निवेशनीयत्वात् गौरवत्वम्।

[1] टीका - पदकृत्यम्। तर्कसंग्रहः 105

[2] टीका - दीपिका । तर्कसंग्रः 103

नियतपदोपादानेन केषञ्चिदन्यथासिद्धानां वारणेन तदितरेषां अन्यथासिद्धानां भेदाः एव अनन्यथासिद्धेत्यनेन निवेशनीयाः इति लाघवत्वं प्रयोजनः इति।

कार्यलक्षणमाह कार्यमिति। कारणं विभजते। कारणमिति। तत्राद्यं लक्षयति यत्समवेतमिति।समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्व मित्यर्थः। समवायसंबन्धेन घटं प्रति कपालस्य तादात्म्यसंबन्धेनैव कारणत्वात्तत्र लक्षणसंगतिः। समवायसम्बन्धावच्छिन्नकार्यत्वनिवेशात्प्रतियोगितासंबन्धेन स्वध्वंसं प्रति तादात्म्यसंबन्धेन निमित्तकारणे घटादौ नातिव्याप्तिः। तादात्म्यसंबन्धावच्छिन्नकारणत्व-निवेशात्समवायेन घटादिकं प्रति समवायसंबन्धेन कारणकपालसंयोगादौ नातिव्याप्तिः। त्रिविधकारणमध्ये प्रथमं समवायिकारणं लक्षयति समवायसंबन्धावच्छिन्नेति। समवायसंबन्धावच्छिन्नकार्यतायाः अस्वीकारे प्रतियोगितासंबन्धेन घटध्वंसप्रतियोगिनः घटस्य घटे तादात्म्यसंबन्धेन वृत्तित्वाच्च निमित्तकारणे अतिव्याप्तिः, तथा असमवायिकारणे अतिव्याप्तिवारणाय कारणतावच्छेदकत्वेन तादात्म्यसंबन्धस्वीकारः इति। असमवायिकारणं लक्षयति। कार्येणेति। कार्येण सहैकस्मिन्निति कारणेन सहैकस्मिन्निति पृथक्लक्षणद्वयं बोध्यम्। पृथक्दृष्टान्तद्वयानुरोधात्। इत्थमत्र लक्षणद्वयानुगमः। समवायसंबन्धावच्छिन्नकार्यतानिरूपितसमवायस्वसमवायिसमवेत-

**त्वान्यतरसंबन्धावच्छिन्नकारणत्वमिति।** यथा तर्कसंग्रहे एकेन वाक्येन लक्षणद्वयमुक्तं तथा अत्र व्याख्यानमपि कृतम्। कार्येण सह एकस्मिन्नर्थे समवेतं सत् कारणमिति प्रथमं यदुक्तं तदाह – समवायसंबन्धावच्छिन्नकार्यतानिरूपितसमवायसंबन्धावच्छिन्नकारणत्वमिति। तथा कारणेन सहैकस्मिन्नर्थे समवेतं सत् कारणमिति द्वितीयलक्षणमाह समवायसंबन्धा-वच्छिन्नकार्यतानिरूपितस्वसमवायिसमवेतत्वसंबन्धावच्छिन्नकारणत्वमिति। **निमित्तकारणं लक्षयति। तदुभयभिन्नमिति। समवाय्यसमवायिभिन्नत्वविशिष्टकारणत्व-मित्यर्थः। न च तुरीवेमादेः स्वगतरूपादिसमवायिकारणत्वात्समवायिकारणभिन्नत्वं दुर्घटमिति वाच्यम्। समवायिकारणत्वभिन्नमसमवायिकारणत्वभिन्नं च यत्कारणत्वं तद्वत्वे तात्पर्यकल्पनात् तथा च तुरीवेमादेः समवायित्वेऽपि तद्भिन्नकारणताकत्वस्यापि संभवादिति। करणलक्षणमुपसंहरति। तदेतदिति।** पटस्य निमित्तकारणानां तुरीवेमादीनां समवायिकारणत्वमस्ति तानिगतरूपादीनां प्रतीत्यतः समवायिकारणभिन्नत्वं कथं वक्ष्यतेत्याशङ्क्य प्रश्नं समाधत्ते – तत्र समवायित्वेऽपि तद्भिन्ननिमित्तकारणत्वस्यापि संभवात् तद्वत्वे तात्पर्यकल्पनादिति। **प्रत्यक्षप्रमाणलक्षणमाह। प्रत्यक्षेति। प्रत्यक्षप्रमां लक्षयति इन्द्रियेति। इदं लक्षणं जन्यज्ञानस्यैव लक्ष्यत्वाभिप्रायेण ईश्वरप्रत्यक्षस्यापि लक्ष्यत्वे ज्ञानाकरणकत्वे सति ज्ञानत्वं प्रत्यक्षलक्षणं बोध्यम्। अनुमित्यादेश्च व्याप्तिज्ञाना-दिज्ञानकरणत्वान्न तत्रातिव्याप्तिः। ज्ञानाकरणके घटादावतिव्याप्तिवारणाय विशेष्यदलम्।**

प्रत्यक्षप्रमायाः इन्द्रियार्थसन्निकर्षजन्यत्वेन लक्षणे उक्ते ईश्वरप्रत्यक्षे अव्याप्तिः तस्य नित्यत्वात्। अतः ज्ञानाकरणकत्वे सति ज्ञानत्वं लक्षणं बोध्यमिति। अनुमितेः व्याप्तिज्ञानजन्यत्वात् उपमितेः सादृश्यज्ञानजन्यत्वात् शाब्दस्य शब्दज्ञान-जन्यत्वात् च न दोषः। केवलं विशेषणमात्रोक्ते ज्ञानभिन्नकपालादिकरणकेषु घटादिषु अतिव्याप्तिः तद्वारणाय ज्ञानत्ववत्त्वम्। **प्रत्यक्षं विभजते। तद्विविधमिति। निर्विकल्पक-लक्षणमाह। निष्प्रकारकमिति। विशेषणविशेष्ययोर्वैशिष्ट्यानवगाहिघटघटत्वे इत्याकारकं ज्ञानं निर्विकल्पकमित्यर्थः। घट इति विशिष्टज्ञानात्पूर्वं विशेषणीभूतघटत्वज्ञानेन भाव्यं विशिष्टज्ञाने विशेषणज्ञानस्य हेतुत्वात्। अतो निर्विकल्पात्मकं विशेषणज्ञानं स्वीक्रियते। तस्यापि सविकल्पकत्वे तत्रापि विशेषणज्ञानान्तरं तत्राप्यन्यत्तत्राप्यन्यदिति मूलक्षतिकार्यनवस्थाप्रसंगादिति। सविकल्पकं लक्षयति सप्रकारकमिति। विशेषण-विशेष्यवैशिष्ट्यावगाहिज्ञानमित्यर्थः। उदाहरति। यथेति।** प्रत्यक्षप्रमां विभज्य प्रथमं निर्विकल्पकं लक्षयति, स्वरूपं उच्यते यथा घटघटत्वे इति। तत्तु विशेषणविशेष्ययोर्वैशिष्ट्यानवगाहि भवति। वैशिष्ट्यं नाम संबन्धम्। किमर्थं निर्विकल्पात्मकं ज्ञानं स्वीक्रियते इति चेत् उच्यते - विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्वादिति। घटज्ञानं विशिष्टज्ञानं, तं प्रति घटनिष्ठघटत्वस्य विशेषणस्य ज्ञानं कारणमिति। एवं घटत्वज्ञानं प्रति पुनरपि विशेषणान्तरज्ञानस्य स्वीकारे अनवस्थादोषः

भविष्यति। अत एव प्रकारताशून्यज्ञानस्य[3] निर्विकल्पस्य स्वीकारः। यस्मिन् ज्ञाने विशेषणं, विशेष्यं तयोः संबन्धं च ज्ञानस्य विषयाणि भवन्ति, तादृशं ज्ञानं सविकल्पकमित्युच्यते । **इन्द्रियार्थसन्निकर्षं विभज्य दर्शयति प्रत्यक्षेति। चक्षुषेति। चक्षुर्ग्रहणं त्वङ्मनसोरपि द्रव्यग्राहकयोरुपलक्षणार्थम्। तथा च इत्थमत्र कार्यकारणभावः।** षड्विधेषु इन्द्रियार्थसन्निकर्षेषु प्रथमं संयोगं विशदीकरोति चक्षुर्ग्रहणमिति। त्रीणि इन्द्रियाणि द्रव्यग्राहकसमर्थानि। द्रव्यप्रत्यक्षं प्रति कार्यकारणभावमाह यथा – **द्रव्यवृत्ति-लौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुसंयोगस्य त्वाचप्रत्यक्षत्वावच्छिन्नं प्रति त्वक्संयोगस्य मानसप्रत्यक्षत्वावच्छिन्नं प्रति मनःसंयोगस्य च क्रमेण हेतुतैवं द्रव्यसमवेतरूपरसगन्धस्पर्शसुखादिवृत्तिलौकिकविषयतासंबन्धेन तत्तदिन्द्रियजन्यप्रत्यक्ष-त्वावच्छिन्नं प्रति तत्तदिन्द्रियसंयुक्तसमवायस्य हेतुता। द्रव्यसमवेतसमवेत-रूपत्वरसत्वादिवृत्तितादृशसंबन्धेन तत्तदिन्द्रियजन्यप्रत्यक्षत्वावच्छिन्नं प्रति तत्तदिन्द्रिय-संयुक्तसमवेतसमवायस्य हेतुता।** द्रव्यप्रत्यक्षज्ञानं लौकिकविषयतासंबन्धेन द्रव्ये वर्तते। तत्र चाक्षुषत्वावच्छिन्नं चाक्षुषप्रत्यक्षं प्रति चक्षुसंयोगस्य हेतुत्वम्। चक्षुषा घटप्रत्यक्षजनने ज्ञानं विषयतासंबन्धेन घटे वर्तते तत्रैव चक्षुरिन्द्रियस्य संयोगात् इति। एवं

---

3 टीका - न्यायबोधिनी । तर्कसंग्रः p.no117

त्वाचप्रत्यक्षत्वावच्छिन्नं प्रति त्वक्संयोगस्य तथा मानसप्रत्यक्षत्वावच्छिन्नं प्रति मनःसंयोगस्य च हेतुत्वम्। मनसा इन्द्रियाणां तथा आत्मनः च प्रत्यक्षं संभवति। अत्र **इन्द्रियार्थसन्निकर्षेण एकस्मिन्घटे ज्ञाते तदुत्तरक्षणं घटा इत्येवं निखिलघटविषयकं अलौकिकसन्निकर्षेण चाक्षुषमेव प्रत्यक्षं भवति। तत्र सन्निकृष्टघटेतरघटेष्वपि विषयतासंबन्धेन चाक्षुषस्य सत्वात्तत्र च चक्षुसंयोगस्याभावाद्व्यभिचारः। तद्वारणाय विषयतायां लौकिकत्वनिवेशः। एतत्प्रपञ्चस्त्वग्रे भविष्यति।** यत्र एकस्मिन् घटे ज्ञाते तदुत्तरक्षणं घटा इत्येवं निखिलघटविषयकं ज्ञानम् उत्पद्यते तत्र अलौकिकसन्निकर्षं कारणं, चाक्षुषप्रत्यक्षं कार्यम्। अत्र चाक्षुषत्वावच्छिन्नप्रत्यक्षस्य विषयतासंबन्धेन निखिलघटेषु सत्वात् तेषु चक्षुसंयोगाभावात् च द्रव्यवृत्तिविषयतासंबन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुसंयोगस्य कारणमित्युक्ते व्यभिचारः। तद्वारणाय लौकिकविषयतासंबन्धेन इति। **विषयनिष्ठप्रत्यासत्त्यायं कार्यकारणभावः। आत्मनिष्ठ-प्रत्यासत्यात्वेवम्।** कार्यकारणयोः अधिकरणरूपेण प्रथमं विषयं स्वीकृतमित्यर्थः। विषयतासंबन्धेन ज्ञानस्य विषये सत्वात्। अनन्तरं आत्मनिष्ठप्रत्यासत्या कार्यकारणभावः कीदृशमिति वदति - **समवायसंबन्धेन चाक्षुषलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति स्वाश्रयचक्षु-संयुक्तमनसंयोगाश्रयत्वसंबन्धेन चक्षुसंयोगस्य हेतुता। स्वपदं चक्षुसंयोगादिपरिचायकम्। निरुक्तसंबन्धेन द्रव्यसमवेतचाक्षुषलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति स्वव्यापारिचक्षुसंयुक्त-**

**मनःसंयोगाश्रयतासंबन्धेन चक्षुसंयुक्तसमवायस्येत्येवं कार्यकारणभावोवसेयः। चक्षुषा** घटप्रत्यक्षे जनने चाक्षुषलौकिकप्रत्यक्षत्वम् अवच्छेदकम्। तेन अवच्छिन्नं ज्ञानं समवायसंबन्धेन आत्मनि वर्तते। ज्ञानविषये घटे चक्षुरिन्द्रियस्य संयोगात् चक्षुसंयोगं कारणम्, तत्तु स्वाश्रयचक्षुसंयुक्तमनसंयोगाश्रयत्वेन आत्मनि स्थितम्। स्वशब्देन चक्षुसंयोगं,तस्य आश्रयः चक्षुः, तेन संयुक्तः मनः आत्मनि संयोगसंबन्धेन वर्तते इति। अनेन संबन्धेन स्थितत्वात् अनेन संबन्धेनैव कारणत्वम्। एवं द्रव्यसमवेतस्य प्रत्यक्षे समवायसंबन्धेन आत्मनि वर्तमानद्रव्यसमवेतलौकिकचाक्षुषज्ञानं प्रति द्रव्यसमवेत-लौकिकचाक्षुषत्वं अवच्छेदकम्। द्रव्यसमवेते पदार्थे चक्षुरिन्द्रियस्य संयुक्तसमवाय-सन्निकर्षत्वात् चक्षुसंयुक्तसमवायस्य ज्ञानं प्रति कारणत्वम्। ग्रन्थे स्वशब्देन चक्षुसंयुक्तसमवायः ग्रहणीयम्। सम्बन्धस्यास्य व्यापारत्वेन स्वीकारे तस्य आश्रयस्य चक्षुरिन्द्रियस्य व्यापारित्वम्। तेन व्यापारिणा संयुक्तो मनः संयोगसंबन्धेन आत्मनि वर्तते अतः स्वव्यापारिचक्षुसंयुक्तमनःसंयोगाश्रयतासंबन्धेन चक्षुसंयुक्तसमवायस्य कारणत्वम्।

**ननु परमाणुनिष्ठरूपादावपि चक्षुसंयुक्तसमवायसत्त्वात्तत्प्रत्यक्षं कुतो न स्यात्। न च रूपादिप्रत्यक्षे स्वाश्रयमहत्वस्य रूपत्वादिप्रत्यक्षे स्वाश्रयाश्रयमहत्वस्य च कारण-त्वात्परमाणुरूपादेः स्वाश्रयपरमाणौ महत्वाभावान्न तत्प्रत्यक्षमिति वाच्यम्। एवमपि तदीयरूपत्वादेः परमाणुनिष्ठपृथिवीत्वादेश्च प्रत्यक्षं स्यात्घटरूपे परमाणुरूपे च**

रूपत्वजातेरेकत्वात्तदाश्रयाश्रये घटे महत्वसत्वात्पृथिवीत्वस्यापि परमाणुघटादावेकस्य स्वाश्रयघटे महत्वसत्वादिति चेन्न। महत्वोद्भूतरूपावच्छिन्नचक्षुसंयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषे तथाविधसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे कारणत्व-कल्पनात्। तथा च परमाणुचक्षुसंयोगस्य महत्वावच्छिन्नत्वाभावात्तत्र पृथिवीत्वादेः तत्समवेतरूपादौ रूपत्वादेश्च प्रत्यक्षापत्त्यसंभवात्। घ्राणादौ पृथिवीत्वस्य तदीयरूपादौ रूपत्वादेश्च प्रत्यक्षवारणाय उद्भूतरूपावच्छिन्नेति विशेषणम्। घ्राणादिनिष्ठ-चक्षुरादिसंयोगस्य उद्भूतरूपावच्छिन्नेति विशेषणम्। घ्राणादिनिष्ठचक्षुरादिसंयोगस्य उद्भूतरूपावच्छिन्नत्वाभावान्नातिप्रसंगः। एवमालोकसंयोगावच्छिन्नत्वमपि तत्र देयम्। तेनोपरिदेशावच्छेदेनालोकसंयोगस्य अधोदेशे चक्षुसंयोगस्य च सत्वे घटादेर्न प्रत्यक्षापत्तिः। एवं मह्त्वोद्भूतस्पर्शावच्छिन्नत्वक्संयोगतत्संयुक्तसमवायतत्संयुक्तसमवेत-समवायानां त्वाचप्रत्यक्षे कारणत्वं बोध्यम्। तेन त्रसरेण्वादेर्न त्वाचप्रत्यक्षापत्तिः। तत्र उद्भूतस्पर्शाभावात्। एवं श्रोत्रसमवायस्य तत्समवेतसमवायस्य च शब्दप्रत्यक्षं शब्दत्वादिप्रत्यक्षं प्रति च कारणत्वं बोध्यम्। अत्र श्रोत्रस्याकाशत्वेन शब्दाश्रयत्वात् इन्द्रियत्वेन तद्ग्राहकत्वाच्च न संयोगस्य सन्निकर्षघटकतेति ध्येयम्। तत्र चक्षुरिन्द्रियस्य परमाणुनिष्ठरूपेण सह संयुक्तसमवायसंबन्धसत्वेऽपि परमाणुरूपस्य तद्गतरूपत्वस्य च प्रत्यक्षं कुतो न संभवतीति प्रश्नः। परमाणुरूपादेः स्वाश्रयस्य परमाणोः महत्वस्य

तद्गतरूपत्वादेः स्वाश्रयाश्रयस्य परमाणोः महत्वस्य च अभावादिति उक्ते तत्र दोषो भविष्यति - रूपत्वजातेः घटे सत्वात् घटस्य रूपत्वाश्रयाश्रयत्वात् रुपत्वजातेरेकत्वाच्च परमाणुनिष्ठरूपत्वस्य स्वाश्रयाश्रयमहत्वमस्तीत्यतः तस्य चाक्षुषप्रत्यक्षं स्यात्। एवं घटनिष्ठपृथिवीत्वस्य परमाणुनिष्ठपृथिवीत्वस्य च एकत्वात् पृथिवीत्वाश्रयमहत्वसत्वाच्च परमाणोः प्रत्यक्षापत्तिः। तन्निवारणाय चक्षुसंयुक्तस्य महत्वविशेषणं देयम्। यथा महत्वोद्भूतरूपावच्छिन्नचक्षुस्संयुक्तसमवायस्य द्रव्यसमवेतचाक्षुषे तथाविधसमवेतसम-वायस्य द्रव्यसमवेतसमवेतचाक्षुषे च कारणत्वम्। घ्राणेन्द्रियस्य द्व्यणुकत्वात् परमाणुमपेक्ष्य महत्परिमाणसत्वादपि तस्य प्रत्यक्षो कुतो न संभवति इति चेत् वदति उद्भूतरूपाभावत्वात्। अतः उद्भूतरूपावच्छिन्नेति।आलोकसंयोगावच्छिन्नत्वमपि देयं अन्यथा उपरिदेशावच्छेदेन आलोकसंयोगसत्वेऽपि चक्षुसंयुक्ताधोदेशे महत्परिमाणस्य उद्भूतरूपस्य च सत्वात् प्रत्यक्षापत्तिः। त्वाचप्रत्यक्षस्य कारणत्वं त्रिविधं - महत्वोद्भूतस्पर्शावच्छिन्नत्वक्संयुक्ततत्संयुक्तसमवायतत्संयुक्तसमवेतसमवायानि इति। त्र्यसरेण्वादिषु महत्वसत्वादपि तेषां उद्भूतरूपाभावात् न प्रत्यक्षापत्तिरिति उक्तम्। श्रोत्रेन्द्रियेण शब्दप्रत्यक्षे संभवे कः सन्निकर्षः इति। श्रोत्रेन्द्रियः स्वरूपेण आकाशो भवति। शब्दस्तु आकाशस्य गुणः च । गुणगुणिनोः समवाय एव सन्निकर्षः। अतः न संयोगस्य सन्निकर्षघटकतेति ध्येयमिति हरिहरः।

**षष्ठं सन्निकर्षं दर्शयति। अभावप्रत्यक्षेति। द्रव्यवृत्यभावप्रत्यक्षे इन्द्रियसंयुक्त-विशेषणतासन्निकर्षः। द्रव्यसमवेतवृत्यभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेषणताद्रव्य-समवेतसमवेतवृत्यभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता। घटाभाववद्भूतल-मित्यादौ अभावस्य विशेषणता भूतले घटाभाव इत्यादौ तु विशेष्यता एवमभावस्य विशेषणविशेष्यभावसन्निकर्षेण ग्रहः।** अभावप्रत्यक्षे विशेषणविशेष्यः सन्निकर्षेति अन्नंभट्टेन यदुक्तं तत् विशदीकरोति द्रव्यवृत्तीति। घटाभाववद्भूतलमित्यत्र घटाभावो विशेषणं भूतलं तु विशेष्यम्। अतः भूतले घटाभावप्रत्यक्षे इन्द्रियसंयुक्तविशेषणता सन्निकर्षः। पूर्ववत् द्रव्यसमवेतवृत्त्यभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेषणता एवं द्रव्यसमवेतसमवेतवृत्त्यभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता च। किन्तु भूतले घटाभावः इत्यत्र घटाभावस्य विशेष्यता सप्तम्यन्तस्य भूतलस्य विशेषणत्वात्। अतः अभावस्य विशेषणविशेष्यभावो सन्निकर्षः इत्युक्तम्। **केचित्त्वभावप्रत्यक्षे योग्यानुपलब्धेः कारणत्वमभ्युपजग्मुः। तथाहि अनुपलब्धिर्नाम प्रतियोग्युपलम्भाभावः घटाभावप्रतियोगिनो घटादेः उपलंभे सति घटाभावो न जायते। अतस्तदनुपलंभस्य घटाभावप्रत्यक्षे कारणत्वं तत्र योग्यत्वमपि देयम्। अन्यथा धर्माधर्मादिरनुपलंभात् आत्मादौ तदभावस्य स्तम्भादौ पिशाचानुपलम्भात्तदभावस्य च प्रत्यक्षप्रसंगात्।** अभावप्रत्यक्षे इन्द्रियार्थसन्निकर्षादतिरिक्तं योग्यानुपलब्धिरिति कारणमप्यस्तीति केचन

वदन्ति। प्रतियोग्युपलंभाभावः इति तस्यार्थः। घटाभावप्रत्यक्षे अभावप्रतियोगिनः घटस्य उपलंभो नास्ति, यदि तस्योपलब्धिः भवति चेत्तर्हि घटाभावो न जायते। किन्तु आत्मादौ धर्माधर्मादेः अनुपलंभात् स्तंभादौ पिशाचानुपलंभाच्च ते तान्यधिकरणेषु नास्तीति वक्तुं न शक्यते इत्यतः योग्यत्वं स्वीकृतम्।

योग्यत्वं च प्रतियोगिसत्वप्रंजनप्रसंजितप्रतियोगिकत्वम्। तथा च धर्माद्यभाव-प्रतियोगिनो धर्मादेः सत्वप्रसंजनेन सत्वापादनेन  धर्माद्युपलंभस्य च यद्यत्रात्मनि धर्मः स्यात्तर्हि उपलभ्येत। इत्यापादनासंभवात्। एवं स्तम्भादौ पिशाचसत्वापादनेन पिशाचो-पलंभस्यापादनासंभवाच्च न तत्र अनुपलब्धेर्योग्यत्वम्। अत एवान्धकारे घटानुपलंभेऽपि न घटाभावचाक्षुषापत्तिः। यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादनासंभवेन अन्धकारे योग्या-नुपलब्धेरभावात्। न च स्तंभादौ पिशाचादेरन्योन्याभावप्रत्यक्षं न स्यात्तत्र योग्यप्रति-योग्यनुपलंभाभावादिति वाच्यम्। अन्योन्याभावग्रहस्थले प्रतियोगिता-वच्छेदकानुपलब्धेरेव कारणत्वात् स्तम्भादौ पिशाचत्वोपलंभस्य यद्यत्र पिशाचत्वं स्यात्तर्हि स्तंभत्ववत् उपलभ्येतेत्यापादनसंभवात्तत्र योग्यानुपलब्धिसत्वात्। एवञ्च अनुपलब्धेरेव सर्वत्राभावग्रहनिर्वाहे इन्द्रियस्याश्रयग्रहोपक्षीणस्य अभावप्रत्यक्षे कारणत्वाभावादिति तन्मतम्। प्रत्यक्षे करणत्वेन क्लृप्तेन्द्रियेणैव अभावग्रहस्यापि सम्भवे अनुपलम्भस्य

**सहकारित्वमात्रेण अकारणत्वात्प्रमाणान्तरकल्पनागौरवात् अभावं साक्षात्करोमि इत्यनुव्यवसायविरोधाच्चेति।** योग्यत्वस्य लक्षणं वदति – प्रतियोगिसत्वप्रसंजनप्रसंजित-प्रतियोगिकत्वमिति प्रतियोगिनः घटस्य सत्वप्रसंजने सत्वापादने सति तत्प्र-संजितज्ञानप्रतियोगित्वं घटे सत्त्वात् घटस्य योग्यत्वम्। एवं स्तम्भादौ पिशाचसत्वापादनेन पिशाचोपलंभस्य आपादनासंभवात् तस्य न योग्यत्वम्। योग्यत्वास्वीकारे सति अन्धकारे घटानुपलंभे तस्याभावस्य चाक्षुषप्रत्यक्षापत्तिः भविष्यति। यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादनासंभवात् अभावप्रत्यक्षहेतुत्वेन योग्यानुपलब्धिः स्वीकरणीयमिति। पिशाचभेदवान् स्तंभः इत्यात्मकं पिशाचादेरन्योन्याभावप्रत्यक्षं स्तंभादौ न स्यादिति पूर्वपक्षवादः। पिशाचस्य योग्यत्वाभावात् अत एव योग्यप्रतियोग्यनुपलंभाभावादिति। किन्तु स्तंभे पिशाचभेदः सर्वानुभवसिद्धः। तत्र प्रतियोगितावच्छेदकानुपलब्धेरेव कारणत्वमिति। अतः अन्योन्याभावग्रहस्थले प्रतियोगितावच्छेदकानुपलब्धिरेव योग्यानुपलब्धिः इति स्वीकरणीयमिति हरिहरः। यद्यत्र पिशाचत्वं स्यात्तर्हि स्तंभत्व-वदुपलभ्येत इत्यापादनासंभवादिति। अत्र सर्वासु मातृकासु 'इत्यापादनसंभवात्' इति दृश्यते तत् न स्वीकर्तुं शक्यते सिद्धान्तस्य अनुभवस्य च विरोधत्वात्। यदि सर्वत्राभावग्रहकारणत्वेन अनुपलब्धेः स्वीकारे अभावाश्रयग्रहेणैव इन्द्रियस्य उपक्षीणेन तस्य कारणत्वाभावः। क्लृप्तेन्द्रियेणैव अभावप्रत्यक्षस्य करणत्वे सम्भवे अनुपलंभस्य

सहकारित्वमात्रेण अकारणत्वात्, प्रमाणान्तरकल्पनागौरवात्, सर्वानुभूतानुव्यवसायस्य अभावं साक्षात्करोमि इत्यस्य विरोधाच्च अनुपलब्धेः अभावप्रत्यक्षं प्रति न कारणत्वमिति ग्रन्थकारः।

अलौकिकसन्निकर्षस्त्रिविधः ज्ञानलक्षणाप्रत्यासत्तिः सामान्यलक्षणाप्रत्यासत्तिः योगजधर्मश्चेति। ज्ञानलक्षणाप्रत्यासत्तिश्च ज्ञानस्वरूपा प्रत्यासत्तिः इत्यर्थः। अनया प्रत्यासत्या सुरभिचन्दनमिति ज्ञानमुत्पद्यते। यत्र चन्दनकाष्ठदर्शनमात्रेण सुरभिचन्दनमिति ज्ञानं जायते तत्र सुरभिगन्धस्य घ्राणेन्द्रियसन्निकर्षाभावाच्चक्षुषश्च गन्धग्रहणेऽयोग्यत्वात्तादृशज्ञाने कया विधया गन्धो भासताम्। अतस्तद्भाननिर्वाहार्थं ज्ञानलक्षणाप्रत्यासत्तिस्वीकारः। न च सौरभत्वसामान्यलक्षणाप्रत्यासत्या तत्सौरभभाननिर्वाह इति वाच्यम्। सामान्यलक्षणया सौरभभानेऽपि तत्र सौरभत्वभानार्थं ज्ञानलक्षणावश्यकत्वात्। एवं यत्र वह्नित्वेन गुञ्जापुञ्जविषयकं अयं वह्निरिति ज्ञानं अभूत् तत्र वह्निं जानामीत्यनुव्यवसाये गुञ्जापुञ्जस्य ज्ञानलक्षणयैव भानाभ्युपगमस्यावश्यकत्वात्। अन्यथा वह्नित्वस्य गुञ्जापुञ्जसामान्यत्वाभावेन तस्य तज्ज्ञानस्य वा गुञ्जापुञ्जप्रत्यासत्तित्वासंभवेन तद्भानानिर्वाह इति ध्येयम्। प्रत्यक्षहेतुभूतानां षड्विधलौकिकसन्निकर्षाणां विवरणानन्तरं त्रिविधालौकिकसन्निकर्षाणां विशदीकरोति ग्रन्थकारः यथा – अलौकिकसन्निकर्षस्त्रिवि-

धेति। प्रथमायाः ज्ञानलक्षणाप्रत्यासत्यः लक्षणमुच्यते ज्ञानस्वरूपा प्रत्यासत्तिरिति। प्रत्यासत्तिर्नाम सन्निकर्षः। ज्ञानमेव सन्निकर्षरूपेण वर्तते सा ज्ञानस्वरूपा ज्ञानलक्षणा इति। यत्र चन्दनकाष्ठस्य चाक्षुषप्रत्यक्षानन्तरं सुरभिचन्दनमिति ज्ञानं जायते, तत्र विदूरवर्तनात् सुरभिगन्थस्य घ्राणेन्द्रियसन्निकर्षाभावात् गन्थं न घ्राणेन्द्रियजन्यम्। अतः ज्ञानलक्षणायाः स्वीकारः। चन्दनकाष्ठसंयुक्तचक्षुरिन्द्रियसंयुक्तमनःसंयुक्ताऽत्मसमवेत-संस्कारजन्यं सुरभिज्ञानम्। तथैव गुञ्जापुञ्जविषयकं अयं वह्निरिति ज्ञानसंभवे गुञ्जापुञ्जस्य ज्ञानलक्षणया एव ज्ञानोत्पत्तिः।

सामान्यलक्षणाप्रत्यासत्तिश्च सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थः। न च सामान्यलक्षणाज्ञानलक्षणयोरभेदप्रसक्तिः। उभयोरपि ज्ञानरूपत्वादिति वाच्यम्। ज्ञान-लक्षणाप्रत्यासत्तिः यस्य ज्ञानं तस्यैव। सामान्यलक्षणा तु यस्य ज्ञानं तदाश्रयस्य प्रत्यासत्तिरित्येवं भेदात्। ननु सामान्यलक्षणाप्रत्यासत्तिस्वीकार: किन्निमित्त इति चेदुच्यते महानसीयधूमे भूयोदर्शनेन वह्निर्व्याप्तिर्गृहीतत्वेन पर्वतीयधूमे चागृहीतत्वेन यत्र यस्यानुभवः तत्रैव तद्विषयकस्मरणमिति नियमात्। अन्यथाऽतिप्रसंगात्पर्वतीयधूमे वह्निव्याप्यत्वस्मरणं कथं भवेत्। अतः सन्निकृष्टमहानसधूमे वह्निव्याप्यत्वप्रत्यक्षानन्तरं पर्वतीयादिनिखिलधूमानां धूमत्वसामान्यलक्षणाप्रत्यासत्योपस्थितौ सर्वष्वेव धूमेषु वह्नि-

व्याप्यत्वानुभवः। ततश्च पर्वतीयधूमे तत्स्मरणोपपत्तिः। तदर्थं सामान्यलक्षणाप्रत्यासत्तिस्वीकार इति। योगजधर्मो योगाभ्यासजन्यादृष्टविशेषः तेन योगिनां सर्वज्ञानं इति प्रत्यक्षखण्डः।

सामान्यलक्षणायां सामान्यमेव सन्निकर्षरूपेण वर्तते। "सामान्यलक्षणाप्रत्यासत्तिश्च सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थः" इति हरिहरेण यदुक्तं तन्न सम्यग्[4]। यस्य ज्ञानं तदाश्रयस्य प्रत्यासत्तिरिति पुनरुक्तम् सम्यग्। यस्य गोः ज्ञानं तद् (गौः) आश्रयं यस्य (गोत्वस्य), तस्य प्रत्यासत्तिरिति – प्रत्यासत्तित्वं वक्तव्यम्। योगजधर्मश्च योगजनकमदृष्टविशेष इति सर्वविदितम्।

उपजीव्योपजीविभावसंगत्या अनुमानं निरूपयति। अनुमितीति। अनुमानस्य व्याप्त्यादिप्रत्यक्षपूर्वकत्वात्प्रत्यक्षोपजीवित्वादनुमितिं निरूपयति। परामर्शेति। परामर्शजन्यत्वविशिष्टज्ञानत्वमित्यर्थः। परामर्शध्वंसवारणाय ज्ञानत्वमिति। यद्यपि स्थाणुर्वा पुरुषो वेति संशयोत्तरं स्थाणुत्वव्याप्यवक्रकोटरादिमानिति पुरुषत्वव्याप्यकरचरणादिमानिति वा परामर्शो जायमानेऽयं स्थाणुरेव पुरुष एवेति वा प्रत्यक्षेप्यनुमिति-

---

4 इन्द्रियसंबद्धविशेष्यज्ञानप्रकारीभूतघटत्वादिः सामान्यलक्षणः इति सिद्धान्तचन्द्रोदये। p.125 इन्द्रियसंबद्धविशेष्यज्ञाने प्रकारीभूतः सामान्यलक्षणः इति प्रतिबिंम्बे। p.126

लक्षणमस्ति। तथापि परामर्शत्वेन परामर्शजन्यत्वस्य विवक्षणात्  तत्र तु परामर्शस्य तत्त्वेन हेतुत्वाभावात्किंतु विशेषदर्शनत्वेनैव हेतुत्वात्। अत एव परामर्शानुव्यवसाये नातिव्याप्तिः। तस्य परमर्शानुव्यवसाये विषयत्वेनैव हेतुत्वात्तथा च परामर्शत्वावच्छिन्न-जनकतानिरूपितजन्यत्वे सति ज्ञानत्वमिति पर्यवसितो।र्थः। प्रत्यक्षानुमानयोः उपजीव्योपजीविसंबन्धः, प्रत्यक्षं उपजीव्यं अनुमानं उपजीविः च भवति हेतुप्रत्यक्षं विना साध्यानुमितेरसंभवात्। यदि परामर्शजन्यं ज्ञानं अनुमितिरित्युक्ते संशयोत्तरं जन्यमानप्रत्यक्षे अतिव्याप्तिर्भवतीति, यथा स्थाणुर्वा पुरुषो वेति संशयोत्तरं पुरुषत्वव्याप्यकरचरणादिमानिति परामर्शसाहाय्येनैव अयं पुरुष इति ज्ञानमुत्पद्यते इत्यतिव्याप्तिः। किन्तु परामर्शजन्यत्वे अपि परामर्शस्य तत्त्वेन न कारणत्वं तथा करचरणादिविशेषदर्शनत्वस्य हेतुत्वाच्च। परामर्शानुव्यवसाये अपि तत्त्वेन हेतुत्वाभावान्नातिव्याप्तिः हेतुतायाः विषयत्वावच्छिन्नत्वात्। अनुमितेस्तु परामर्शत्वावच्छिन्नहेतुता-निरूपितजन्यत्वविशिष्टज्ञानत्वात्।

परामर्शं निरूपयति व्याप्तीति। व्याप्तिविशिष्टत्वञ्च व्याप्तिविषयकत्वम्। तथा च व्याप्तिविषयकं यत्पक्षधर्मताज्ञानं तत्त्वमित्यर्थः। न च वह्निव्याप्यो धूमः आलोकवान्पर्वत इत्यकारकसमूहालम्बनज्ञानादपि वहन्यनुमित्यापत्तिः, तादृशज्ञानस्य व्याप्तिविषयकत्वात्

पक्षधर्मताविषयकत्वादिति वाच्यम्। वह्निव्याप्तिविषयतानिरूपितधूमविषयतानिरूपित-पर्वतविषयताशालिज्ञानत्वेन वह्निसाध्यकानुमितिस्थले कारणत्वस्य विवक्षणीयत्वात्तादृश-समूहालम्बनज्ञानीयपर्वतविषयतायाश्चालोकविषयतानिरूपितत्वेन धूमविषयतानिरूपित-त्वाभावान्न तादृशज्ञानेन अनुमित्यापत्तिः। न चानुमित्युत्तरक्षणमनुमित्यन्तरापत्तिः पूर्वपरामर्शस्यैव तज्जन्यानुमितिक्षणेऽपि सत्वात्सामग्रीसम्भवादिति वाच्यम्। सिद्ध्यभावस्याप्यनुमितौ कारणत्वकल्पनान्न चैवमपि प्रत्यक्षाद्यात्मकसिद्धौ सत्यां अनुमित्सया अनुमितेरंगीकृतत्वात्। यदाहुः प्रत्यक्षेण परिकल्पितमपि अनुमानेन बुभुत्स्यन्ते तर्करसिकाः इति। तथा च तत्र सिद्ध्यभावरूपकारणस्य व्यभिचार इति वाच्यम्। तत्रानुमित्साया उत्तेजकत्वाद्दाहादौ उत्तेजकाभावसहकृतमणेः प्रतिबन्धकत्व-वत्तदभावस्य कारणत्ववच्च अनुमितावपि सिषाधयिषाविरहसहकृतसिद्धेः प्रतिबन्धकत्वं तदभावस्य च हेतुत्वमिति कल्पनात्। उत्तेजकत्वं च प्रतिबन्धकप्रतिबन्धकत्वम्। एवं च यत्र सिद्धौ सत्यामपि सिषाधयिषयानुमितिः तत्र सिषाधयिषाविरहविशिष्टसिद्धेर-भावान्नानुपपत्तिः। ननु योग्यविभुविशेषगुणानां यौगपद्यासंभवात् सिषाधयिषासिद्धि-परामर्शानां त्रयाणां युगपदुत्पत्यसंभवात्क्रमेण त्रिभिः क्षणैरुत्पत्तौ च ज्ञानेच्छादीनां द्विक्षणावस्थायित्वेनान्त्योत्पत्तिक्षणे प्रथममुत्पन्नस्य नाशावश्यंभावात् तत्र च सिद्धेः प्रथममुत्पत्या नाशे सिद्ध्यभावादेवानुमित्युपपत्तिः। सिसाधयिषायाः प्रथममुत्पत्या नाशे

तत्र सिषाधयिषाया उत्तेजकस्याभावादनुमित्यसम्भवः प्रथमं परामर्शस्योत्पत्या नाशे च परामर्शरूपकारणाभावादेव नानुमितिः। तथा च सिषाधयिषासिद्ध्योः युगपत्परामर्शेन सहस्थितेरप्यभावात् किमर्थं सिषाधयिषाविरहविशिष्टत्वविशेषणं सिद्धेरिति चेन्न। यत्रैकस्मिन्क्षणे वह्निव्याप्यधूमवान्पर्वतो वहिनमानिति सिद्धिपरामर्शात्मकमेकं ज्ञानं जातं ततः सिषाधयिषा तत्र सिषाधयिषासिद्ध्योः युगपत्परामर्शेन सह सत्वात्तत्रानुमितिनिर्वाहाय सिद्धौ सिषाधयिषाविरहवैशिष्ट्यविशेषणस्यावश्यकत्वात्। अन्यथा तत्र सिद्धिरूपप्रतिबन्धकसत्वेन अनुमित्यनुपपत्तिरिति ध्येयम्। इयमेव पक्षतेत्युच्यते। व्याप्तिविशिष्टपक्षधर्मताज्ञानं इति अन्नंभट्टेन परामर्शलक्षणं यद्क्तं, तस्यार्थः वदति - **व्याप्तिविशिष्टत्वं नाम व्याप्तिविषयकत्वमिति।** वस्तुतया व्याप्तिविशिष्टं च यत् पक्षधर्मताज्ञानं च तत् परामर्शमिति। व्याप्तिविशिष्टेन व्याप्याश्रयानां धूमादीनां ग्रहः। धूमादीनां पक्षसंबन्धज्ञानमिति पर्यवसितोऽर्थः। अतः परामर्शज्ञानं व्याप्तिविषयकं तस्य व्याप्तिनिष्ठप्रकारतानिरूपितज्ञानत्वात्। किन्तु मूलोक्तपरामर्शलक्षणे दोषः द्रष्टुं शक्यते वह्निव्याप्यो धूमः आलोकवान्पर्वत इत्यकारकसमूहालम्बनज्ञानेऽपि लक्षणसमन्वयात्। अस्य ज्ञानस्यापि व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वात्। धूमहेतुना वह्न्यनुमितेः कारणत्वेन वह्निव्याप्तिविषयतानिरूपितधूमविषयतानिरूपितपर्वतविषयताशालिज्ञानत्वस्य विवक्षितत्वात् न दोष इति। कार्यस्य सिद्धिः अनुमितेः प्रतिबन्धको भविष्यतीति। अनेन कारणादेव

अनुमित्युत्तरक्षणे अनुमित्यन्तरस्य असंभवः। अनुमितिसमानकालेऽपि सामग्रीसंभवात् परामर्शस्य सत्त्वादिति। तर्हि एका सुविदिता उक्तिरस्ति प्रत्यक्षसिद्धमप्यर्थं अनुमानेन बुभुत्स्यन्ते तर्करसिकाः इति, एवं कथं वक्तुं शक्यते इति प्रश्नः सिद्धेः प्रतिबन्धकत्वात्। अनुमित्सायाः कारणत्वादिति समाधानः। उत्तेजकरूपेण अनुमित्सा प्रवर्तते। एवं संक्षेप्तुं शक्यते यथा – सिषाधयिषाविरहविशिष्टसिद्धिः प्रतिबन्धकं, सिषाधयिषाविरहविशिष्ट-सिद्ध्यभावः अनुमितेः कारणं, अनुमित्सा उत्तेजकं प्रतिबन्धकप्रतिबन्धकमिति। सिद्धिस्तु ज्ञानस्वरूपा, सिसाधयिषा तु इच्छा भवति। तयोः युगपदुत्पपत्तिः आत्मनि न संभवति, योग्यविभुविशेषगुणत्वात्। योग्यत्वं तु प्रत्यक्षयोग्यत्वम्, आत्मनिष्ठविशेषगुणत्वात् विभु-विशेषगुणत्वं च। सिषाधयिषासिद्धिपरामर्शानां त्रयाणां युगपदुत्पत्यसंभवात्क्रमेण त्रिभिः क्षणैरुत्पत्तौ च ज्ञानेच्छादीनां द्विक्षणावस्थायित्वेनान्त्योत्पत्तिक्षणे प्रथममुत्पन्नस्य नाशावश्यंभावात् पुनः किमर्थं सिसाधयिषाविरहविशिष्टसिद्धिः अनुमितिकारणत्वेनो-क्तमिति चेद्वदति - **यत्रैकस्मिन्क्षणे वह्निव्याप्यधूमवान्पर्वतो वहिनमानिति सिद्धिपराम-र्शात्मकमेकं ज्ञानं जातं ततः सिषाधयिषा तत्र सिषाधयिषासिद्ध्योः युगपत्परामर्शेन सह सत्वात्तत्रानुमितिनिर्वाहाय सिद्धौ सिषाधयिषाविरहवैशिष्ट्यविशेषणस्यावश्यकत्वात्** इति।

व्याप्तिलक्षणमाह। यत्रेति। साहचर्यं सामानाधिकरण्यं तस्य नियमः सार्वत्रिकत्वं व्यापकसामानाधिकरण्यमित्यर्थः। वह्निमान्धूमादित्यत्र धूमव्यापको वह्निः तत्सा-मानाधिकरण्यं धूमे वर्तत इति लक्षणसमन्वयः। धूमवान्वह्नेरित्याद्यसद्धेतौ वह्निव्यापक-त्वस्य धूमेऽभावात् नातिव्याप्तिः। धूमव्यापकत्वं च वह्नेः धूमसमानाधिकरणा-त्यन्ताभावाप्रतियोगित्वम्। न च धूमसमानाधिकरणवह्निघटोभयाभावं पूर्वक्षणवृत्तित्व-विशिष्टवह्न्यभावं चादाय तत्प्रतियोगित्वाद्वह्नेर्लक्षणासम्भव इति वाच्यम्। वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य हेतुमन्निष्ठाभावस्य निवेशनीयत्वात्। यदि वह्निधूमोभयवान्वह्नेः महानसीयवह्निमान्धूमादित्यादावतिव्याप्तिः तत्रायोगोलके हेतुसमानाधिकरणस्य वह्निधूमोभयाभावस्य व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेन पर्वते धूमसमानाधिकरणस्य महानसीयवन्यभावस्य वैशिष्ट्यावच्छिन्नप्रतियोगिताकत्वेन च लक्षणाघटकत्वात्तदवच्छिन्नाभावान्तराप्रतियोगित्वस्य चोभयत्र साध्ये सत्वादित्युच्यते तदा अभावे वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वविशेषणमपहाय हेतुमन्नि-ष्ठाभावप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके निवेश्यतां अतो न पूर्वोक्तासंभवः। उक्तस्थलद्वये च साध्यतावच्छेदकस्य वह्निधूमोभयत्वस्य महानसीयवह्नित्वस्य च हेतुसमानाधिकरणवह्निधूमोभयाभावप्रतियोगितायां महानसीयवहन्यभावप्रतियोगितायां च क्रमेण अवच्छेदकत्वान्नातिव्याप्तिः।

साहचर्यनियमो व्याप्तिरिति अन्नंभट्टेनोक्तं व्याप्तिलक्षणम्। तस्यार्थः वदति - **साहचर्यो सामानाधिकरण्यं नियमस्तु सार्वत्रिकत्वम्** इति। हेतुसाध्ययोः साहचर्यनियम इत्यर्थः। अत्र साध्यस्य अधिकदेशवृत्तित्वात् व्यापकत्वम् तथा हेतोः न्यूनदेशवृत्तित्वात् व्याप्यत्वम् च। व्यापकत्वलक्षणमधिकृत्य हरिहरः महान् विचारः करोति। हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यस्य व्यापकत्वमिति। धूमसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं वह्नौ निश्चयेन भवितव्यम्। किन्तु धूमसमानाधिकरणवह्निघटोभयाभावं पूर्वक्षणवृत्तित्वविशिष्टवह्न्यभावं चादाय तत्प्रतियोगित्वाद्वह्नेर्लक्षणासम्भव इत्यतः वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य हेतुमन्निष्ठाभावस्य लक्षणे निवेशेन वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकहेतुमन्निष्ठाभावाप्रतियोगित्वं इति परिष्कृतम्। यदि अयोगोलकं वह्निधूमोभयवान्वह्नेः, एवं पर्वतो महानसीयवह्निमान्धूमा-दित्यादावतिव्याप्तिः वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावान्तराप्रतियोगित्वस्य चोभयत्र साध्ये सत्वादिति तदा अभावे वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिता-कत्वविशेषणमपहाय हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके निवेश्यतां अतो न पूर्वोक्तासंभवः[5]। उक्तस्थलद्वये च साध्यतावच्छेदकस्य वह्निधूमोभयत्वस्य

---

5 वह्नेर्धूमव्यापकत्वं नाम धूमसामानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्वम् इति न्यायबोधिन्यां। p.134

महानसीयवह्नित्वस्य च हेतुसमानाधिकरणवह्निधूमोभयाभाव-प्रतियोगितायां महानसीय-वह्न्यभावप्रतियोगितायां च क्रमेण अवच्छेदकत्वान्नातिव्याप्तिः।

न चैवमपि वह्निमान्धूमादित्यत्र चालिनीन्यायेन हेतुसमानाधिकरणमहानसीय-वह्न्यभावप्रतियोगितावच्छेदकत्वं वह्नित्वस्यापि अस्ति इत्यव्याप्तिरिति वाच्यम्। प्रतियोगितावच्छेदकतापर्याप्तिशून्यत्वस्य अनवच्छेदकेत्यनेन विवक्षितत्वात्तत्र च महानसीयत्ववह्नित्वयोरेव अवच्छेदकतापर्याप्तेः वर्तमानत्वात्प्रत्येकं तदभावेन शुद्धवह्नित्वस्य तादृशावच्छेदकतापर्याप्तिशून्यत्वान्न क्षतिः। धूमाधिकरणे पर्वते महानसीयवह्न्यभावस्य सत्त्वात् महानसीयत्ववह्नित्वयोः प्रतियोगितावच्छेदकत्वात् साध्यतावच्छेदकत्वेन प्रतियोगितावच्छेदकधर्मसंभवाच्च अव्याप्तिरिति दोषः। प्रतियोगितावच्छेदकतापर्याप्तिशून्यत्वस्य शुद्धवह्नित्वस्य अनवच्छेदकेत्यनेन विवक्षितत्वात् महानसीयत्ववह्नित्वयोः अवच्छेदकतापर्याप्तेः[6] वर्तमानत्वाच्च क्षतिर्नास्तिरिति। न च ज्ञानवानात्मत्वादित्यत्राव्याप्तिः। घटादिदेशावच्छेदेन सुषुप्त्यादिकालावच्छेदेन च आत्मनि वर्तमानज्ञानाभावप्रतियोगितावच्छेदकत्वात् ज्ञानत्वस्येति वाच्यम्। प्रतियोगिव्यधि-करणत्वेन हेतुसमानाधिकरणाभावस्य विशेषणीयत्वात्। आत्मा ज्ञानवानात्मत्वात् इत्यत्र

6 अनेकानुयोगिकधर्मं पर्याप्तिः।

आत्मा पक्षः, ज्ञानवत्त्वं साध्यः, आत्मत्वं हेतुः च भवति। आत्मनः विभुत्वे तथा नित्यत्वे अपि घटादिदेशावच्छेदेन सुषुप्त्यादिकालावच्छेदेन च आत्मनि ज्ञानं न वर्तते। अतः अव्याप्तिदोष इति। यत् ज्ञानाधिकरणं तदेव ज्ञानाभावस्याधिकरणं अथवा प्रतियोग्यधिकरणं ज्ञानाधिकरणमेव। हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं च साध्यतावच्छेदके सत्त्वात् दोषः। तन्निवारणार्थं हेतुसमानाधिकरणाभावस्य प्रतियोगिव्यधिकरणत्वेन स्वीकरणीयमिति हरिहरः। **न च हेत्वधिकरणनिरवच्छिन्नवृत्तिकाभावनिवेशनेनैव एतद्दोषवारणसम्भवे प्रतियोगिव्यधिकरणत्वनिवेशो गौरवग्रस्त इति वाच्यम्। तथा सति प्राचीनमते संयोगसामान्याभावस्य द्रव्येऽभावात् संयोगाभावसाध्यकसत्त्वहेतावतिव्याप्तिः। तत्र संयोगाभावाभावस्य संयोगस्याव्याप्यवृत्तित्वेन हेत्वधिकरणे निरवच्छिन्नवृत्तिकत्वाभावात् तथाविधाभावान्तरप्रतियोगितानवच्छेदकत्वस्य संयोगाभावत्वे दुर्वारात्। एवञ्च यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वेन निरुक्तस्थले संयोगाभावाभावीयप्रतियोगितावच्छेदकसंयोगाभावत्वावच्छिन्नानधिकरणं हेत्वधिकरणं द्रव्यमिति तादृशप्रतियोगितावच्छेदकमेव संयोगाभावत्वं इति नातिव्याप्तिः। इत्यलमतिविस्तरेण। इदञ्च व्याप्तिलक्षणं सिद्धान्तमनुरुध्य। हेतुमन्निष्ठनिरवच्छिन्नवृत्तिकाभावप्रतियोगितानवच्छेदकमिति परिष्कारेण**

पूर्वोक्तदोषपरिहारः तत्र घटेन सुषुप्त्या वावच्छिन्नात्मनि ज्ञानासंभवात्। तत्रापि दोषः दर्शयति प्राचीनमतेति। प्राचीनमतानुसारं संयोगः अव्याप्यवृत्तिः भवति। अतः संयोगसामान्यस्य अभावः द्रव्ये नास्ति। यदि हेतुमन्निष्ठनिरवच्छिन्नवृत्तिकाभावस्वीकारे द्रव्यः संयोगाभाववान् सत्त्वात् इत्यनुमाने असद्धेतौ सत्त्वे अतिव्याप्तिः तत्र हेत्वधिकरणे द्रव्ये साध्याभावस्य संयोगाभावाभावस्य संयोगस्य सत्त्वात् तस्य अव्याप्यवृत्तित्वात् निरवच्छिन्नवृत्तिकत्वाभावात् तदभावप्रतियोगितानवच्छेदकत्वस्य संयोगाभावत्वे सत्त्वात्।

**पूर्वपक्षीयव्याप्तिलक्षणं तु साध्यवदन्यावृत्तित्वं साध्यतावच्छेदकविशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वसामान्याभाव इति तदर्थः।** साध्यवदन्यावृत्तित्त्वमेव निष्कर्षते साध्यतावच्छेदकविशिष्ट इति। लक्षणसमन्वयश्च इत्थं - पर्वतो वह्निमान् धूमादित्यत्र वह्नौ साध्यता, साध्यतावच्छेदकं वह्नित्वं, अवच्छेदकविशिष्टसाध्यवत्त्वं पर्वते, साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदं पर्वतभेदं ह्रदे, ह्रदनिरूपितहेतुतावच्छेदकसंबन्धं संयोगे, संयोगावच्छिन्नवृत्तित्वसामान्याभावं ह्रदे इति लक्षणसमन्वयः। अनेन परिष्कारेण चालिनीन्यायेनपूर्वोक्तदोषस्य न प्रसक्तिः। तदेव उच्यते यथा - **तेन वह्निमान्धूमादित्यत्र महानसीयवह्नित्वावच्छिन्न-**

प्रतियोगिताकभेदस्य वह्निमन्महानसीयप्रतियोगिकभेदस्य च धूमादिमति पर्वतादौ सत्वेऽपि न क्षतिः इति। न वा तत्र वह्निमद्भिन्ने धूमावयवे धूमस्य समवायेन वृत्तित्वेऽपि न क्षतिः। न वा धूमवान्वह्नेः इत्यादौ धूमादिमद्भिन्नह्रदादिनिरूपितवृत्तित्वाभावेऽपि वह्न्यादेः क्षतिः। साध्यतावच्छेदकसंबन्धेनापि साध्यवत्त्वं बोध्यम्। तेन धूमादेः समवायसम्बन्धेन वह्न्यादिमद्वह्न्यवयवादिभिन्नपर्वतादिवृत्तित्वेऽपि न क्षतिः। हेतुतावच्छेदकसंबन्धावच्छिन्न-वृत्तित्वसामान्याभावस्वीकारेण धूमस्य संयोगसंबन्धेन अभावो धर्तव्यः एवं अधिकरण-निष्ठसाध्यवत्त्वमपि साध्यतावच्छेदकसंबन्धेन बोध्यमिति। अनेन समवायसंबन्धेन वह्निमद्वह्न्यवयवभिन्नपर्वते धूमस्य वृत्तित्वेऽपि दोषो नास्ति।

ननु द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात् इत्यादौ साध्यवदन्यस्मिन् गुणे उपधेयसंकरोप्युपाधेरसंकर इति न्यायेन विशिष्टं शुद्धान्नातिरिच्यत इति न्यायेन विशिष्टसत्तायाः सत्तात्वेन वृत्तित्वादव्याप्तिः इति चेन्न साध्यवदन्यनिरूपितवृत्तितानवच्छे-दकत्वस्य हेतुतावच्छेदके विवक्षणात्तत्र च साध्यवदन्यगुणनिरूपितवृत्तितावच्छेदकं सत्तात्वमेव न विशिष्टसत्तात्वमिति नाव्याप्तिः। घटो द्रव्यः गुणकर्मान्यत्वविशिष्टसत्त्वात् इत्यत्र विशिष्टं शुद्धान्नातिरिच्यत इति न्यायः स्वीकृत्य शुद्धसत्तायाः गुणकर्मान्यत्व-

विशिष्टसत्त्वात् अभेदं कल्पयन् गुणकर्मयोः अतिव्याप्तिः भवति सत्तायाः द्रव्यगुणकर्मेषु वर्तनादिति चेत् न, सत्तात्वस्य साध्यवदन्यगुणनिरूपितवृत्तितानवच्छेदकत्वात्।

न च सत्तावान्जातेरित्यादावव्याप्तिः। साध्यवदन्यसामान्यनिरूपितहेतुतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्धेरिति वाच्यम्। एतद्दोषेणैव सिद्धान्तलक्षणस्य आदरणीयत्वात्। वस्तुतः हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकधर्मावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकसाध्यवदन्यनिरूपितवृत्तित्वसामान्याभाव इति परिष्कारेणैतद्दोषावसर इति ध्येयम्।

अनुमानं विभजते। अनुमानमिति। स्वार्थानुमानं दर्शयति स्वयमेवेति। भूयोदर्शनेनेति। भूयोदर्शनत्वेन न व्याप्तिग्रहहेतुत्वम्। शतशो धूमवह्न्योः साहचर्यदर्शनेपि वह्नौ धूमव्याप्तिग्रहासम्भवात्। किन्तु व्यभिचारज्ञानाभावविशिष्टसहचारज्ञानत्वेनैव व्याप्तिग्राहकत्वं वह्नौ च व्यभिचारज्ञानाभावविशिष्टधूमसहचारज्ञानाभावान्न व्याप्तिग्रह इति। अत्र अनुमानं द्विधा विभज्य प्रथमं स्वार्थानुमानं विशदीकरोति स्वयमेव भूयोदर्शनेन व्याप्तिं गृहीत्वा इति। किन्तु केवलं हेतुसाध्ययोः भूयोदर्शनत्वेन व्याप्तिः ग्रहीतुं न शक्नोतीति हरिहरः। कारणमपि वदति - शतशो धूमवह्न्योः साहचर्यदर्शनेपि वह्नौ धूमव्याप्तिग्रहासम्भवादिति। तर्हि कस्य व्याप्तिग्रहहेतुत्वमिति चेत् व्यभिचारज्ञानाभावविशिष्टसहचार-

ज्ञानस्येति व्यभिचारज्ञानाभावविशिष्टधूमसहचारज्ञानाभावात् वह्नौ न व्याप्तिग्रहः, अयोगोलके व्यभिचारसत्वात्।

परार्थानुमानं दर्शयति। यत्त्विति। पर्वतो वह्निमानिति प्रतिज्ञावाक्यात् वह्निमदभिन्नः पर्वत इति धूमादिति हेतुवाक्येन हेतुत्वं धूमीयमिति। यो यो धूमवान्स स वह्निमानिति उदाहरणवाक्येन यो यो धूमवदभिन्नः स वह्निमदभिन्न इति। तथा चायमित्युपनयवाक्येन वह्निव्याप्यधूमवदभिन्नः पर्वत इति। तस्मात्तथेति निगमनवाक्येन अबाधितत्वासत्प्रतिपक्षितत्वविशिष्टधूमज्ञानज्ञाप्यवह्निमदभिन्नोयमिति चावान्तरबोधः। उपनयबोधान्तबोधचतुष्टयजन्यसंस्कारसहकृतनिगमनार्थविषयकबोधात् विशिष्टान्वय-बोधो वा समूहालम्बनात्मकबोधो वा महावाक्यार्थबोधो भवति। तादृशबोधानन्तरं विशिष्टपरामर्शः तदनन्तरमनुमितिरित्येवं परार्थानुमानक्रमः। अनुमानप्रकारयोः द्वितीयस्य परार्थानुमानस्य पञ्चावयववानां प्रयोजनं वक्ष्यते - प्रतिज्ञावाक्यात् साध्यवदभिन्नः पक्षः इति, हेतुवाक्येन हेतुत्वाधिकरणं, उदाहरणवाक्येन व्याप्तिज्ञानं, उपनयवाक्येन परामर्शज्ञानं तथा निगमनवाक्येन अबाधितत्वविशिष्टासत्प्रतिपक्षितत्वविशिष्टः यः हेतुः, तज्ज्ञानज्ञाप्यसाध्यवदभिन्नः पक्षः इत्यवान्तरबोधः च फलम्[7]। प्रतिज्ञाद्युपनयबोधान्त-

---

7 पक्षज्ञानं प्रतिज्ञाप्रयोजनम्, लिङ्गज्ञानं हेतुप्रयोजनम्, व्याप्तिज्ञानमुदाहरणप्रयोजनम्, पक्षधर्मताज्ञानमुपनयप्रयोजनम्, अबाधितत्वादिकं निगमनप्रयोजनम् इति दीपिकायाम्। p.144

बोधचतुष्टयजन्यसंस्कारसहकृतनिगमनार्थविषयकबोधः विशिष्टान्वयबोधः भवति, समूहालंबनात्मकबोधो भवति एवं महावाक्यार्थबोधत्वेन प्रतिथो भवति। अनन्तरं विशिष्टपरामर्शः तेनानुमितिरिति क्रमः।

**न्यायत्वं प्रतिज्ञादिपञ्चकसमुदायत्वम्। अवयवलक्षणन्तु प्रतिज्ञाद्यन्यतमत्वम्। परामर्श एव करणमिति। इदन्त्वव्यवधानेन फलावच्छिन्नं कारणं करणमिति मताभिप्रायेण। व्यापारवत्कारणं करणमिति मते तु व्याप्तिज्ञानमेव परामर्शद्वारा करणमिति ध्येयम्।** परार्थानुमानमेव न्यायत्वेन उच्यते इत्युक्तम्। प्रतिज्ञादयः महावाक्यावयवाः। यस्मिन् कारणे सति फलमविलम्बेन जायते तत्करणमिति मते परामर्श एव करणम्। व्यापारवत्कारणमिति करणलक्षणस्वीकारे परामर्शं व्यापारं व्याप्तिज्ञानं करणं च। एतत्तु नवीनमतं, प्राचीनमतानुसारं ज्ञायमानं लिङ्गं करणमिति[8]।

**लिङ्गं हेतुः। तं विभजते। लिङ्गमिति। अन्वयव्यतिरेकिलक्षणमाह। अन्वयेनेति। अन्वयव्याप्तिः पूर्वोक्तैव व्यतिरेकव्याप्तिस्तु साध्याभावव्यापकीभूताभावप्रतियोगित्वम्। तथा च वह्न्यभावव्यापकीभूतधूमाभावप्रतियोगित्वरूपव्यतिरेकव्याप्तेरपि धूमे सत्वात् तस्यान्वयव्यतिरेकिलिङ्गत्वमिति भावः।** लिङ्गस्य त्रैविध्यं वक्तुमारभते - **तं विभजतेति।**

---

8 ज्ञायमानं लिङ्गमनुमितिकरणमिति वृद्धोक्तं न युक्तम् इति सिद्धान्तचन्द्रोदये। p.145

तत्र प्रथमं अन्वयव्यतिरेकिनं सोदाहरणं वक्ष्यते - **अन्वयेनेति**। अन्वयव्याप्तिः पूर्वोक्ता हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमेव, व्यतिरेकव्याप्तिस्तु साध्याभावव्यापकीभूताभावप्रतियोगित्वम्। इदं व्याप्तिद्वयं यस्मिन् हेतौ वर्तते अथवा लक्षणद्वयमितं यस्मिन् पदार्थे समन्वयति, तद्धेतुः अन्वयव्यतिरेकिर्भवतीति। यत्र वह्न्यभावः तत्र धूमाभावः इति व्यतिरेकव्याप्तिस्वरूपः। अत्र वह्निर्साध्या, वह्न्यभावो साध्याभावः, वह्न्यभावसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं धूमाभावे सत्त्वात् धूमाभावस्य व्यापकत्वं तदभावप्रतियोगित्वात् धूमस्य व्याप्त्याश्रयत्वम्।

**केवलान्वयिलक्षणमाह। अन्वयमात्रेति। केवलान्वयित्वमत्यन्ताभावाप्रतियोगित्वं ननु संयोगाभावगगनाभावादेः केवलान्वयित्वव्यवहारो व्याहन्येत तस्य संयोगगगनाद्यात्मकाभावप्रतियोगित्वादिति चेन्न स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वस्य विवक्षितत्वात्। संयोगस्य स्वाभावविरोधित्वाभावात्। गगनस्य वृत्तिमत्वाभावाच्च नानुपपत्तिः। तथा च केवलान्वयिसाधकत्वं केवलान्वयिलिङ्गलक्षणम्। यथा श्रुतन्तु व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वम्। अत्र हेतोः वस्तुगत्या व्यतिरेकित्वेपि वाच्यं धूमाद्धटोऽभिधेयो द्रव्यत्वादित्यादेः केवलान्वयित्वमेव। साध्यस्य केवलान्वयित्वादे व्यतिरेकव्याप्तेरसम्भवादिति ध्येयम्।** सद्धेतुषु द्वितीयं केवलान्वयीं लक्षयति अत्यन्ता-

भावाप्रतियोगित्वमिति। यत्र वृक्षे कपिसंयोगाभावः, तस्य अत्यन्ताभावस्य कपिसंयोगस्य वृक्षे एव सत्त्वात् अत्यन्ताभावाप्रतियोगित्वं नास्तीति दोषः। एवं गगनाभावस्यापि दोषः, पतनप्रतिबन्धकसंयोगसंबन्धेन कुत्रापि वृत्तिमत्त्वाभावात् गगनाभावात्यन्ताभावस्य प्रतियोगिनः गगनाभावस्य सर्वत्र सत्त्वाच्च। स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वस्य लक्षणे विवक्षितत्वात् न दोष इति। स्वाभावाधिकरणे संयोगस्य वर्तनात् तस्य स्वाभावविरोधित्वाभावात्। गगनस्य वृत्तिमत्त्वाभावात् तत्रापि न दोषः। केवलव्यतिरेकिणं लक्षयति। व्यतिरेकमात्रेति। अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं इत्यर्थः। पृथिवी इतरेभ्य इति। अत्र जलादिचतुर्दशभेदकूटं साध्यं न तु चतुर्दशत्वावच्छिन्नभेदः। तस्याऽप्रसिद्धेः। न च कूटस्याप्रसिद्धिस्तुल्येति वाच्यम्। कूटस्यैकत्र प्रसिद्ध्यभावेऽपि जलादिषु चतुर्दशसु प्रत्येकं चतुर्दशभेदानां जले प्रसिद्धिसम्भवात्। तथा च प्रत्येकं जले तेजोभेदः तेजसि जलभेद इत्येवं प्रसिद्धानां चतुर्दशभेदानां कूटस्य पृथिव्यां साध्यतेति भावः। ग्रन्थान्तरेषु जलादित्रयोदशत्वोक्तिश्चाभावस्याधिकरणात्मकत्वमताभिप्रायेण अन्यथा जलादिसमवायान्तत्रयोदशभेदकूटस्य अभावपदार्थ एव प्रसिद्धत्वात्तत्र कूटाप्रसिद्ध्याशंकानुपपत्तिः। हेतोरसाधारण्यप्रसक्तिश्चेति ध्येयम्। अत्र व्यतिरेकव्याप्तिग्रहश्चेत्थम्। यदितरेभ्यो न भिद्यते न तद्गन्धवत् इत्यत्र यत्र यत्र पृथिवीतरभेदाऽभावः तत्र तत्र गन्धाभाव इति इतरभेदाभावव्यापकता गन्धाभावे दृष्टान्तजलादौ गृह्यते। जलं

**यथेतरभेदाभाववद्गन्धाभाववच्च न चेयं तथा इयं पृथिवी तथा इतरभेदाभावव्यापक-गन्धाभाववती न च तदभाव गन्धवतीत्यर्थः। तस्मान्न तथा तस्माद्गन्धाभावाभाव-गन्धवत्त्वात् इतरभेदाभाववती न किन्तु तदभाव इतरभेदवतीत्यर्थः।** सद्धेतुषु तृतीयस्थानमलंकरोति केवलव्यतिरेकिहेतुः, तस्य अन्वयव्याप्तिर्नास्तीति विशेषः। मूलग्रन्थात् उदाहरणं उद्धृत्य दर्शयति यथा - **पृथिवी इतरेभ्य** इति। अत्र इतरभेदवत्त्वं साध्यं तत्तु जलादिचतुर्दशभेदकूटमिति। जलाद्यष्टद्रव्याणि गुणादिषड्पदार्थानि एवं चतुर्दशसंख्यानां प्रत्येकानां भेदः तेषां कूटः समूह इत्यर्थः। चतुर्दशत्वावच्छिन्नभेदस्य साध्यत्वेन स्वीकर्तुं न शक्यते तस्य पृथिवीभिन्नेषु अप्रसिद्धत्वादिति किन्तु जलभेदस्य अग्न्यादिषु तेजोभेदस्य वाय्वादिषु एवं चतुर्दशभेदानां प्रसिद्धिसत्त्वात् तेषां कूटस्य स्वीकारः।

**पक्षं लक्षयति। सन्दिग्धेति। सन्देहविषयसाध्यवत्त्वमित्यर्थः। वस्तुतः पूर्वोक्त-सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षताश्रयत्वमेव पक्षलक्षणं बोध्यम्। अन्यथा साध्य-निश्चयानन्तरं इच्छयानुमितिस्थले पक्षत्वाभावप्रसंगात् गगनं मेघवन्नवेति सन्देहाभावे घनगर्जितश्रवणेन गृहमध्यस्थपुरुषस्य गगनं मेघवदित्यनुदयापत्तेश्च।** सन्दिग्धसाध्यवान् पक्षः इति अन्नम्भट्टेन यदुक्तं पक्षलक्षणं तदेव किञ्चिदपि स्पष्टतया

उच्यते सन्देहविषयसाध्यवत्त्वमित्यर्थः इति। साध्यनिश्चयानन्तरं इच्छयानुमितिस्थले साध्यसन्देहाभावात् सन्देहविषयसाध्यस्याप्यभावात् लक्षणस्य अव्याप्तिर्भवति इति कारणात् लक्षणं परिष्करोति यथा - **सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षताश्रय-त्वमेव पक्षलक्षणं बोध्यमिति**। वस्तुतः सिषाधयिषाविरहविशिष्टसिद्ध्यभावमेव पक्षता तदाश्रयत्वं पक्षलक्षणमिति। गृहमध्यस्थपुरुषस्य गगनं मेघवन्नवेति विषये कोऽपि सन्देहो नास्ति, तथापि घनगर्जितश्रवणेन तस्य गगनं मेघवदिति ज्ञानः जायते। अत्र पक्षे गगने सन्देहविषयसाध्याभाववत्त्वात् सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षताश्रयत्वस-त्त्वाच्च लक्षणपरिष्कारस्य सांगत्यम्।

**निश्चितेति। निश्चयविषयसाध्यकत्वं सपक्षलक्षणमित्यर्थः। एवं निश्चयविषय-साध्याभाववत्वं विपक्षलक्षणमित्यर्थः**। यत्र साध्यो निश्चितः तदधिकरणं सपक्षमिति। यत्र साध्याभावो निश्चितः तदधिकरणं विपक्षमिति। **एवं सद्धेतुन्निरूप्य तत्प्रसंगात् हेत्वा-भासान्निरूपयति। सव्यभिचारेति। यद्विषयकत्वं ज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकं तत्त्वं हेत्वाभाससामान्यलक्षणम्। भवति हि ह्रदो वह्निमान्धूमादित्यत्र वह्न्यभाववद्ध्र-दरूपबाधाविषयकत्वं वह्न्यभाववद्ह्रद इति ज्ञाननिष्ठायां वह्निमान्ह्रद इति अनुमिति-प्रतिबन्धकतायां अवच्छेदकमिति तत्र बाधे लक्षणसमन्वयः। न च व्यभिचारादि-**

विषयकज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वेन अनुमितिप्रतिबन्धकत्वाभावात् व्यभिचार-विषयकत्वं नानुमितिप्रतिबन्धकतावच्छेदकमिति व्यभिचारादौ अव्याप्तिरिति वाच्यम्। अनुमितिपदस्य पक्षसाध्यवान् साध्यव्याप्यहेतुमांश्चेति समूहालम्बनानुमितिपरत्वात्तथा च व्यभिचारज्ञानस्य व्याप्त्यंशे तादृशानुमितिप्रतिबन्धकत्वाद्विरुद्धस्य सत्प्रतिपक्षबाधितयोश्च साध्यविशिष्टपक्षांशे प्रतिबन्धकत्वात्। असिद्धस्य च पक्षधर्मतांशे तथात्वात्सर्वत्र लक्षण-समन्वयः। हेत्वाभासानां पञ्चानां प्रत्येकं लक्षणकथनपूर्वं सामान्यलक्षणं वदति यद्विषयकत्वं ज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकं तत्त्वं हेत्वाभाससामान्यलक्षणमिति। यत्र दुष्टहेतुना अनुमानं प्रयुज्यते तत्र यत् विषयकं ज्ञानं (यथार्थज्ञानं) तस्मिन् तद्विषयकत्वं तत् अनुमिति-प्रतिबन्धकतावच्छेदकं तद्वत्त्वं हेत्वाभासमिति।

सव्यभिचारं विभजते। स त्रिविध इति। एतत्सामान्यलक्षणन्तु साधारणाद्यन्य-तमत्वम्। साधारणलक्षणमाह तत्रेति। साध्याभाववद्वृत्तित्वं साधारणलक्षणमित्यर्थः। एतज्ज्ञानस्य साध्याभाववदवृत्तित्वरूपव्याप्तिग्रहप्रतिबन्धकत्वम्। हेतोः साधारणानैकान्तिकत्वे व्याप्तिग्रहप्रतिबन्धकत्वेन अनुमितिप्रतिबन्धकत्वात् हेत्वाभासलक्षणसमन्वयः। असाधारणलक्षणमाह सर्वेति। निश्चितसाध्यवत्सामान्यव्यावृत्तत्वमित्यर्थः। एतज्ज्ञानस्य साध्यसामानाधिकरण्यघटितव्याप्तिग्रहप्रतिबन्धकत्वम्। निश्चितसाध्यवत्सामान्यव्यावृत्ति-

र्नाम सर्वसपक्षव्यावृत्तत्वम्। साध्यसामानाधिकरण्यघटितव्याप्तिर्नाम अन्वयव्याप्तिः, तादृशव्याप्तिग्रहप्रतिबन्धकत्वमिति। **अनुपसंहारिणं लक्षयति। अन्वयेनेति। केवलान्वयिपक्षकत्वं तदर्थः एतस्य च व्याप्तिग्रहप्रतिबन्धः फलम्।** यस्मिन् अनुमाने पक्षः केवलान्वयिधर्मः भवति, तस्मिन् हेतोः अनुपसंहारिणत्वम्। **विरुद्धं लक्षयति – साध्याभावव्याप्येति। साध्याभावव्याप्यत्वन्तल्लक्षणमित्यर्थः। अत्र तद्वत्ताबुद्धौ तदभावव्याप्यवत्तानिश्चयस्यापि प्रतिबन्धकत्वेन साध्याभावव्याप्यहेतुमत्ताज्ञानात्साध्यप्रकारकानुमितिप्रतिबन्धो भवति।** साध्यवत्ताबुद्धौ साध्यस्य पक्षवृत्तित्वज्ञाने साध्याभावव्याप्यज्ञानं प्रतिबन्धकं तस्मिन् प्रतिबन्धकत्वम्। साध्याभावसाधकहेतुज्ञानात् साध्यानुमितिप्रतिबन्धः विरुद्धहेतौ। **सत्प्रतिपक्षं लक्षयति। यस्येति। विरोधिव्याप्यवत्ताग्रहसमानकालीनसाध्यव्याप्यवत्ताग्रहविषयकत्वमित्यर्थः। इदन्तु प्राचीनमताभिप्रायेण। वस्तुतः साध्याभावव्याप्यवत्पक्षकत्वं सत्प्रतिपक्षलक्षणम्। एतस्यापि विरुद्धवदनुमितिप्रतिबन्धकत्वं न च विरुद्धेन स्यादभेदः। तत्र साध्याभावव्याप्यत्वं हेतोरेव। अत्र तु यस्यकस्यचिदिति भेदसम्भवात्।** वक्ष्यमाणसत्प्रतिपक्षहेतोः लक्षणात् तस्य पूर्वोक्तविरुद्धहेतुना सह कः संबन्धः इत्यपि अवगन्तुं शक्यते यथा - विरोधिव्याप्येति। यत्र एकस्मिन् ज्ञाने समानकाले विरोधिसाध्ययोः व्याप्ती ज्ञानविषयः, सः सत्प्रतिपक्ष इति। यदि पक्षे साध्याभावसाधकं हेत्वन्तरं विद्यते, तर्हि सत्प्रतिपक्षत्वमिति लक्षणान्तरेणोक्तं यथा - साध्याभावव्याप्य-

वत्पक्षकत्वं सत्प्रतिपक्षलक्षणमिति। विरुद्धसत्प्रतिपक्षयोर्भेदः उच्यते विरुद्धे समानहेतौ व्याप्तिद्वयस्थितिः सत्प्रतिपक्षे यस्यकस्यचिद्धेतौ चेति। **असिद्धं विभजते। असिद्ध इति।** **तत्सामान्यलक्षणं तु आश्रयासिद्ध्याद्यन्यतमत्वं बोध्यम्। पक्षतावच्छेदकाभाववत्पक्ष-कत्वमाश्रयासिद्धलक्षणम्। तमुदाहरति गगनेति। अत्रारविन्दे पक्षे पक्षतावच्छेदक-गगनीयत्वाभावात् लक्षणसंगतिः। एतज्ज्ञानस्य पक्षतावच्छेदकविशिष्टपक्षधर्मता-ग्रहप्रतिबन्धकत्वं हेत्वभाववत्पक्षकत्वं स्वरूपासिद्धलक्षणम्। तमुदाहरति। शब्द इति। अस्यापि पक्षधर्मताग्रहप्रतिबन्धकत्वमेव।** अरविन्दं सुरभि अरविन्दत्वात् इति ज्ञाननिष्ठायाः अनुमितिप्रतिबन्धकतायाः अवच्छेदकं पक्षतावच्छेदकाभाववत्पक्षकत्व-मिति। पक्षतावच्छेदकस्य गगनीयत्वस्य अरविन्दे अभावात् लक्षणोपपत्तिरिति। यत्र हेत्वभाववत्पक्षकत्वं हेतोः पक्षधर्मताग्रहप्रतिबन्धकरूपेण प्रतिबन्धकतावच्छेदकं तत् स्वरूपासिद्धः। **व्याप्यत्वासिद्धस्य लक्षणमाह। सोपधिक इति। उपाधिमत्त्वमित्यर्थः। उपाधिं निरूपयति। साध्येति। अत्रोपाधेः वह्निर्धूमव्यभिचारी धूमव्यापकाद्रेन्धन-व्यभिचारित्वात् इत्येवं व्यभिचारेण दूषकतावसेया।** उपाधिरेव व्याप्यत्वासिद्धस्य लक्षणम्। उपाधेस्तु व्यभिचारेण दूषकता। **बाधितलक्षणमाह। यस्येति साध्याभाव-वत्सपक्षकत्वं तल्लक्षणं बोध्यम्।** साध्याभाववत्सपक्षकत्वं प्रतिबन्धकतावच्छेदक-त्वमिति। **एतादृशबाधज्ञानादनुमितिप्रतिबन्धो भवति। इत्यनुमानपरिच्छेदः।**

उपमानं लक्षयति। उपमितीति। उपमितिं लक्षयति। संज्ञासंज्ञीति। पदपदार्थसम्बन्धज्ञानमित्यर्थः। पदपदार्थयोः सम्बन्धः शक्तिः। तथा शक्तिज्ञानमिति पर्यवसितं अत्र गोसदृशो गवयपदवाच्य इति। अतिदेशवाक्यार्थज्ञानं करणं तत्स्मरणं व्यापारः तादृशस्मरणानन्तरं गोसदृशो गवयपदवाच्य इत्याकारकमेवोपमितिज्ञानं भवति। नन्वयं गवयपदवाच्य इत्याकारकं तथा सति इदन्त्वावच्छिन्न एव गवयपदशक्ते-र्ग्रहणाद्गवयव्यक्त्यन्तरे शक्तिग्रहाभावेन गवयपदजन्यशाब्दबोधे गवयान्तरभानानुपपत्तिः। मम तु गोसदृशत्वसामान्येन निखिलगवयव्यक्तीनामुपस्थित्या गवयव्यक्त्यन्तरेष्वपि शक्तेः गृहीतत्वेन न तादृशानुपपत्तिगन्धोपि। इत्युपमानपरिच्छेदः। अत्र व्याख्याने हरिहरीये उपमितीति प्रतीकमादाय उपमानप्रकरणस्य व्याख्यानमारभते। उपमितिर्नाम संज्ञासंज्ञि-सम्बन्धज्ञानमिति मूले उक्तम्। एकस्य अर्थस्य संज्ञेत्युक्ते पदम्, संज्ञी तावत् पदार्थश्च तयोर्सम्बन्धाज्ञानं भवति उपमितिः इति व्याख्याकारः कथयति। अत्र सादश्यज्ञानं करणं भवति। पदपदार्थयोः सम्बन्धः शक्तिरिति प्रसिद्धः। तथा च शक्तिज्ञानं उपमितिरिति पर्यवसितं तत्करणमुपमानम्। तच्च गोसृशो गवयपदवाच्यो भवतीति सादृश्यज्ञानं भवति। अत्र व्यापारः अतिदेशावाक्यार्थस्मरणं भवति यतो हि अतिदेशवाक्यर्थ-ज्ञानजन्यत्वम्, अतिदेशवाक्यर्थज्ञानजन्योपमितिजनकत्वञ्च अतदेशवाक्यार्थस्मरणे

अस्ति[9]। एवं तादृशस्मरणानन्तरं गोसदृशो गवयपदवाच्य इत्याकारकमेवोपमितिज्ञानं भवति। अतः उपमितिः फलम्। अयं गवयपदवाच्य इत्याकारकं ज्ञानं मार्गे अवतीर्णे गवये जातेऽपि निखिलगवयेषु तज्ज्ञानं न संभवेदिति व्याख्याकारः अनुपपत्तिं प्रदर्श्य तत् समाधत्ते यत् सामान्यलक्षणप्रत्यासत्त्या गोसदृशत्वसामान्येन निखिलगवयव्यक्तीना-मुपस्थित्या गवयव्यक्त्यन्तरेष्वपि शक्तेः गृहीतत्वेन न तादृशानुपपत्तिगन्धोपीति।

**शब्दप्रमाणं लक्षयति। शब्देति। पदं लक्षयति। शक्तमिति। गामानयेत्यत्र गामिति वस्तुत एकस्यापि पदस्य वाक्यत्वं ज्ञेयम्। गवार्थकगोपदकर्मत्वार्थकद्वितीया-पदसमूहत्वादिति। शक्तत्वं च शक्तिनिरूपकत्वम्।** शब्दप्रमाणं लक्षयतीति कथनेन हरिहरीये व्याख्याने शब्दप्रकरणं प्रविशति व्याख्याकृत्। शब्देति प्रतीकमादाय व्याख्यां प्रारभते च। मूले पदसमूहः वाक्यमिति लक्षणं मनसि निधाय एकस्यापि पदस्य वाक्यत्वं कल्पयितुं शक्यते इति कथयति यथा वस्तुत एकस्यापि पदस्य वाक्यत्वं ज्ञेयमिति। तत्र विवरणमपि दीयते यथा गवार्थकगोपदकर्मत्वार्थकद्वितीयापदसमूहत्वादिति। गामानय इत्यस्य पदसमूहत्मकस्य वाक्यस्य घटकपदीभूते गामिति शब्दे गो इति प्रातिपदिकम् अम् इति प्रत्ययश्च विद्यते। तत्र गो इति प्रातिपदिकस्य सास्नादिमत्त्वमर्थः। अम्प्रत्यस्य

---

9 तज्जन्यत्वे सति तज्जन्यजनकत्वम् व्यापारत्वम्

तावत् कर्मत्वमर्थः। तथा च गामित्यस्य सास्नादिमत्कर्मत्वमर्थो भवति। अतः गामिति एकमपि पदं वाक्यं स्यात्। पश्चात् शक्तं पदमिति मूलस्थस्य व्याख्यां करोति यथा शक्तत्वं च शक्तिनिरूपकत्वमिति। अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारिका शक्तिः प्रतिपदं विद्यते। अतः शक्तिमान् इत्यर्थे शक्तिनिरूपकं पदं भवति। पदे श्रुते शक्तिगृहीतवतः अर्थस्य भानात्।

शक्तिं लक्षयति। अस्मादिति संकेतः इच्छापदादिति। पञ्चम्यर्थो जन्यत्वं बोध्यम्। बोधव्यत्वं बोधविषयत्वम्। तथा च पदजन्यबोधविषयत्वप्रकारिका ईश्वरेच्छाशक्तिरित्यर्थः इदञ्च स्वरूपकथनम्। तल्लक्षणन्तु अर्थस्मृत्यनुकूलपदपदा-र्थसम्बन्धम्। न च तादृशेश्वरेच्छायाः शक्तित्वे तस्याः सर्वपदार्थसाधारण्येन घटपदजन्यबोधविषयत्वप्रकारिकेश्वरेच्छा पटादावप्यस्तीति घटपदात्पटादेरपि बोधप्रसंग इति वाच्यम्। विशिष्य स्वनिष्ठप्रकारकत्वनिरूपकतत्तत्पदजन्यबोधविषयत्वसम्बन्धेन तत्तत्पदजन्यबोधविषयत्वप्रकारकेश्वरेच्छायाः तथात्वाभ्युपगमेन दर्शितातिप्रसंगासंभवात्। अस्माच्छब्दादयमर्थो बोद्धव्य इत्यत्र शक्तिलक्षणे इदम्-शब्दस्य सर्वनामत्वात् तस्य बुद्धिस्थपरामर्शित्वात् इदञ्चब्देन इष्टं पदं गृह्णीयदिति व्याख्याकारः स्पष्टं प्रतिपादयति यथा अस्मादिति संकेतः इच्छापदादिति। किञ्च अस्मादिति पञ्चम्याः जन्यत्वं बोध्यमिति

कथयति। तथा च शक्तिर्नाम पदजन्यबोधविषयत्वप्रकारिका ईश्वरेच्छा इति पर्यवस्यतीति व्याख्यातुरभिप्रायः। तथा चेत् एतादृशस्य शक्तित्वस्य सर्वपदार्थसाधारणात् अर्थात् घटपटेष्वपि सत्त्वात् घटे विद्यमाना शक्तिः समानतया पटेप्यस्तीति हेतोः घटशब्दोच्चारिते पटप्रत्ययः पटशब्दोच्चारिते घटप्रत्ययश्च स्यादित्यपद्येत। तदा पदजन्यबोधविषयत्व-प्रकारिका ईश्वरेच्छेति शक्तिलक्षणं केवलशक्तिलक्षणेन भाव्यम्। इदञ्चस्वरूपकथनमात्रं भवति। घटपटादिभिन्नपदानां शक्तिकथने लक्षणमिदमतिव्याप्तं स्यात्। अतः लक्षणमिदं निष्कर्ष्य कथयति व्याख्याकारः यथा स्वनिष्ठप्रकारकत्वनिरूपकतत्तत्पदजन्यबोध-विषयत्वसम्बन्धेन तत्तत्पदजन्यबोधविषयत्वप्रकारकेश्वरेच्छेति। तथा च एतादृश-निष्कृष्टलक्षणाभ्युपगमेन दर्शितस्य अतिप्रसङ्गः वार्यते। घटनिष्ठप्रकारकत्वं घटशब्दनिष्ठशक्तौ विद्यते, तन्निरूपकः घटशब्दः तज्जन्यबोधः कम्बुग्रीवादिमत्वरूप-घटबोधः विषयत्वसम्बन्धेन घटे एव वर्त्तते न तु पटे। घटपदजन्यबोधः कम्बुग्रीवादिमत्व-रूपघटबोधः तद्बोधविषयः घटः, विषयत्वं घटे, विषयत्वप्रकारकेश्वरेच्छापि घटविषयके-श्वरच्छा एव भवतीति हेतोः नातिव्याप्तिः।

**आकाङ्क्षेति। आकाङ्क्षाज्ञानं योग्यताज्ञानञ्चेत्यर्थः संनिधिरव्यवधानेन पदार्थोपस्थितिः आकाङ्क्षां लक्षयति। पदस्येति। गामानयेत्यत्र अन्यतरपदस्य**

अन्यतरपदाभावप्रयुक्तः अन्वयानुभावकत्वाभावो वर्तत इति लक्षणसंगतिः। योग्यतां लक्षयति अर्थबाध इति। तदभाववद्धर्मिकतद्बोधकत्वाभाव इत्यर्थः। वह्निना सिञ्चतीत्यत्र सेककरणत्वाभाववद्वह्नौ सेककरणत्वबोधकत्वान्नातिप्रसंगः। संनिधिं निरूपयति। पदानामिति। पदार्थान्तरोपस्थित्यव्यवहितपदार्थोपस्थितिप्रयोजकत्वमित्यर्थः। तेन विलम्बेनोच्चारितेऽपि क्वचित्कस्यचित्कदाचित्बोधसम्भवेपि न क्षतिः। तादृशबोधौपयिक तादृशवाक्यस्याप्यव्यवहितार्थोपथितिप्रयोजकत्वादिति ध्येयम्। एवं तात्पर्यज्ञानमपि शाब्दज्ञाने कारणम्। पश्चात् व्याख्याता आकाङ्क्षेति आकाङ्क्षां लक्षयति। तदनु गामानयेत्यत्र वाक्ये आकाङ्क्षालक्षणस्य समन्वयः क्रियते यथा गामानयेत्यत्र अन्यतरपदस्य अन्यतरपदाभावप्रयुक्तः अन्वयानुभावकत्वाभावो वर्तत इति लक्षणसङ्गतिरिति। योग्यता नाम अर्थबाध इति मूले उक्तं लक्षणं विवृणोति व्याख्याकारो यथा तदभाववद्धर्मिकतद्बोधकत्वाभाव इत्यर्थ इति। वह्निना सिञ्चतीत्यत्र सेककरणत्वाभाववद्वह्नौ सेककरणत्वबोधकत्वमिति लक्षणसमन्वयोऽपि क्रियते। इत्येव व्याख्यायां बहुत्र स्थलेषु लक्षणेषु उदाहरणानां समन्वयः, परिष्कृतलक्षणानि च कथ्यन्ते।

तात्पर्यं च तत्प्रतीतीच्छयोच्चारितत्वं न च शुकोच्चारितवाक्ये एतादृशतात्पर्यसम्भवात्तादृशवाक्याच्छाब्दबोधो न स्यादिति वाच्यम्। तदितरप्रतीतीच्छयानुच्चारितत्वस्य

विवक्षणीयत्वात्। न चैवमपि यत्राश्वलवणोभयबोधेच्छयोच्चारितं सैन्धवपदं तत्राश्वेतरलवणप्रतीतीच्छयोच्चारितत्वस्य लवणेतराश्वप्रतीतीच्छयोच्चारितत्वस्य च सत्वेन तत्तदितरप्रतीतीच्छया अनुच्चारितत्वरूपतात्पर्यासम्भवात् शाब्दबोधानुपपत्तिरिति वाच्यम्। तदितरमात्रप्रतीतीच्छया अनु च्चारितत्वस्य विवक्षितत्वात्तत्र चाश्वमात्रप्रतीतीच्छया लवणमात्रप्रतीतीच्छया वाऽनुच्चारितत्वस्य सत्वान्नानुपपत्तिरिति। तात्पर्यज्ञानस्यापि शाब्दज्ञाने कारणत्वे तात्पर्यं च तत्प्रतीतीच्छयोच्चारितत्वमिति उक्त्वा तथा चेत् शुकोच्चारितवाक्ये एतादृशतात्पर्यसम्भवात्तादृशवाक्याच्छाब्दबोधो न स्यादिति वाच्यमिति शङ्कामुद्भाव्य तत् समाधानत्वेन कथयति यथा-तदितरप्रतीतीच्छयानुच्चारितत्वस्य विवक्षणीयत्वादिति। एवं लक्षणे कथिते अपि यत्राश्वलवणोभयबोधेच्छयोच्चारितं सैन्धवपदं तत्राश्वेतरलवणप्रतीतीच्छयोच्चारितत्वस्य लवणेतराश्वप्रतीतीच्छयोच्चारितत्वस्य च सत्वेन तत्तदितरप्रतीतीच्छया अनुच्चारितत्वरूपतात्पर्यासम्भवात्शाब्दबोधानुपपत्तिरिति न वाच्यमिति शङ्कां कथयित्वा तत्समाधत्ते यथा तदितरमात्रप्रतीतीच्छया अनुच्चारितत्वस्य विवक्षितत्वात्तत्र चाश्वमात्रप्रतीतीच्छया लवणमात्रप्रतीतीच्छयावाऽनुच्चारितत्वस्य सत्वान्नानुपपत्तिरिति।

वाक्यं विभजते। तद्विविधमिति। वैदिकं वेदतन्मूलस्मृतीतिहासादिकमीश्वरोक्तत्वात् इति। ईश्वरादिप्रणीतत्वादित्यर्थः। लौकिकवैदिकभेदात् वाक्यं विभजते। तत्र वैदिकवाक्यस्य स्वरूपं व्याख्यायां लक्षयति यथा वेदतन्मूलस्मृतीतिहासादिकमीश्वरोक्तत्वादिति। अत्र ईश्वरोक्तं नाम ईश्वरादिप्रणीतत्वमित्यर्थ इति कथयति।

अत्रायं शाब्दबोधप्रकारः। देवदत्तो ग्रामं गच्छतीत्यत्र ग्रामस्य द्वितीयार्थे कर्मत्वेन्वयः।

तस्य धात्वर्थे गमनेऽन्वियः तस्य आख्यातार्थे कृतौ जनकत्वसम्बन्धेनान्वयः तस्य च प्रथमान्तार्थेऽन्वियः। लडर्थो वर्तमानत्वं तस्यापि कृतौ अन्वयः। तथा च ग्रामकर्मकगमनजनकवर्तमानकृतिमान्देवदत्त इति शाब्दबोधः। देवदत्तेन गम्यते ग्राम इत्यादौ तृतीयान्तार्थदेवदत्तवृत्तित्वस्य आख्यातार्थकृतावन्वयः। तस्याः जन्यत्वसम्बन्धेन धात्वर्थे गमने तस्य जन्यत्वसम्बन्धेन आत्मनेपदार्थे कर्मणिफले अन्वयः। तस्य प्रथमान्तार्थे अन्वयः। तथा च देवदत्तवृत्तिकृतिजन्यगमनजन्यफलशाली ग्राम इति शाब्दबोधः। अनन्तरं अत्र व्याख्यायां नैयायिकानां शाब्दबोधप्रकारं विस्तरः प्रतिपादयति यथा देवदत्तो ग्रामं गच्छतीत्यत्र वाक्ये ग्राममित्यत्र ग्राम इति प्रातिपदिकम् अम् प्रत्ययश्च विद्येते। तत्र ग्रामार्थकग्रामशब्दस्य द्वितीयार्थे अम्प्रत्यये कर्मत्वेन अन्वयः। तस्य धात्वर्थे

गमने अन्वयः, तस्य आख्यातार्थे कृतौ जनकत्वसम्बन्धेनान्वयः,अत्र आख्यातार्थो नाम धात्वर्थः। कृतेस्तावत् प्रथमान्तार्थे अन्वयः। लडर्थो वर्तमानत्वं तस्यापि कृतौ अन्वयः। तथा च देवदत्तो ग्रामं गच्छतीत्यस्मात् वाक्यात् ग्रामकर्मकगमनजनकवर्तमानकृतिमान् देवदत्त इति शाब्दबोधः उदेति। अत एव नैयायिकाः प्रथमान्तमुख्यविशेष्यक-शाव्दबोधिकाः भवन्तीति वक्तुं शक्यते, यतोहि शाब्दबोधे प्रथमान्तार्थस्यैव प्राधान्यमथवा विशेष्यत्वम्। अनन्तरं व्याख्यायां कर्मणिवाक्येषु कथं शाब्दबोधप्रकारः, कथं प्रत्येकमपि पदमितरत्र पदेष्वन्वेतीति च कथयति यथा देवदत्तेन गम्यते ग्राम इत्यादौ कर्मणि प्रयोगे तृतीयान्तार्थदेवदत्तवृत्तित्वस्य आख्यातार्थकृतावन्वयः। तस्याः जन्यत्वसम्बन्धेन धात्वर्थे गमने, तस्य जन्यत्वसम्बन्धेन आत्मनेपदार्थे कर्मणिफले अन्वयः। तस्य प्रथमान्तार्थे अन्वयः। तथा च देवदत्तवृत्तिकृतिजन्यगमनजन्यफल-शालीग्राम इति शाब्दबोध इति।

**भावप्रयोगस्थले देवदत्तेन भूयते स्थीयते सुप्यते इत्यादौ देवदत्तवृत्तिकृतिजन्यं भवनं स्थितिः स्वाप इत्येवं धात्वर्थमुख्यविशेष्यक एव शाब्दबोधः। द्वितीयालोपस्थले दध्यानय पश्येत्यादौ दधिशब्दस्य लक्षणया दधिविशिष्टकर्मत्वमित्यर्थः अकर्मकस्थले घटस्तिष्ठति घटो नश्यतीत्यादौ लक्षणया आश्रयत्वमाख्यातार्थकर्तृकारकचैत्रघटादि-**

**पदार्थेषु संयोगप्रतियोगितादिसम्बन्धेन भूतलवृत्तित्वाश्रयत्वनाशाश्रयत्वादेरन्वयबोधः।** अनन्तरं व्याख्यायां भावेवाक्येषु कथं शाब्दबोधप्रकारः, कथं प्रत्येकमपि पदमितरत्र पदेष्वन्वेतीति च कथयति यथा भावप्रयोगस्थले देवदत्तेन भूयते स्थीयते सुप्यते इत्यादौ देवदत्तवृत्तिकृतिजन्यं भवनं स्थितिः स्थाप इत्येवं धात्वर्थमुख्यविशेष्यक एव शाब्दबोध इति। दध्यानयेत्यादिद्वितीयालोपस्थले पश्येत्यादौ च कथं शाब्दबोधप्रकारः इति कथयति यथा दधिशब्दस्य लक्षणया दधिविशिष्टकर्मत्वमित्यर्थः।

**कारकाणि षट्। तत्र कर्तृकारकत्वं कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वम्। रामेण बाणेन हतो बालीत्यत्र हननानुकूलसंयोगादिजनकत्वेन कर्मकारकप्रयोजके बाणेऽति व्याप्तिवारणाय कारकान्तराप्रयोज्यत्वे सतीति। तथा च रामकर्तृकबाणकरणकहननाश्रयो बालीति शाब्दबोधः। अत्र बाणस्य कर्तृकारकान्तर-प्रयोज्यत्वेन न क्षतिः राज्ञपुरुषमानयेत्यत्र पुरुषस्वामिनि राजनि तद्वारणाय कारकान्तरप्रयोजकेति। वस्तुतः क्रियानुकूलकृतिमत्त्वं कर्तृत्वम्। रथो गच्छति घटो नश्यतीत्यादौ चाचेतने कर्तृत्वप्रयोगो गौण एवेति ध्येयम्।** पश्चात् व्याख्याने कारकाणि षडित्युक्त्वा प्रत्येकमपि कारकस्य लक्षणं कथयति, तेन साकं तद्घटितानां वाक्यानां शाब्गबोघप्रकारमपि कथयति यथा तत्र कर्तृकारकत्वं कारकान्तराप्रयोज्यत्वे सति

कारकान्तरप्रयोजकत्वम्। रामेण बाणेन हतो बालीत्यत्र हननानुकूलसंयोगादिजनकत्वेन कर्मकारकप्रयोजके बाणे अतिव्याप्तिवारणाय कारकान्तराप्रयोज्यत्वे सतीति। तथा च रामकर्तृकबाणकरणकहननाश्रयो बालीति शाब्दबोधः। अत्र बाणस्य कर्तृकारका-न्तरप्रयोज्यत्वेन न क्षतिः। राजपुरुषमानयेत्यत्र पुरुषस्वामिनि राजनि तद्वारणाय कारकान्तरप्रयोजकेति। पश्चात् क्रियानुकूलकृतिमत्त्वमेव कर्तृत्वमिति कथयति यतोहि कर्तृकारकत्वं कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वम् इति कर्तृलक्षणं रथो गच्छति घटो नश्यतीत्यादौ न सङ्गच्छेत। अचेतने कर्तृत्वप्रयोगो गौण एवेति ध्येयमिति च व्याख्याने कथयति।

कर्मत्वं क्रियाजन्यफलशालित्वम्। देवदत्तो ग्रामं गच्छतीत्यादौ ग्रामस्य देवदत्त-समवेतगमनक्रियाजन्यसंयोगरूपफलशालित्वात् लक्षणसंगतिः न च देवदत्तनिष्ठगम-नजन्यसंयोगरूपफलशालित्वं देवदत्तस्याप्यस्ति संयोगस्य द्विनिष्ठत्वात्। तथा च देवदत्तस्यापि कर्मत्वापत्तिरिति वाच्यम्। परसमवेतत्वेन क्रियाया विशेषणीयत्वाद्देवदत्तस्य च स्वसमवेतक्रियाजन्यसंयोगशालित्वेन परसमवेतक्रियाजन्यफलशालित्वाभावान्न क्षतिः। न च देवदत्तो ग्रामाद्ग्रामान्तरं गच्छतीत्यत्र अपादानग्रामस्यापि कर्मत्वापत्तिः तस्य देवदत्तगमनजन्यविभागशालित्वादिति वाच्यम्। परसमवेतधात्वर्थतावच्छेदकफलशालि-

**त्वस्य विवक्षितत्वात्तथा च गमिधातोः संयोगविशिष्टगमनार्थकत्वेन विभागस्य तदर्थ-तावच्छेदकत्वाभावान्न तदाश्रये पूर्वदेशेतिव्याप्तिः।** व्याख्याने द्वितीयं कर्मकारकं चर्चयति यथा कर्मत्वं क्रियाजन्यफलशालित्वमिति। पुनः क्रियाजन्यफलशालित्वमिति कर्मकार-कलक्षणस्य समन्वयो क्रियते यथा देवदत्तो ग्रामं गच्छतीत्यादौ ग्रामस्य देवदत्तसमवेतगमनक्रियाजन्यसंयोगरूपफलशालित्वात् लक्षणसंगतिः। न च देवदत्त-निष्ठगमनजन्यसंयोगरूपफलशालित्वं देवदत्तस्याप्यस्ति संयोगस्य द्विनिष्ठत्वात्। तथा च देवदत्तस्यापि कर्मत्वापत्तिरिति वाच्यम्। परसमवेतत्वेन क्रियाया विशेषणीयत्वाद्देवदत्तस्य च स्वसमवेतक्रियाजन्यसंयोगशालित्वेन परसमवेतक्रियाजन्यफलशालित्वाभावान्न क्षतिः। न च देवदत्तो ग्रामाद्ग्रामान्तरं गच्छतीत्यत्र अपादानग्रामस्यापि कर्मत्वापत्तिः तस्य देवदत्तगमनजन्यविभागशालित्वादिति वाच्यम्। परसमवेतधात्वर्थतावच्छेदकफलशालि-त्वस्य विवक्षितत्वात्तथा च गमिधातोः संयोगविशिष्टगमनार्थकत्वेन विभागस्य तदर्थतावच्छेदकत्वाभावान्न तदाश्रये पूर्वदेशेतिव्याप्तिः।

**व्यापारवत्कारणत्वं करणत्वम्। व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकः। काष्ठं कुठारेण छिनत्तीत्यत्र कुठारस्य स्वजन्यत्वे सति स्वजन्यछेदनजनको यः काष्ठसंयोगः तद्वत्वेन लक्षणसंगतिः।** व्याख्याने तावत् तृतीयं कर्मकारकं कथयति यथा

व्यापारवत्कारणत्वं करणत्वमिति। व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकः इति व्यापाररलक्षणमुक्त्वा काष्ठं कुठारेण छिनत्तीत्यत्र तस्य समन्वयो क्रियते यथा कुठारस्य स्वजन्यत्वे सति स्वजन्यछेदनजनको यः काष्ठसंयोगः तद्वत्वेन लक्षणसंगतिरिति। क्रियाकर्मीभूतद्रव्यनिष्ठस्वत्वभागित्वेन उद्देश्यत्वं सम्प्रदानत्वम्। ब्राह्मणाय भूमिं ददातीत्यादौ दानकर्मीभूतभूमिनिष्ठस्वत्वभागित्वेन ब्राह्मणस्योद्देश्यत्वाल्लक्षणसंगतिः। वस्तुतः क्रियाकर्मीभूतद्रव्यजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदानत्वम्। पितृभ्यः श्राद्धं कुर्यादित्यत्र क्रियाकर्मीभूतश्राद्धजन्यसुखरूपफलभागित्वेन पित्रुद्देश्यकश्राद्धकर्मक्रियानुकूलकृतिमानिति अन्वयबोधः। वृक्षायोदकं सिञ्चतीत्यादौ क्रियाकर्मजन्यवृद्धिरूपफलभागित्वाद्वृक्षस्य लक्षणसंगतिः। न च देवदत्तो ग्रामं गच्छतीत्यादौ देवदत्तपदोत्तरं चतुर्थ्यापत्तिः। देवदत्तस्य गमनक्रियाकर्मग्रामजन्यसुखभागित्वेन उद्देश्यत्वसम्भवात्। तथा च देवदत्तो ग्रामं गच्छतीत्यत्र देवदत्ताय ग्रामं गच्छतीति प्रयोगः स्यादिति वाच्यं उद्देश्यत्वयेच्छाविषयत्वार्थकतया देवदत्तस्य ग्रामजन्यसुखभागित्वप्रकारकेच्छाविषयत्वाभावान्निरुक्तापत्त्यसम्भवात् इति। व्याख्याने चतुर्थं सम्प्रदानकारकं भणति यथा क्रियाकर्मीभूतद्रव्यनिष्ठस्वत्वभागित्वेन उद्देश्यत्वं सम्प्रदानत्वमिति। किञ्च ब्राह्मणाय भूमिं ददातीत्यादौ तस्य समन्वयो क्रियते यथा दानकर्मीभूतभूमिनिष्ठस्वत्वभागित्वेन ब्राह्मणस्योद्देश्यत्वाल्लक्षणसंगतिरिति। क्रियाकर्मीभूतद्रव्यजन्यफलभागित्वेनोद्देश्यत्वं सम्प्रदा-

नत्वम्। पितृभ्यः श्राद्धं कुर्यादित्यत्र क्रियाकर्मीभूतश्राद्धजन्यसुखरूपफलभागित्वेन पित्रुद्देश्यकश्राद्धकर्मक्रियानुकूलकृतिमानिति अन्वयबोधः। वृक्षायोदकं सिञ्चतीत्यादौ क्रियाकर्मजन्यवृद्धिरूपफलभागित्वाद्वृक्षस्य लक्षणसंगतिः। न च देवदत्तो ग्रामं गच्छतीत्यादौ देवदत्तपदोत्तरं चतुर्थ्यापत्तिः। देवदत्तस्य गमनक्रियाकर्मग्रामजन्यसुख-भागित्वेन उद्देश्यत्वसम्भवात्। तथा च देवदत्तो ग्रामं गच्छतीत्यत्र देवदत्ताय ग्रामं गच्छतीति प्रयोगः स्यादिति वाच्यं उद्देश्यत्वयेच्छाविषयत्वार्थकतया देवदत्तस्य ग्रामजन्यसुखभागित्वप्रकारकेच्छाविषयत्वाभावान्निरुक्तापत्त्यसम्भवात् इति।

**परसमवेतक्रियाजन्यफलशालित्वं अपादानत्वम्। वृक्षात्पर्णं पततीत्यादौ पर्ण-समवेतपतनक्रियाजन्यविभागाश्रयत्वेन वृक्षस्य अपादानत्वम्। वृक्षनिष्ठविभागानुकूल-पतनाश्रयः पर्ण इति शाब्दबोधः। अत्र विभाग एव पञ्चम्यर्थः निष्ठत्वमनुकूलत्वं च संसर्गमर्यादया लभ्यते। वृक्षात्पर्णं विभजते इत्यादाववधित्वं पञ्चम्यर्थः। तथा च वृक्षावधिकविभागानुकूलव्यापाराश्रयः पर्णमिति शाब्दबोधः।** अनन्तरं व्याख्याने पञ्चमं सम्प्रदानकारकं ब्रवीति यथा परसमवेतक्रियाजन्यफलशालित्वम् अपादानत्वमिति। तदनु परसमवेतक्रियाजन्यफलशालित्वं अपादानत्वमिति। लक्षणमदिं वृक्षात्पर्णं पततीत्यादौ समन्वयति यथा पर्णसमवेतपतनक्रियाया जन्यविभागाश्रयत्वेन वृक्षस्य अपादानत्वमिति।

अनन्तरं व्याख्याने वृक्षात्पर्णं पततीति वाक्यस्य शाब्दबोधमपि ददाति यथा वृक्षनिष्ठविभागानुकूलपतनाश्रयः पर्ण इति शाब्दबोधः इति।

षष्ठ्यास्तु न कारकविभक्तित्वं तस्याः शेषेषष्ठीत्यनुशासनेन संबन्धसामान्यार्थकत्वप्रतिपादनात्। चैत्रस्य ग्रामं मैत्रो गच्छतीत्यादौ स्वामित्वसम्बन्धः षष्ठ्यर्थः। तथा च चैत्रस्वामिकग्रामकर्मकगमनानुकूलकृतिमान्मैत्र इति शाब्दबोधः। कर्तृकर्मान्यतरद्वराक्रियाश्रयत्वे सति क्रियोपकारकत्वं अधिकरणत्वं चत्वरे चैत्रः पचतीत्यादौ चत्वरस्य चैत्रद्वाराक्रियाश्रयत्वात्लक्षणसंगतिः एवं स्थाल्यां पचतीत्यादौ तण्डुलादिकर्मद्वारा स्थाल्याः क्रियाश्रयत्वाल्लक्षणसंगतिः चैत्रस्य तण्डुलं मैत्रः पचतीत्यत्र चैत्रस्य तण्डुलरूपकर्मद्वारापाकाश्रयस्य  वारणाय क्रियोपकारकेति कर्मादिकारकवारणाय विशेषणदलम्। अनन्तरं व्याख्याने षष्ठं अधिकरणकारकं ब्रवीति यथा कर्तृकर्मान्यतरद्वराक्रियाश्रयत्वे सति क्रियोपकारकत्वम् अधिकरणत्वमिति। लक्षणमदिं चत्वरे चैत्रः पचतीत्यादौ समन्वयति यथा चत्वरस्य चैत्रद्वारा क्रियाश्रयत्वात्लक्षणसंगतिरिति। एवं स्थाल्यां पचतीत्यादौ तण्डुलादिकर्मद्वारा स्थाल्याः क्रियाश्रयत्वाल्लक्षणसंगतिरिति च।

एवमाधेयत्वमपि सप्तम्यर्थः भूतले घट इत्यादौ भूतलनिरूपिताधेयताको घट इत्यन्वयबोधः। अत्र निरूपितत्वं संबन्धः। चर्मणिमृगं हन्तीत्यादौ नाधिकरणसप्तमी।

**किन्तु निमित्ते। निमित्तत्वं च उद्देश्यत्वं तथा च चर्मोद्देश्यकमृगकर्मकहननानुकूलकृति-मानित्यन्वयबोधः।** एवमाधेयत्वमपि सप्तम्यर्थः इति व्याख्यायां कथयित्वा तस्योदाहरणं कथयति यथा भूतले घट इत्यादौ भूतलनिरूपिताधेयताको घट इत्यन्वयबोध इति। तत्र विद्यमानः सम्बन्धः निरूपितत्वं भवतीति च कथयति व्याख्याता। चर्मणि मृगं हन्तीत्यादौ सप्तमी श्रूयते तथापि कर्तृकर्मान्यतरद्वाराक्रियाश्रयत्वे सति क्रियोपकारकत्वम् इति लक्षणलक्षिता अधिकरणत्ववाच्या सप्तमी न भवतीति कथयति यथा **नाधिकरणसप्तमी** किन्तु निमित्ते इति। निमित्तत्वञ्चत्र उद्देश्यत्वं तथा च चर्मोद्देश्यकमृगकर्मक-हननानुकूलकृतिमान् इत्यन्वयबोधश्चात्रागच्छतीति।

**मयि तिष्ठति समागत इत्यादौ सतिसप्तमी। तदर्थश्च सामानाधिकरण्यम्। तद्विविधम्। एकदेशवृत्तित्वं एक कालवृत्तित्वं चेति तत्र कालिकं सामानाधिकरण्यं तथा च मत्स्थितिकालीनसमागमनाश्रयेत्यन्वयबोधः। रूपरहितत्वे सति स्पर्शवान् इत्यत्र दैशिकं सामानाधिकरण्यं इत्यादिसंग्रहणीयम्।** मयि तिष्ठति समागत इत्यादिषु उदाहरणेषु सप्तम्यर्थः कर्तृकर्मान्यतरद्वाराक्रियाश्रयत्वे सति क्रियोपकारकत्वरूपम् अधिकरणत्वं न भवतीति व्याख्याकृत्। तादृशेषु उदाहरणेषु सतिसप्तमी भवति। तदर्थश्च सामाना-धिकरण्यम्। तद्विविधम्। एकदेशवृत्तित्वं एककालवृत्तित्वं चेति।

**वृष्टिर्भविष्यतीत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वरूपं भविष्यत्वं लृडर्थः। तथा च विद्यमानप्रागभावप्रतियोग्युत्पत्तिकसत्ताश्रयो वृष्टिरिति शाब्दबोधः।** अनन्तरं व्याख्याकृत् केषाञ्चन लकाराणामर्थं तद्घटकीभूतानां वाक्यानां शाब्दबोधश्च कथ्यते यथा लृडर्थः भविष्यत्वं भवति। तेषां वृष्टिर्भविष्यतीत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वरूपं लृडर्थः इति। तथा च विद्यमानप्रागभावप्रतियोग्युत्पत्तिकसत्ताश्रयो वृष्टिरिति शाब्दबोधः।

**घटोभवितेत्यत्र लुटो भविष्यत्वमनद्यतनत्वञ्चार्थः। अतीतरात्र्यपरार्धागामिरात्रिपूर्वार्धसहितं दिनमद्यतनम्। तद्भिन्नवृत्तित्वमनद्यतनत्वम्। तथा च भविष्यदनद्यतनसत्ताश्रयो घट इत्यन्वयबोधः।** अनन्तरं व्याख्याकृत् लुटः अर्थं कथयति यथा लुटो भविष्यत्वमनद्यतनत्वञ्चार्थ इति। घटो भवितेत्यत्र अतीतरात्र्यपरार्धागामिरात्रिपूर्वार्धसहितं दिनमद्यतनम्। तद्भिन्नवृत्तित्वमनद्यतनत्वम्। तथा च भविष्यदनद्यतनसत्ताश्रयो घट इत्यन्वयबोधः। **घटोऽभूदित्यत्र लुङर्थः भूतत्वम्। तच्च वर्तमानध्वंसप्रतियोग्युत्पत्तिकत्वम्। तादृशोत्पत्तिकसत्ताश्रयो घट इति बोधः।** अनन्तरं व्याख्याकृत् लुङर्थं कथयति यथा लुङर्थो भूतत्वमिति। भूतत्वं नाम वर्तमानध्वंसप्रतियोग्युत्पत्तिकत्वं भवति। घटोऽभूदित्यत्र तादृशोत्पत्तिकसत्ताश्रयोघट इति शाब्दबोधः आगच्छति।

**रामो बभूवेत्यत्र लिडर्थो अनद्यतनत्वं अतीतत्वं परोक्षत्वं च अतीतत्वं भूतत्वं चैकार्थकम्। परोक्षत्वं तु प्रत्यक्षाविषयत्वं तथा च अनद्यतनपरोक्षत्वविशिष्टविद्यमानध्वंस-प्रतियोग्युत्पत्तिमत्सत्ताश्रयो राम इति शाब्दबोधः।** अनन्तरं व्याख्याकृत् लिडर्थं कथयति यथा लिडर्थो अनद्यतनत्वम्, अतीतत्वं परोक्षत्वं चेति। अतीतत्वं भूतत्वं चैकार्थकम्। परोक्षत्वं तु प्रत्यक्षाविषयत्वमिति। रामो बभूवेत्यत्र वाक्ये लक्षणसमन्वयोपि क्रियते यथा अनद्यतनपरोक्षत्वविशिष्टविद्यमानध्वंसप्रतियोग्युत्पत्तिमत्सत्ताश्रयो राम इति शाब्दबोध इति।

**घटोऽभवदित्यत्र लडर्थः अतीतत्वमनद्यतनत्वं च तथा च अनद्यतनायाविद्य-मानध्वंसप्रतियोग्युत्पत्तिः तदाश्रयो घट इति बोधः। सुभिक्षमभविष्यदित्यादौ कादाचित्के प्रयोगे भविष्यत्वं लृङर्थः। सुवृष्टिश्चेदभविष्यत्सुभिक्षमभविष्यदित्यादौ तु व्याप्यक्रियया-व्यापकक्रियाया अपादानं लृङर्थः। वृष्टिसत्तारूपव्याप्यक्रियया सुभिक्षसत्तारूपव्यापकक्रि-याया अपादानादिति।** अनन्तरं व्याख्याकृत् लडर्थं कथयति यथा लडर्थः अतीतत्वमन-द्यतनत्वं चेति। अतः घटोऽभवत्दित्यस्मात् वाक्यात् अनद्यतनायाविद्यमानध्वंसप्रतियो-ग्युत्पत्तिः तदाश्रयो घट इति बोधो जायते।

स्वर्गकामो यजेतेत्यादौ विधिर्लिंङर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्ट-साधनत्वम्। तथा च कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनया गानुकूलकृतिमान्स्वर्गकाम इति बोधः। न कलञ्जं भक्षयेदित्यादौ नञर्थस्य अभावस्य विध्यर्थेन सहान्वयेन विध्यर्थान्वितनञर्थस्य धात्वर्थे प्रकारतया भानं अभ्युपेयते। तथा च कृतिसाध्यबलवद-निष्टाजनकेष्टसाधनत्वाभाववत्कलञ्जभक्षणमिति शाब्दबोधः। अनन्तरं व्याख्याकृत् विधि-लिङर्थं तद्घटितपदस्य शाब्दबोधञ्च कथयति यथा विधिर्लिंङर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधनत्वमिति। अतः स्वर्गकामोयजेतेत्यादौ कृतिसाध्यबलवदनिष्टा-जनकेष्टसाधनयागानुकूलकृतिमान्स्वर्गकाम इति बोधः इति।

अशीर्लिङः लोटश्च वक्तुरिच्छाविषयत्वमर्थः तथा च गौर्भूयाद्ग्रामानयेत्यादौ क्रमेण मदिच्छाविषयसत्ताकागौः मदिच्छाविषयगोकर्मकानयनानुकूलकृतिमान्त्वमित्यन्वय-बोधः। अनन्तरं व्याख्याकृत् आशीर्लिङः लोटश्चार्थं कथयति यथा अशीर्लिङः लोटश्च-वक्तुरिच्छाविषयत्वमर्थ इति। तत्र गौर्भूयाद्ग्रामानयेत्यादौ क्रमेण मदिच्छाविषयसत्ताका गौः मदिच्छाविषयगोकर्मकानयनानुकूलकृतिमान्त्वमित्यन्वयबोधः भवति। पापच्यते इत्यादौ लङः पौनःपुन्यं अर्थः तच्च तदानीन्तन प्रकृत्यर्थसजातीयक्रियान्तरध्वंस-कालीनत्वं। लडर्थो वर्तमानत्वमाख्यातार्थः कृतिः तथा च तदानीन्तन प्रकृत्यर्थसजातीय-

**क्रियान्तरध्वंसकालीनवर्तमानकृतिविषयः पाक इति शाब्दबोधः।** अनन्तरं व्याख्याकृत् यङ्प्रत्ययस्यार्थं कथयति यथा पौनः पुन्यम् अर्थः, तच्चतदानीन्तनप्रकृत्यर्थसजातीय-क्रियान्तरध्वंसकालीनत्वमिति। पापच्यते इत्यादौ तथा च तदानीन्तनप्रकृत्यर्थसजातीय-क्रियान्तरध्वंसकालीनवर्तमानकृतिविषयः पाक इति शाब्दबोध इति।

**घटं चिकीर्षतीत्यत्र सनः कृतीच्छार्थः सविषयकार्थप्रकृतिकाख्यातार्थस्य आश्रयत्वे लाक्षणिकत्वेन घटकर्मकृतीच्छाश्रय इति शाब्दबोधः।** अनन्तरं व्याख्याकृत् सन्प्रत्ययस्यार्थं कथयति यथा सनः कृतीच्छार्थः। घटं चिकीर्षतीत्यत्र सनः सविषयका-र्थप्रकृतिकाख्यातार्थस्य आश्रयत्वेलाक्षणिकत्वेन घटकर्मकृतीच्छाश्रय इति शाब्दबोधश्च भवति।

**स्नात्वा गच्छतीत्यादौ त्वा प्रत्ययस्य पूर्वकालीनत्वं कर्ता च अर्थः सन्निहि-तक्रियापेक्षया पूर्वकालीनत्वं च तत्प्रागभावकालवृत्तित्वं तदुत्पत्तिकालवृत्तिध्वंसप्रतियोगि-कालवृत्तित्वं वा तथा च गमनकालीनध्वंसप्रतियोगिकालवृत्तिस्नानकर्त्रभिन्नो गमनानुकूल-कृतिमानिति शाब्दबोधः स्नात्वेत्यत्र समानविभक्तिकत्वेनाभेदान्वयबोधः। अव्ययत्वेन प्रथमाविभक्तिलोपादिति।** अनन्तरं व्याख्याकृत् त्वाप्रत्ययस्यार्थं कथयति यथा त्वाप्रत्ययस्य पूर्वकालीनत्वं कर्ता च अर्थः इति। स्नात्वा गच्छतीत्यादौ सन्निहित-

क्रियापेक्षयापूर्वकालीनत्वं च तत्प्रागभावकालवृत्तित्वं तदुत्पत्तिकालवृत्तिध्वंसप्रतियोगिकालवृत्तित्वं वा तथा च गमनकालीनध्वंसप्रतियोगिकालवृत्तिस्नानकर्त्रभिन्नो गमनानुकूलकृतिमानिति शाब्दबोधः इति।

स्नातुं गच्छतीत्यादौ तुमुनः इच्छावानर्थः। स्नानेच्छावदभिन्नो गच्छतीत्यन्वयबोधः। इत्यादिकं सूक्ष्मदृशाबहुतरमूहनीयम्। अनन्तरं व्याख्याकृत् तुमुनः अर्थं कथयति यथा इच्छावानर्थः तुमुनः इति। स्नातुं गच्छतीत्यादौ स्नानेच्छावदभिन्नो गच्छतीत्यन्वयबोधः। इति शब्दपरिच्छेदः।

ननु अर्थापत्यादिप्रमाणान्तरा॑निरूपणाद्ग्रन्थस्य न्यूनता। तथा हि उपपाद्यज्ञानेन उपपादककल्पनमर्थापत्तिः पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र पीनत्वमुपपाद्यम्। तज्ज्ञानेन तदुपपादकं रात्रिभोजनं कल्प्यते इति तस्य प्रमाणान्तरत्वं एवं शते पञ्चाशत् इति सम्भवस्य इह वटे यक्षस्तिष्ठति इत्यैतिह्यस्य अर्थप्रमापकहस्तादिचेष्टायाश्च प्रमाणान्तरत्वमिति चेन्न। अर्थापत्तेः देवदत्तो रात्रौ भुङ्क्ते दिवाभुञ्जानत्वे सति पीनत्वात् यन्नैवं तन्नैवं इत्यनुमानेन्तर्भावात्। एवं शतं पञ्चाशत्संख्याकं तद्व्यापकसंख्याकत्वात् यथा सहस्रमित्यनुमाने सम्भवस्यान्तर्भावात्। ऐतिह्यस्य अज्ञातृमूलवक्तृकशब्दस्वरूपत्वात्चेष्टायाश्च अर्थबोधकशब्दानुमापकत्वेन प्रमाणान्तरत्वाभावान्नप्रमाणस्य चातुर्विध्या-

संगतिः इति न ग्रन्थस्य न्यूनता। न्यायशास्त्रप्रवर्तकैरङ्गीकृतं प्रमाणचतुष्टयं सविस्तरं प्रतिपाद्य इतोप्यधिकानां प्रमाणानां वैयर्थ्यं प्रदर्शयति अत्र। अयथार्थानुभवं विभजते। अयथार्थेति। संशयं लक्षयति। एकस्मिन्निति। एकधर्मिविशेष्यकविरुद्धनानाधर्मप्रकारक-ज्ञानत्वमित्यर्थः। विपर्ययं लक्षयति। मिथ्येति। तदभाववति तदभावाप्रकारकत्वे सति तत्प्रकारकज्ञानत्वमित्यर्थः तेन न संशयेऽतिव्याप्तिः। तर्कं लक्षयति। व्याप्येति। व्याप्यारोपपूर्वकव्यापकारोपकत्वं तर्कत्वमित्यर्थः। स्वप्नस्य विपर्ययादावन्तर्भावः। स्थाणुर्वा पुरुषो वेत्यात्मके संशये विषयस्य एकधर्मित्वेऽपि ज्ञानस्य नानाधर्मित्वमिति। मिथ्याज्ञानं विपर्ययमिति। तदेव अयथार्थानुभवस्वरूपत्वेन प्रथममुक्तं यथा तदभाववति तत्प्रकारकोऽनुभवो अयथार्थ इति। शुक्तौ इदं रजतमितीति उदाहरणम्। पुरुषत्वाभाववति स्थाणौ पुरुषत्वप्रकारकानुभवत्वात् संशये विपर्ययस्याव्याप्तिः। अतः विपर्ययस्य लक्षणं एवं परिष्करोति हरिहरः यथा - तदभाववति तदभावाप्रकारकत्वे सति तत्प्रकारक-ज्ञानत्वमित्यर्थः इति। संशये तत्प्रकारकत्वात् न दोषः। स्मृतिं विभजते। स्मृतिरिति। यथार्थस्मृतेर्लक्षणमाह। प्रमेति। प्रमाजन्यत्वे सति ज्ञानत्वमित्यर्थः। प्रमाजन्यसंस्कारादि-वारणाय विशेष्यम्। एवमप्रमाजन्यत्वे सति ज्ञानत्वं अयथार्थस्मृतिलक्षणार्थो बोध्यः। स्पष्टम्। सुखं निरूपयति। सर्वेषामिति। इदन्तु स्वरूपकथनम्। तल्लक्षणन्तु अन्येच्छा-नधीनेच्छाविषयत्वम्। इच्छाविषयस्य सुखहेतुस्रक्चन्दनादेर्वारणाय अन्येच्छानधीनेति

स्रक्चन्दनादेस्तु सुखेच्छाधीनेच्छाविषयत्वेन न अन्येच्छानधीनेच्छाविषयत्वम्। दुःखं निरूपयति। सर्वेषामिति। अन्यद्वेषानधीनद्वेषविषयत्वं दुःखस्य लक्षणम्। दुःखद्वेषाधीनद्वेषविषया हि कण्डकादिवारणाय अन्यद्वेषानधीनेति। सर्वेषामनुकूल-वेदनीयमिति सुखस्वरूपमेव। अन्यथा घटोऽनुकूल इत्याकारकज्ञानदशायामनुकूलत्व-प्रकारकज्ञानविशेष्यत्वस्य घटादावपि सत्त्वात् लक्षणत्वेन वक्तुं न शक्यते। अतः अन्येच्छानधीनेच्छाविषयत्वमिति। तथा दुःखस्यापि स्वरूपलक्षणावुक्तौ। एवं इष्टसाधनताज्ञानजन्यत्वं इच्छालक्षणम्। अनिष्टसाधनताज्ञानजन्यत्वं द्वेषलक्षणम्। प्रयत्नस्त्रिविधः। प्रवृत्तिः, निवृत्तिः, जीवनयोनियत्नश्चेति। इच्छाजन्या प्रवृत्तिः। द्वेषजन्या निवृत्तिः। जीवनादृष्टजन्या जीवनयोनियत्नः। अयं च प्राणधारणानुकूलः सर्वदैवयावत्प्राणधारणमस्त्यतो योग्यत्वमप्यस्त्यधर्मादिवदन्यथायोग्यविभुविशेषगुणानां यौगपद्यनिषेधात्कदापि ज्ञानाद्यनुत्पत्तिप्रसंगेन व्यवहारविप्रलोपापत्तिरिति ज्ञेयम्। धर्मं लक्षयति। विहितेति। वेदागमादिविहितकर्मजन्यगुणत्वमित्यर्थः। एवं वेदागमादिनिषिद्धकर्मजन्यगुणत्वमधर्मस्य लक्षणार्थो बोध्यः। धर्माधर्मयोर्लक्षणं स्पष्टम्। संस्कारं विभजते। संस्कारेति। संस्कारत्वजातिमत्त्वं संस्कारस्य लक्षणं। वेगलक्षणं च परत्वापरत्वभिन्नत्वे सति मूर्तमात्रगुणत्वम्। मूर्तद्रव्यमात्रवृत्तिरित्यर्थः, परत्वापरत्वयोरति-व्याप्तिवारणाय विशेषणम्। भावनां लक्षयति। अनुभवजन्येति। अनुभवध्वंसवारणाय

विशेष्यदलम्। स्मृतिहेतावात्मन्यतिव्याप्तिवारणाय अनुभवेति। अनुभवजन्ये स्मृतिहेतौ च अनुव्यवसाये अतिव्याप्तिवारणाय प्रकारः चिन्तनीयः। तादात्म्यसंबन्धानवच्छिन्नानुभव-निष्ठजनकतानिरूपितजन्यत्वे सति स्मृतिहेतुत्वमित्यर्थेन एतद्दोषवारणमिति ध्येयम्। अनुव्यवसायस्य अनुभवात्मकस्वरूपत्वात् तादात्म्यसंबन्धेन कारणत्वम्। तन्निवारणाय तादात्म्यसंबन्धानवच्छिन्नेति विशेषणम्। वस्तुतः वेगत्वजातिमत्त्वं वेगस्य लक्षणं एवं स्थितस्थापकस्यापि स्थितस्थापकत्वजातिमत्त्वं बोध्यम्। स्पष्टम्। कर्मणो लक्षणमाह। चलनात्मकमिति। द्रव्यगुणभिन्नत्वे सति जातिमत्त्वमित्यपि तल्लक्षणं बोध्यम्। चतुर्विंशतिगुणानामपि निरूपणं पर्यवसितम्। अनन्तरं कर्म निरूपयति। चलनात्मकमिति तत्स्वरूपम्। सामान्यं लक्षयति। नित्यमिति। नित्यत्वे सति एकत्वे सति अनेकानुगत-मित्यर्थः। घटत्वस्य नित्यत्वे सति एकत्वे सत्यनेकघटव्यक्तिषु समवेतत्वाल्लक्षणसंगतिः। न च सामान्ये संख्याया अभावात्कथमेकत्वसंख्याघटितलक्षणं तस्य संगच्छत इति वाच्यम्। एकार्थसमवायेनैकत्वसंख्यायाः सामान्येऽपि सत्वेन तद्घटितलक्षणसंगतेः। गगनादिवारणायानेकेति संयोगादिवारणाय नित्येति जलपरमाणुरूपादेर्नित्यत्वे सति अनेकसमवेतत्वादेकेति। रूपादेः प्रतिव्यक्तिविश्रान्तत्वेन एकस्यानेकानुगतत्वाभावान्नाति-व्याप्तिः।

विशेषं निरूपयति नित्यद्रव्येति। स्वतो व्यावृत्तत्वं तल्लक्षणम्। तच्च स्वभिन्न-लिंगजन्यस्वविशेष्यकेतरभेदानुमित्यविषयत्वे सति स्वलिंगकेतर भेदानुमितिजनकत्वम्। गन्धादिवारणाय सत्यन्तम्। गुरुत्वाद्यतीन्द्रियधर्मिकेतरभेदानुमित्यसंभवात्तद्वारणाय विशेष्यदलम्।

समवायं लक्षयति नित्य इति। नित्यत्वे सति संबन्धत्वमित्यर्थः| आकाशादिवारणाय विशेष्यदलम्। संयोगवारणाय नित्य इति। स्वरूपसंबन्धस्य विशेषणविशेष्यात्मकस्य स्वभिन्ननिरूपितत्वाभावात्कालिकसंबन्धेन नित्यानामपि कालवृत्तित्वे कालिकसंबन्धवारणाय सर्वाधारतानियामकीभूतसंबन्धभिन्नसंबन्धत्वं अपि देयम्। इत्थं च नित्यत्वे सति स्वसंबन्धिभिन्नत्वे सति सर्वाधारतानियामकीभूत-संबन्धभिन्नत्वे च सति संबन्धत्वं समवायलक्षणं पर्यवसितम्। केवलं संबन्धत्वमिति लक्षणोक्ते संयोगो अतिव्याप्तिः, तथा नित्यत्वमात्रोक्ते आकाशादावतिव्याप्तिः। स्वरूपसंबन्धवारणाय स्वसंबन्धिभिन्नत्वं, कालिकसंबन्धवारणाय सर्वाधारतानिया-मकीभूतसंबन्धभिन्नत्वे इत्यपि संयुज्य लक्षणं परिष्करोति यथा - इत्थं चेति।

प्रागभावं लक्षयति। अनादिरिति। अभावसामान्यलक्षणन्तु द्रव्यादिषङ्कान्योन्या-भावत्वम्। अनादित्वमुत्पत्तिरहितत्वम्। सान्तत्वं च नाशप्रतियोगित्वम्। गगनादिवारणाय

विशेष्यदलं घटादिवारणाय विशेषणम्। द्रव्यगुणकर्मसामान्यविशेषसमवायाः द्रव्यादिषड्कः, तस्य भेदः अभाव इति अभावसामान्यलक्षणमिति। सान्तत्वानुक्ते गगनादिषु तथा अनादित्वानुक्ते घटादिषु अतिव्याप्तिरिति। ध्वंसं लक्षयति। सादिरिति। उत्पत्तिमत्त्वे सति नाशरहितत्वमित्यर्थः। वस्तुतः उत्पत्तिमत्त्वे सति संसर्गाभाववत्त्वं ध्वंसस्य लक्षणं बोध्यम्। अन्यथा नाशस्य ध्वंसात्मकत्वेन तद्घटितस्य लक्षणत्वे अनवस्थादिदोषप्रसंग इति ध्येयम्। यदा घटो ध्वस्तः भवति तदा नाशस्य आरम्भः। अतः सादिरिति। वस्तुतः ध्वंसस्य नाशरहितत्वात् सादिरनन्तेति तर्कसंग्रहे लक्षणोक्तम्। किन्तु नाशस्य लक्षणे नाशपदस्य घटकत्वेन अनवस्थादोषसंभवात् लक्षणं परिष्करोति यथा - उत्पत्तिमत्त्वे सति संसर्गाभा-ववत्त्वं ध्वंसस्य लक्षणं बोध्यमिति अभावस्य संयोगसमवायादि प्रसिद्धसंसर्गानामभावत्वात्। अत्यन्ताभावं लक्षयति। त्रैकालिक इति। त्रैकालिकत्वं नित्यत्वम्। तथा च नित्यत्वे सति तादात्म्यसंबन्धभिन्नसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वमित्यर्थः। अन्योन्याभाववारणाय तादात्म्यभिन्नेति संसर्गविशेषणम्। तादात्म्यसंबन्धभिन्नस्वरूपादिसंबन्धावच्छिन्नप्रतियोगिताके घटाद्यभावाभावस्वरूपे घटादावतिव्याप्तिवारणाय नित्येति। न च नित्यत्वे सति संसर्गाभाववत्त्वं इत्येवलक्षणमस्तु किमर्थं तादृशगुरुशरीरस्य लक्षणत्वं इति वाच्यम्। अन्योन्याभावभिन्नाभावत्वरूप-संसर्गाभावत्वघटितस्यान्योन्याभावद्वयगर्भस्य भवदीयलक्षणस्य अस्मदीयलक्षणापेक्षया लाघवासंभवा-

दिति। अयमत्यन्ताभावः विशेषाभावसामान्याभावादिभेदेन बहुविधः। तथाहि नीलोघटो नास्तीत्यत्र विशेषाभावः घटो नास्तीत्यत्र सामान्याभावः। भूतलत्वविशिष्टघटो नास्तीत्यत्र विशिष्टभावः। वह्निघटोभयं नास्तीत्यत्र उभयाभावः। मतविशेषे घटत्वेन वह्निर्नास्तीति प्रतीतिसाक्षिको व्यधिकरणधर्मावच्छिन्नाभावोपि इति। यः अभावः स्वरूपसंबन्धेन नित्यतया वर्तते सः अत्यन्ताभावः। तदेव उक्तं नित्यत्वे सति तादात्म्यसंबन्धभिन्नसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वमिति। भेदेऽतिव्याप्तिवारणाय विषेष्यदलम्। घटाभावाभावस्वरूपे घटेऽतिव्याप्तिवारणाय विशेषणम्। अत्यन्ताभावस्य बहुत्वमपि दर्शयति। अन्योन्याभावं लक्षयति तादात्म्येति। संयोगादिसंबन्धेन घटादि-मत्यपि भूतलादौ भूतलं घटोनेतिप्रतीतिसंभवात्स्वतादात्म्यवति स्वस्मिन्स्वभेदप्रतीत्य-भावाच्च तादृशप्रतीतेः घटस्य तादात्म्यसंबन्धेनाभावो भूतले विषयः। स एव तादात्म्यसंबन्धावच्छिन्नप्रतियोगिकाभावः अन्योन्याभाव इति। घटः पटो न भवति एवं पटः घटो न भवतीति प्रतीतेः विषयः यो अभावः स अन्योन्याभावेति। अन्यथा घटः तदात्मना पटे नास्ति। एतदेव उक्तं तादात्म्यसंबन्धावच्छिन्नप्रतियोगिकाभावः इति। न्यायसूत्रोक्तषोडशपदार्थानामपि अस्मदुक्तसप्तपदार्थेषु एवान्तर्भावान्नसप्तत्वक्षतिरिति वदन्प्रकरणमुपसंहरति सर्वेषामेवेति। काणादेति। काणादं कणादर्षिप्रणीतं सप्तपदार्थ-प्रतिपादकं न्यायं

गौतमप्रणीतं षोडशपदार्थप्रतिपादकम्। एतच्छास्त्रद्वयप्रमेयाणामपि सप्तत्वेन संगृह्य निरूपणात् उभयोरपि शास्त्रयोः व्युत्पत्तिरस्य प्रकरणस्य फलमिति भावः।

'सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम्' इति तर्कसंग्रहे दृश्यते। किन्तु केवलं सप्त एव पदार्था इति अन्नंभट्टेन उक्तत्वात् न्यायसूत्रोक्तानां षोडशपदार्थानां ग्रहणं कथं वक्तुं शक्यते इति प्रश्नं समाधत्ते यथा – न्यायसूत्रोक्तेति षोडशपदार्थाः सप्तपदार्थेषु अन्तर्भूतमित्यर्थः। न्यायवैषेषिकदर्शनयोर्व्युत्पत्तिरेव तर्क-संग्रहाध्ययनप्रयोजनमिति प्रस्ताव्य ग्रन्थोयमुपसंहरति हरिहरः।

तर्कसंग्रहवृत्तिमिमां बुधः शांकरो मुदितान्तर आतनो

त्प्रीयतांपरमेश्वरएनया सर्वलोकहृदन्तरवस्थितः ||

हरिहर इतिविद्वान्कश्चिदासादितांबा-

रमणगुरुकृपाम्भः पूर्णनेत्रत्रिभागः

विगलितकलुषाणां पण्डितानां मनोज्ञं

ह्यकृतपरमसूक्ष्मालोकनानां निबन्धम् ||

शिवगिरिरमण श्रीपापनाशेशमौलि-

स्थिरतरलसदिन्दुक्षालिताध्याखिलाशे

शिवतरघटनाश्रीताम्रयोर्मध्यदेशे

घटजमुनिनिवासेस्नेहपुर्यांस्थितःसन् ॥

हरिः ओम् ।

श्रीपापनाशेशमौलिस्थिरतरलसदिन्दुक्षालितान्ध्याखिलाशे शिवतरघटनाश्रीताम्रयोः मध्यदेशे घटजमुनिनिवासे स्नेहपुर्याख्यदेशे स्थितः सन् आसादितांबारमणगुरुकृपाम्भः पूर्णनेत्रत्रिभागः हरिहराख्यो विद्वान् कश्चित् विगलितकलुषाणां पण्डितानां मनोज्ञं ह्यकृतपरमसूक्ष्मालोकनानां निबन्धम् हरिहरीयनामिकाम् इमां तर्कसंग्रहवृत्तिं सर्वान्तर्यामिने परमात्मने समर्पयित्वा सर्वेभ्योपि लेकेभ्यः व्यातनोत्।

इति तृतीयोऽध्यायः। अध्यायत्रयात् यदुपलब्धं तद् 'निरीक्षणानि' इति नामके चतुर्थेऽध्याये विशदीक्रियते।

# चतुर्थोऽध्यायः

# निरीक्षणानि

## आमुखम्

चतुर्थाध्यायेऽस्मिन् मम शोधे उपकृताः मातृकाः अवलोक्य तासां साजात्यवैजात्यपरिशीलनेन वंशावलिं निर्मीय तर्कसंग्रहस्य बहुषु व्याख्यानेषु सत्स्वपि व्याख्यानस्य महत्त्वं किमिति च निर्णीयते।

## वंशावलिः

च ,छ इति मातृके अत्यन्तं समाने भवतः यतोहि उभयत्रापि तुल्याः अनेके पाठभेदाः दृश्यन्ते। किन्तु छमातृका चमातृकामपेक्ष्य अधिकान् पाठभेदान् प्रदर्शयति। परन्तु ते भेदाः स्खालित्येन सम्भूता न सन्ति। अतः चछमातृके समानशाखायां भवतः किन्तु विभिन्नमातृकाग्रन्थावलम्बन्यौ स्तः। A इति आदिममातृकायाः च इति D इति चमातृके आगते,D इति मातृकायाः छ इति मातृका च उत्पन्ना।

घ इति मातृका तावत् सर्वाभ्योऽपि मातृकाभ्यो विभिन्ना भवति। मातृकायामस्यां समान्येन नैके असाधुपाठाः सन्ति। अतः घ इति मातृका मूलमातृकायाः साक्षात् अक्षरविन्यस्ता न स्यात्, तथा अन्येभ्यो मातृकाभ्यः विभिन्नामेकां शाखां प्रतिनिधीकरोति। अतः घ इति मातृकायाः मातृग्रन्थत्वेन अगतिकगत्या B इति साङ्कल्पिकां मातृकां स्वीकुर्यात्।

क, ख, ग, ङ इत्येताः चतस्रः मातृकाः अत्यन्तं तुल्यतां यन्ति। क, ग इत्येते ख, ङ इत्येताभ्यां मातृकाभ्याम् अधिकान् पाठभेदान् प्रदर्शयति। क इति मातृका तावत् ग इति मातृकायाः स्वीकृता भवतीति कमातृकायाः पुष्पिकायां सूचितं विद्यते। गमातृकायाः कश्चन मातृकापाठः(E) आदेयो भवति। ख,ङ,E इत्येताः मातृकाः प्रतिनिधीकुर्वन् कश्चन महापाठः(C)स्वीकरणीयो भवति। इममेव विषयं अग्रिमे पुटे रेखाचित्ररूपेण दत्तं अस्ति।

**ग्रन्थवैशिष्ट्यम्**

हरिहरीयात्मिका तर्कसंग्रहव्याख्या मच्छोधविषयीभूता भवति। तत्र तर्कसंग्रहस्थान् विषयान् निष्कर्षतया परिशीलयति। तर्कसंग्रहग्रन्थं तथा नव्यञ्च न्यायम् अधिजिगांसमानानां कृते अत्युत्तममेकं व्याख्यानं भवति। लभ्यमानमातृकासु मातृकेयं

केरलातमिल्नाड्-देशेषु प्रसृता आसीदिति मातृकाणां पुष्पिकापरिशीलनेन अनुमातुं शक्यते।




अन्नंभट्टादीनां तर्कसंग्रहव्याख्यातृणां लक्षणानि परिष्कृत्य दोषरहितानि लक्षणानि कवयितुं व्याख्याकारो हरिहरः प्रयतते अत्र। अत्र व्याख्यानस्यास्य महत्त्वमभिव्यञ्जयन्ति कानिचन स्थलानि प्रदर्शयति यथा-

- एवञ्चन्द्रादावपि जलीयस्पर्शाद्यभिभवात् औष्ण्याद्यननुभवेƒपि न लक्षणाव्याप्तिरिति ध्येयमिति हरिहरीये तेजसः लक्षणकथने कथयति। तद् चन्द्रे जलमस्तीति आधुनिकं वचः कुतूहलेन स्मारयति।

- ईश्वरः सर्वनियन्ता सर्वज्ञः सर्वज्ञानी एक एवेति। उपासकानुजिघृक्षया विष्णुविरिञ्चाद्यनेकस्वरूपेणावस्थितावपि तस्यैक्यमेवेति भावः इति ईश्वरकथनम् एकं सत् विप्रा बहुधा वदन्तीति वेदवचनं स्मारयति।

- संस्कारजन्यत्वे सति ज्ञानत्वमिति स्मृतिलक्षणं कथ्यते चेत् सोऽयं देवदत्त इत्याकारके स्मृत्यनुभवात्मके प्रत्यभिज्ञाने लक्षणातिव्याप्तिः स्यात् तत्रापि संस्कारजन्यत्वविशिष्टज्ञानत्वस्य सत्वादिति हरिहरः संशीय प्रत्यभिज्ञायाः साक्षात् हेतुत्वं स्मृतौ तथा परम्परया हेतुत्वं संस्कारे च वर्तते इति कथयित्वा अत्र लक्षणगतजन्यत्वपदेन साक्षात्कारणजन्यत्वमेव स्वीकरणीयमिति कथयति। तेनोक्तदोषः परिह्रियते।

- सामान्यलक्षणाप्रत्यासत्तिर्नाम सामान्यमेव सन्निकर्षो भवति,अर्थात् अलौकिकः कश्चन सम्बन्धो भवति। किन्तु अलौकिकसन्निकर्षचर्चावेलायां व्याख्याकारः सामान्यविषयकं ज्ञानं प्रत्यासत्तिरिति सामान्यलक्षणाप्रत्यासत्तिं निर्वक्ति। लक्षणमिदं न सम्यक् स्यात् यतोहि सामान्यस्यैव प्रत्यासत्तित्वात्। पटस्य चाक्षुषप्रत्यक्षे पटत्वस्य प्रकारत्वेन पटत्वसामान्येन सर्वे पटाः पटत्ववन्त इत्यलौकिकसन्निकर्षेण सामान्यतः सर्वपटज्ञानजननात्।

- प्राथम्येन जायमाना अनुमितिः उत्तरक्षणजन्यायाः अनुमितेः प्रतिबन्धिका स्यात्। यतोहि अत्र पूर्वमेव साद्ध्यं सिद्धं भवति। अतः तद् उत्तरक्षणजन्यायाः अनुमितेः प्रतिबन्धकरूपेण वर्त्तते। एवञ्चेत् प्रत्यक्षसिद्धमप्यर्थम् अनुमानेन बुभुत्स्यन्ते तर्करसिकाः इति कथनं व्यर्थं स्यात् इति चेन्न, अनुमित्सायाः कारणत्वात्। अत्र उत्तेजकरूपेण अनुमित्सा प्रवर्तते। एवं संक्षेप्तुं शक्यते यथा सिषाधयिषाविरहविशिष्टसिद्धिः प्रतिबन्धिका, सिषाधयिषाविरहविशिष्ट-सिद्ध्यभावः अनुमितेः कारणं, अनुमित्सा उत्तेजकं प्रतिबन्धकप्रतिबन्धकमिति। अयं विचारः ग्रन्थान्तरेषु न दृश्यते।

- व्याख्याकारः बहुत्र स्थलेषु क्लिष्टमप्यर्थं लालित्येन तर्कशिशूनां कृते कथयति स्थलमेकमत्र प्रदर्शयति यथा व्याख्याने व्याप्तिलक्षणकथनावसरे साहचर्यनियमो व्याप्तिरिति मूलस्थं व्याप्तिलक्षणं व्याख्याकारः लालित्यरूपेण व्याख्याति। साहचर्यं नाम सामानाधिकरण्यं तस्य नियमः सार्वत्रिकत्वं व्यापकसामानाधिकरण्यमित्यर्थ इति।

- अधिकदेशवृत्तित्वरूपात्मकस्य व्यापकस्य लक्षणं महता यत्नेन कथयति व्याख्याकारो यथा हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यस्य व्यापक-

त्वमिति। धूमसमानाधिकरणवह्निघटोभयाभावं पूर्वक्षणवृत्तित्वविशिष्टवह्न्यभावं चादाय तत्प्रतियोगित्वात् वह्नेर्लक्षणासम्भव इत्यतः वैशिष्ट्यव्यासज्य-वृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य हेतुमन्निष्ठाभावस्य लक्षणे निवेशेन वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकहेतुमन्निष्ठाभावाप्रतियोगित्वम् इति व्यापकस्य लक्षणं परिष्कृत्य कथयति। पुनश्च आत्मा ज्ञानवानात्मत्वात् इत्यत्र आत्मा पक्षः, ज्ञानवत्त्वं साध्यम्, आत्मत्वं हेतुः च भवति। आत्मनः विभुत्वे तथा नित्यत्वे अपि घटादिदेशावच्छेदेन सुषुप्त्यादिकालावच्छेदेन च आत्मनि ज्ञानं न वर्तते। अतः तत्र लक्षणे अव्याप्तिदोषो भवेत्। तद्दोषनिवारणार्थं हेतुमन्निष्ठाभाव-प्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके निवेश्यतामिति सर्वदोषपरिहारः सम्पद्यते।

- अनुमानं द्विधा विभज्य प्रथमं स्वार्थानुमानं विशदीकरोति यथा स्वयमेव भूयोदर्शनेन व्याप्तिं गृहीत्वा इति। किन्तु केवलं हेतुसाध्ययोः भूयोदर्शनत्वेन व्याप्तिं ग्रहीतुं न शक्नोतीति हरिहरः स्वाभिप्रायं निश्चिनोति। कारणमपि वदति यथा शतशो धूमवह्न्योः साहचर्यदर्शने$f$पि वह्नौ धूमव्याप्तिग्रहासम्भवादिति। तर्हि कस्य व्याप्तिग्रहहेतुत्वमिति चेत् व्यभिचारज्ञानाभावविशिष्टसहचारज्ञानस्येति।

- व्याख्याकारः परार्थानुमानस्य पञ्चावयववानां प्रत्येकमपि प्रयोजनं महता यत्नेन कथयति यथा प्रतिज्ञावाक्यात् साध्यवदभिन्नः पक्षः इति। हेतुवाक्येन हेतुत्वाधिकरणम् ज्ञेयम्। उदाहरणवाक्येन व्याप्तिज्ञानं ज्ञेयम्। उपनयवाक्येन परामर्शज्ञानं ज्ञेयम्। निगमनवाक्येन अबाधितत्वविशिष्टात्सत्प्रतिपक्षितत्व-विशिष्टः यः हेतुः तज्ज्ञानज्ञाप्यसाध्यवदभिन्नः पक्षः इत्यवान्तरबोधः च तस्य फलम्। प्रतिज्ञाद्युपनयबोधान्तबोधचतुष्टयजन्यसंस्कारसहकृतनिगमनार्थविषय-कबोधः विशिष्टान्वयबोधः भवति। समूहालंबनात्मकबोधो भवति। एवं महावाक्यार्थबोधत्वेन प्रतिथो भवति। अनन्तरं विशिष्टपरामर्शः तेनानुमितिरिति क्रमः।

- सन्दिग्धसाध्यवान् पक्षः इति अन्नम्भट्टेन यदुक्तं तर्कसंग्रहे मूले पक्षलक्षणं तदेव इतोपि स्पष्टतया व्याख्याकारेण उच्यते यथा सन्देहविषयसाध्यवत्त्वमित्यर्थः इति। साध्यनिश्चयानन्तरम् इच्छयानुमितिस्थले साध्यसन्देहाभावात् सन्देहविषय-साध्यस्याप्यभावात् लक्षणस्य अव्याप्तिर्भवति इति कारणात् सन्देहविषयसाध्य-वत्त्वमिति पक्षलक्षणं परिष्करोति व्याख्याकारो यथा सिषाधयिषाविरह-विशिष्टसिद्ध्यभावरूपपक्षताश्रयत्वमेवपक्षलक्षणं बोध्यमिति। वस्तुतः

सिषाधयिषाविरहविशिष्टसिद्ध्यभावमेव पक्षता तदाश्रयत्वं पक्षलक्षणम्। गृहमध्यस्थपुरुषस्य गगनं मेघवन्नवेति विषये को/पि सन्देहो नास्ति, तथापि घनगर्जितश्रवणेन तस्य गगनं मेघवदिति ज्ञानम् जायते। अत्र पक्षे गगने सन्देहविषयसाध्याभाववत्त्वात् सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षता-श्रयत्वसत्त्वाच्च लक्षणपरिष्कारो$f$त्र संघटते।

- व्याख्यायां हेत्वाभासस्य सामान्यमेकं लक्षणं कथयति यथा यद्विषयकत्वं ज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकं तत्त्वं हेत्वाभाससामान्यलक्षणमिति। यत्र दुष्टहेतुना अनुमानं प्रयुज्यते तत्र यद्विषयकं ज्ञानं (यथार्थज्ञानं) तस्मिन् ज्ञाने तद्विषयकत्वं तत् अनुमितिप्रतिबन्धकतावच्छेदकं भवति, तद्वत्त्वं हेत्वाभासः इति पर्यवसितम्।

- व्याख्यायां सत्प्रतिपक्षं लक्षयति यथा विरोधिव्याप्यवत्ताग्रहसमानकालीनसाध्य-व्याप्यवत्ताग्रहविषयकत्वमिति। इदन्तु लक्षणं प्राचीनमताभिप्रायेण भवति। वस्तुतः साध्याभावव्याप्यवत्पक्षकत्वं सत्प्रतिपक्षलक्षणम्। साध्याभावसाधकं हेत्वन्तरं समानपक्षे एव भवितव्यमिति निष्कर्षति ग्रन्थकारः अन्यथा सद्धेतुषु अतिव्याप्तिर्भविष्यति।

इत्थम् अनेकविधाभिः व्याख्यागुणैः गुम्फितं भवति हरिहरीयमिति व्याख्यानम्। व्याख्यानस्यास्य महत्त्वमेधयन्तो बहवो विषयाः परामर्ष्टुं शक्याः तथापि उपलक्षणेन केचन पूर्वमुद्धृता विवृताश्चात्र। पदार्थानां लक्षणकथनेन तेषां लक्षणपरिष्कारविधया च स्थूलबुद्धीनां सूक्ष्मबुद्धिवैशद्यं सम्पत्स्यतीति ग्रन्थास्यास्याध्ययनेन प्राप्यमाणं परमं प्रयोजनमिति वक्तुं शक्यते। आनुषङ्गिकतया नव्यन्यायस्याध्ययनञ्चेति भणितुं शक्यते। एवं मम शोधे उपकृताः मातृकाः अवलोक्य तासां साजात्यवैजात्यपरिशीलनेन वंशावलिं निर्मीय तर्कसंग्रहस्य बहुषु व्याख्यानेषु सत्स्वपि व्याख्यानस्यास्य महत्त्वञ्च अध्याये*f*स्मिन् कथ्यते इति प्रतिज्ञां निरुह्य अध्यायममुं समापयामि।

इति 'निरीक्षणानि' नामकः चतुर्थाध्यायः समाप्तः।

# उपसंहारः

हरीहरीयमिति तर्कसंग्रहव्याख्यानमादाय **तर्कसंग्रहवृत्तेः हरिहरीयस्य समीक्षात्मकं सम्पादनम् अध्ययनञ्च** इति शीर्षके विद्यावारिधिरित्युपाध्यर्थं शोधो मयात्र विहितः। शोधेƒस्मिन् चत्वारः अध्यायाः सन्ति। प्रथमाध्याये शोधस्यामुखम्, तर्कशास्त्रस्यामुखम्, वैशेषिकदर्शनं तस्य परम्परा च, न्यायदर्शनपरम्परा,तर्कसंग्रहः प्रमुखटीकाश्च हरिहरीयमिति व्याख्या, हरिहरीयस्य मातृकानां विवरणम्, ग्रन्थकर्तृपरिचयः, द्वितीये अध्याये हरिहरीयम् इति तर्कसंग्रहव्याख्यायाः सम्पादनम्, पाठभेदनिर्णयश्च, तृतीयाध्याये हरिहरीयस्य समीक्षात्मकमध्ययनम्, चतुर्थे तावत् शोधे उपकृताः मातृकाः अवलोक्य तासां साजात्यवैजात्यपरिशीलनेन वंशावलिं निर्मीय तर्कसंग्रहस्य बहुषु व्याख्यानेषु सत्स्वपि व्याख्यानस्यास्य महत्त्वं किमिति च निर्णीयते।

उपसंहारोप्युसंह्रियतेƒत्र। चतुर्थोध्यायकथितैः किञ्च भूरिशैः गुणैः गुम्फिता भवति हरिहरीयव्याख्या। अतो विद्यावारिधिरित्युपाधये शोधविषयत्वेन समीक्षात्मकाध्ययनसहितं सम्पादनं सञ्चिता मया व्याख्या सा। स्वेन कृतोऽयं शोधो यथा

मह्यमुपकृतस्तथैव इतरेभ्योऽपि न्यायशास्त्राध्ययनमभिलषद्भ्यो नैयायिकेभ्यो वा शास्त्राणि अधिजिगांसमानेभ्यः साधारणजनेभ्यो वा उपकुर्वीतेत्यभिलषामि।

अमुकश्शोधो भगवतामनुग्रहेण पितृचरणानामाशीर्वादेन मामकनिर्देशकस्य अनुशास्त्या गुरुजनानाञ्चाशीर्वादेन मन्मित्रमणीनामपि साहाय्येन मम तु च दिष्ट्या विरतिमभजत। तेभ्यस्समेभ्योऽपि कृतज्ञतां वितीर्य शोधकादमुकात् विरता भवामि।

**इति शम्**

# गवेषणप्रेरणा

तर्कसंग्रहोपरि रचितासु अनेकासु टीकासु अन्यतमो भवति हरिहरीयमिति टीका। तत्र पाठभेदनिर्णयात्मकमध्ययनम् शोधत्वेनात्र कृतं मया। भिन्नस्थलेभ्यः सप्त मातृकाः चित्वा तदाश्रित्य ममाध्ययनं चालितं विद्यते।

१) सप्तभ्यः उपरि हरिहरीयस्य निगूढाः मातृकाः इतोऽपि स्युः। ताः चित्वा वैशद्येन हरिहरीयस्य पाठभेदनिर्णयात्मकमध्ययनं कर्तुं शक्यते। अतः प्रकाशमगतानां मातृकानां चयनाय प्रेरणा दातुं शक्यते।

२) अत्र शोधे ग्रन्थकर्तुः विषये नियतरूपेण कश्चनांशः अप्रस्तुतः। अनुमिताः केचन विषयाः परामृष्टाः। अग्रेसरैः ताः निर्णीयन्तामित्याशये।

३) ग्रन्थकारेण लिखिताः ग्रन्थान्तराः सन्ति चेत् तान् अपि चित्वा ग्रन्थकर्तुरध्ययनं वैशद्येन कर्तुं शक्यते।

४)	ग्रन्थकर्तुः तर्कशास्त्रपारम्पर्यम्, तस्य शिष्यपरम्परया ग्रन्थोƒयं कथं प्रसृतो जगति इत्यादिविषया अपि मृग्याः।

५)	अत्र शोधे कुत्रचित् तर्कसंग्रहस्य व्याख्यान्तरैः तौल्यभेदौ दर्शितौ। इत्थमेव इतरैः तार्किकग्रन्थैः व्याख्यानस्यास्य तौल्यभेदचर्चा शोधितुं शक्या।

# ग्रन्थसूची


1. ശ്രീ സ്വാമി തപോവനം — ഹിമഗിരിവിഹാരം, ചിന്മയ പ്രസിദ്ധീകരണം, (സെൻട്രൽ ചിന്മയമിഷൻ ട്രസ്റ്റ്), ചിന്മയ സേവാ ട്രസ്റ്റ് കേരള 6th റീപ്രിൻറ്,2002 .

2. സുഭദ്രാ ഗോവിന്ദപ്പിള്ള — തർക്കശാസ്ത്രം, കേരളഭാഷാ ഇൻസ്റ്റിറ്റ്യൂട്ട്, തിരുവനന്തപുരം - 1 ,1971

3. പ്രൊഫ: ഈ ഐ വാരിയർ — ഭാരതീയ തർക്കശാസ്ത്രം , കേരളഭാഷാ ഇൻസ്റ്റിറ്റ്യൂട്ട്, തിരുവനന്തപുരം,1974

4. भट्टवागीशः — न्यायतात्पर्यदीपिका, सम्पादकः – डां किशोर् नाथ् झा, गंगानाथ झा केन्द्रीय संस्कृतविद्यापीठम् प्रयागः, मोतीलाल् नेहृ पार्क् इलाहाबाद् – 2, 1979.

5. शशिप्रभा कुमार् — वैशेषिकदर्शन-परिशीलन दर्शनशास्त्रविभाग, दिल्ली विश्वविद्यालय, विद्यानिधि प्रकाशन्, दिल्ली – 110094, 2001

6. गौतमः — न्यायसूत्राणि 1.1.40, न्यायशास्त्रस्य भाषा संस्कृतं पठ्यताम्, संस्कृतसंवर्धनप्रतिष्ठानम्, देहली, 2020.

| | | |
|---|---|---|
| 7. | श्रीमत् अन्नम्भट्टः | तर्कसंग्रहः, (व्याख्या – आचार्य श्रीनिवास शर्मा), भारतीय विद्या संस्थान, वाराणसी, 2002. |
| 8. | Satis Chandra vidyabhusana | A History of Indian Logic, Motilal Banarasidas Publishers PVT LTD, 6th reprint, Delhi 2015. |
| 9. | Acharya Udayana | Kiranavali, Edited and Hindi Translated by Gaurinath Sastri Ganganatha, Research Institute Sampurnanand SanskritViswavidyalaya, Varanasi, 1980. |
| 10. | Acharya Viswanatha Panchanan Bhatta | Nyayasidhantamuktavali (4th Edition), Chawkhamba Sanskrit Sanstan Publishers and Distributors of Oriental Cultural Literature, Varanasi, 1989. |
| 11. | Annambhatta | Tarkasangraha, Edited by Acharya Sesharaj Sarma, Choukhamba Surabharati prakasan, Varanasi. |
| 12. | Erich Frauwallner | History of Indian Philosophy, Mothilal Banarsidas Publishers, Delhi, Reprint, 1993. |
| 13. | Gangadhar Sastri Tailanga | Nyayasustra With Vatsyayanabhashya, Chaukhamba Sanskrit Pratishtan, Delhi. |

14. Goutama — *Nyayadarsanam with the Bhasya of Vatsyayana*, Chaukhamba Sanskrit Sansthan, Chaukhamba, 1970.

15. Guha Dinesh Chandra — *Navyanyaya System of logic*, Motilal Banarsidass, New Delhi, 1979.

16. Hiriyanna M. — *Out Lines of Indian Philosophy*, Motilal Banarsidas Publishers, Delhi, 1993.

17. Jha Kumar Arabind — *Nyaya Philosophy*, Epistemology and Education, Standard Publishers, New Delhi, 2005.

18. Jha V.N — *Tarkasangraha of Annambhatta*, Chinmaya International Foundation Shodha Sansthan, Adi Sankara Nilayam, Eranakulam, 2010.

19. Karl H Potter — *Encyclopedia of Indian Philosophy* (Vol-2), Motilal Banarsidass Publishers, Delhi, 1977.

20. Madhavacharya — *Sarvadarsana samgraha*, Cosmo Publications, Delhi, 1976.

21. Misra Kesava — *Tarkabhasa*, Chawkhamba Publishers, Varanasi, 2001.

22. Puligandla Ramakrishna — *Fundamentals of Indian Philosophy* (4th edition), D.K Printworld (Pvt Ltd), New Delhi, 2008.

23. Sankara — *Sarvasiddhantasamgraha*, Chaukhamba Sanskrit Pratistan, Delhi.

24. S. C. Chatterjee — *The Nyaya Theory of knowledge*, Culcutta University, Culcutta, 1978.

25. Surendranath Das Gupta — *A History of Indian Philosophy (Vol-1)*, Motilal Banarsidass, Delhi, 1998.

26. Vatsyayan Muni — *Nyayabhasyam*, Varanasi Sudhi Prakasan, Varanasi, 1986.

27. Nandalal Sinha (Translated) — The Vaisesika Sutras of Kaṇada: With the Commentary of Sankara Misra and Extracts from the Gloss of Jayanarayaṇa, the Panini Office, Allahabad, 1911.

## ONLINE WEBSITES

1. Euthydemus, Plato,Perseus Digital library,Tufts university, https://www.perseus.tufts.edu/

2. Theatetus, Plato, Perseus Digital library,Tufts university, https://www.perseus.tufts.edu/

3. https://www.thanjavurparampara.com/mahaperiyava

4. https://ennapadambhagavati.blogspot.com/2010/02/sanskrit-scholar-par-excellence-29-6.html

# अनुबन्धः – गवेषणार्थम् उपयुक्तानां मातृकानां चित्राणि।






781 – क







1840 B - ख



1676 – ग







T 821 – घ










285 – ङ





R 2439 - च







897 - छ